भ[1]वाविद्या[2]स्रवानुबद्धैश्चित्तमनोविज्ञानबीजै[3]ः । त्रैधातुके पुनर्भ[4]वाङ्कुरमभिनिवर्तयंति । यदिदं नामरूपसहजाविनिर्[5]भागगतं [6]तेनैव च नामरूपे[7]ण विवर्धितेनै[8]षां षडायतनग्रा[9]मः संभवति । संभू[10]तेष्वायतनेष्वन्योन्यस्पर्शनि[11]पाततो[12] वेदना संभवति । तामेव [13]च वेदनां[14] भूयो [15]भूयो ऽभि[16]न[17]न्दितां तृष्णोपादानं[18] विवर्धते । [19]विवृद्धे तृ[20]ष्णोपा[21]दाने भवः संभवति । संभूते च भवे[22] जातिजरा[23]मरणशोकपरिदेवदुःखदौर्मनस्योपा[24]यासः [25]प्रादुर्भवंति । एवमेषां सत्त्वानां दुःखस्कंधो ऽभिनिर्वर्तते । [26]आत्मात्मीयविगतो ऽरिक्ततु[27]च्छः शून्यो[28] निरीहो नि[29]श्चेष्टो [30]जडतृणकाष्ठकुड्य[31]चर्मप्रतिभासोपमो न चै[32]वमवबुध्यन्[33]ते इति । ते[34]षामेवंरूपं सत्त्वानां दुःखस्कं[35]धाविप्रमोक्षं दृ[36]ष्ट्वा [37]सत्त्वेषु महाकरु[38]णात्मजः संभवति । एते[39] ऽस्माभिः सत्त्वाः[40] [41]परित्रातव्याः परिमोचयितव्या[42] अतो महासंमोहात् । अत्यंतसुखे[43] च निर्वाणे प्रतिष्ठापयितव्या[44] [45]इत्यतो ऽस्य महामै[46]त्र्यात्मजः संभवति ॥

एवं कृपामै[47]त्र्यनुगतेन खलु पुनर्भवंतो जिनपुत्रा बोधिसत्त्वो[48] [49]ऽध्याशयेन प्रथमायां बोधिसत्त्वभूमौ [50]वर्तमानः सर्व[51]वस्तुषु सापेक्षचित्तं परि[52]वर्ज्य बुद्धज्ञाने[53] चोदारस्पृहाभिलाष[54]बुद्धि[55]र्महात्यागेषु प्रयुज्यते । [56]स य इमे त्यागा[57] यदुत धनधान्य[58]कोशकोष्ठा[59]गारपरित्यागो वा । [60]हिरण्यसुवर्णमणिमुक्तावैडूर्यशंखशिला[61]प्रवा[62]डजातरूपरजतपरित्यागो वा । [63]रत्नाभरण-

1 वे MS. वो T. व K.K'. 2 श्र MS.K.K'.T. 3 जैलै MS. जैस्लै K.K'. 4 वांकुरु MS. वांकुर K.K'. वाजर T. 5 र्भो MS.K.K'. 6 तेन च T. 7 न T. 8 न नैषा 9 म T. 10 सु K. 11 षो K. 12 ता K'. 13 च—T.K. 14 ना MS. 15 भूयो—T. 16 पि K.K'. 17 न्दितां। तृश्नो MS. न्दतान्तृष्णो K.K'. 18 न T. 19 वि 12 ति=उपादाने विवृद्धे भवति T. 20 श्नो MS. 21 देन MS. 22 व T. 23 मरण=व्याधि T. 24 यासाः=याः K'. 25 प्र 3 ति=संभवति T. 26 आत्मियविगतो T. 27 छ MS. 28 न्या नी T. 29 निश्चन्तो MS. निस्त्रष्टः T. 30 जडस्तृ MS. जदतृ T. 31 वत्म T. 32 म—T. 33 न्ते T. 34 तस्यैवं MS.K.K'. 35 धो MS.K. 36 ष्ट्रा T. 37 सत्त्वेषु=अतो स्य T. 38 णात्मिजः T.K. णोन्मिजः K'. 39 त MS. 40 त्त्वा K. 41 परि 2 व्याः—T. 42 व्याः। अतो T.K. 43 खैव T. 44 व्याः। K. 45 इत्येते MS. इत्यतो—T.K.K'. 46 त्र्युन्मिञः K'. 47 त्य MS. 48 त्त्व T. 49 अध्या T. 50 च MS. 51 स्तेषु MS.K'. स्तुषं K. 52 प MS. 53 नै MS. 54 वृ T. 55 म T. 56 आकाश MS. आशयु K. शय K'. 57 गाः T. 58 कोष्ठ MS. कोष K'. 59 ष्ठां MS. 60 हिर 59 वा—MS. हिरण्य—T. 61 रा T. 62 ल K. 63 र 12 वा—T.

विभूषणपरित्यागो वा । हयरथगज[1]पतिवाहनपरित्यागो वा । सर्वप्रियम[2]नापवस्तुपरित्यागो वा । उद्यानतपोवनविहारपरित्यागो वा । दा[3]सीदास[4]कर्मकरपौरुषेयपरित्यागो वा । [5]भार्यापुत्रदुहितृपरित्यागो वा । ग्राम[6]नगरनिगम[7]जनपदराष्ट्रराजधानीपरित्यागो वा । शि[8]रःकर्णनासाकरचरणनयननखमांसशोणितास्थिमज्जा[9]मेद[10]च्छविचर्महृद[11]यसर्वात्मभावपरित्यागो वा । तेष्वनपेक्षो[12] भूत्वा सर्ववस्तु[13]षु बुद्धज्ञाने चोदा[14]रस्पृहाभिलाषबुद्धिः परित्यजति । [15]एवं ह्यस्य प्रथमायां बोधिसत्त्वभूमौ स्थितस्य महात्यागः संभवति । स एवं [16]करुणामैत्रीत्यागाशयो भूत्वा [17]सर्वसत्त्वपरित्राणा[18]र्थं भूयो [19]भूयो [20]लौकिकलोकोत्तरानर्था[21]न्परिमार्गयति परिगवेषयति[22] । [23]परिमार्गमाणः परि[24]गवेषमा[25]णश्चापरिखेदचित्तमुत्पाद[26]यति । एवमस्यापरि[27]खेदः संभवति । अपरिखिन्नश्च सर्वशास्त्रविशारदो[28] भवति । अतो ऽस्य सर्वशास्त्रज्ञता संभवति । स एवं शास्त्रो[29]पेतः क्रियाक्रिया[30]सुविचारितया बुद्ध्या हीनमध्यप्र[31]णीतेषु सत्त्वेषु [32]तथा तथा प्रतिपद्यते । यथाबलं यथा भजमा[33]नमतो ऽस्य लोकज्ञता संभवति । लो[34]कज्ञश्च [35]कालवेलामात्रचारी ह्यपत्राप्यवि[36]भूषिततया संतत्या आत्मा[37]र्थपरार्थे[38]षु प्रयुज्यते । अतो ऽस्य ह्यपत्रा[39]प्यं संभवति । तेषु च प्रयोगेषु [40]नैष्क्रम्यचारी [41]भवति । अविवर्त्याप्रत्युदावर्त्यबलाधा[42]नप्राप्तो भवति । एवमस्य [43]धृतिबलाधा[44]नमाजातं भवति । धृतिबलाधा[45]नप्राप्तश्च तथागतपूजोपस्थानेषु प्रयुज्यते[46] । शासने च [47]प्रतिपद्यते । एवं ह्य[48]स्येमे[49] दश[50]भूमिप-

1 पति=रथ T.  2 न आप T.  3 सि T.  4 कर्मकरपौरुषेय—MS.K.K′.  5 भा 10 वा—MS.K.  6 नगर—MS.K.K′.  7 जनपद—T.  8 र K.  9 ज्जो T. ज्ज K.  10 छ MS.K′.  11 य+च MS.  12 क्षा T. क्ष K.  13 ष्व T.  14 न MS. रे K.  15 एवमस्य K.  16 कृपा T.  17 सर्व—T.  18 र्थं K.  19 भूयो—T.  20 लो K.  21 नृप MS.  22 ते T.  23 परि—K′.  24 ग—MS.  25 न T.  26 येदेव MS.K′. येन्नैव K.  27 वेपदः MS.  28 दा MS.  29 परिगतः MS.  30 सु—MS.K.K′.  31 णि T.  32 तथत्वाय  33 नं । अतो T.  34 ज्ञ—K′.  35 कामलचारी वेलामात्रचारी T.  36 विभूपितया MS.K.K′. शुभपिततया T.  37 र्थं प T.  38 षु—K.  39 प्य T.K.K′.  40 ने K.  41 भवति—MS.K.K′.  42 नश्च भवति T.  43 धृ 10 ति—MS.  44 नं मा (or आ ?) जातं K.  45 नं MS.  46 तेषु K.  47 प्रयुज्यते K.  48 स्य MS.  49 मी T.  50 मी+भू T.

रिशोधका धर्मा आजाता भवंति । तद्यथा । श्रद्धा करुणा मैत्री त्यागः खेदसहि[1]ष्णुता शास्त्रज्ञता [2]लोकज्ञता ह्रयप[3]त्राप्यं धृतिबलाधानं तथागतपूजोपस्थानमिति । तस्यास्यां प्रमुदितायां बोधिसत्त्वभूमौ स्थितस्य [4]बोधिसत्त्वस्य बहवो बुद्धा आभासमाग[5]च्छन्ति । औदारिकदर्शनेन प्रणिधानबलेन च बहूनि बुद्धशतानि बहूनि बुद्धसहस्राणि बहूनि बुद्धशतसहस्राणि बहूनि बुद्धनियुतशतसहस्राणि बहवो बुद्धकोट्यो बहूनि बुद्धकोटीशतानि बहूनि बुद्धकोटीसहस्राणि बहूनि बुद्धकोटीशतसहस्राणि बहूनि बुद्धकोटीनियुतशतसहस्राण्याभासमागच्छन्ति । औदारिकदर्शनेन प्रणिधानबलेन च । स तांस्तथागतानर्ह[6]तः सम्यक्संबुद्धान्दृ[7]ष्ट्वोदाराध्याश[8]येन सत्करोति गुरुकरोति मानयति पूजयति चीवरपिण्डपातशयना[9]सनग्लानप्रत्ययभैषज्यपरि[10]ष्कारैश्च प्रतिपादयति[11] बोधिसत्त्वसुखोपधानं[12] चोपसंहरति । [13]संघगणसंमाननां [14]च करोति । तानि च कुशलमूला[15]न्यनुत्तरायां संयक्संबोधौ परि[16]णामयति । [17]तांश्चास्य बुद्धां भगवतः पूजयतः सत्त्वपरिपाक आजातो भवति स[18]त्त्वांश्च परिपाचयति । दानेन प्रियवा[19]द्येन चाधिमुक्तिब[20]ला[21]धीनतया चास्योपरि द्वे[22] संग्रहवस्तुन्या[23]जा[24]येते । न [25]तु खल्वशेषज्ञानप्रतिवेधप्रति[26]लंभेन । तस्य दश[27]भ्यः पारमिताभ्यो दानपारमि[28]तातिरिक्ततमा भवति । न च परिशेषासु न समुदाग[29]च्छति । यथाबलं यथाभजमानं स यथा यथा बु[30]द्धांश्च भगवतः पूजयति सत्त्वपरिपाकाय च प्रयुज्यते । इमां[31] भूमिपरिशोधकां[32] धर्मान्समादाय वर्तते । [33]तथा तथास्य[34] तानि कुशलमूलानि सर्वज्ञतापरिणामितानि

1 श्नु MS.T. 2 लोकज्ञता—K′. 3 प्यता T. प्यध्र MS. प्यन्ध्र K. 4 बोधिसत्त्वस्य—T. 5 छति MS. 6 तः—MS. 7 ष्ट्रो T. 8 ये श्रेयस्क MS. यतया सत्क T. 9 श MS. 10 स्का T.K.K′. 11 न्ति T. 12 नञ्श्चो K. 13 सं 10 ति—T. 14 श्च K. 15 नि अनु T. 16 ण MS. 17 ताश्च T. 18 त्त्वान्प MS.K. 19 क्ये MS.K.K′. 20 लेन चाधी T. 21 धा K. 22 मे र्थ MS. मे थें K.K′. 23 नि आजा MS. नी आजा T. 24 य MS. 25 तु—T. 26 लाभ्येन T. 27 भ्यो T. 28 ता ऽति T. 29 छ MS. 30 द्धाश्च T.K. द्धाश्च R. 31 माश्च दशभू T. 32 कान्समा MS. 33 तथा—MS. 34 स्य+स K.K′.+श MS.

भूयस्या मात्रयोत्तप्यन्ते[1] परिशुद्ध्यन्ति कर्मण्यानि[2] च भवन्ति यथाकामतया[3] ॥

तद्यथापि नाम भवन्तो जिनपुत्रा जातरूपं[4] कुशलेन कर्मारेण[5] यथा यथाग्नौ प्रति[6]क्षिप्यते[7] तथा[8] तथा परिशुद्ध्यति कर्मण्यं[9] च भवति । विभूषणालंकारविधिषु यथाकामतया[10] । एवमेव भवन्तो जिनपुत्रा यथा यथा बोधिसत्त्वो[11] बुद्धांश्च[12] भगवतः पूजयति सत्त्वपरिपाकाय च प्रयुज्यते । इमांश्च[13] भूमिपरिशोधकान्धर्मान्[14]समादाय वर्तते[15] । तथा तथास्य तानि कुशलमूलान्युत्तप्यंते[16] परिशुद्ध्यंति कर्मण्यानि[17] च भवंति यथाकामतया[18] ॥

पुनरपरं भवन्तो जिनपुत्रा बोधिसत्त्वेनास्यां प्रथमायां बोधिसत्त्वभूमौ स्थितेनास्यां[19][20] एव प्रथमाया[21] बोधिसत्त्वभूमेराकारप्रतिलंभनिष्पंदाः[22][23] परिमार्गितव्याः परिप्रष्टव्याः[24] । बुद्धबोधिसत्त्वानां कल्याणमित्राणां[25] च सकाशादतृप्तेन[26][27] भवितव्यं भूम्यंगपरिनिष्पादनाय । एवं यावद्दशभूम्या[28][29] बोधिसत्त्वभूमेरंगपरिनिष्पादनाय[30] तेन भूमिपक्षप्रतिपक्षकुशलेन[31] च भवितव्यं[32] । भूमिसंवर्तविवर्तकुशलेन च[33] । भूम्याकारनिष्पन्दकुशलेन च । भूमिप्रतिलंभविभावनाकुशलेन[34] च[35] । भूम्यंगपरिशोधनकुशलेन च[36] । भूमेर्भूमिसंक्रमणकुशलेन[37] च । भूमिभूमिव्यवस्थानकुशलेन[38] च । भूमिभूमिविशेषज्ञानकुशलेन[39] च । भूमिभूमिप्रतिलंभाप्रत्युदावर्त्यकुशलेन च । सर्वबोधिसत्त्वभूमिपरिशोधनतया । तथागतज्ञानभूम्याक्रमणकुशलेन च भवितव्यं ॥

एवं भूम्याकाराभिनिर्हारकुशलस्य हि भवन्तो जिनपुत्रा[40] बोधिसत्त्वस्य प्रथमाया[41] बो-

1 प MS. 2 न्या T. 3 अनुत्तरायां सम्यक्संबोधौ+य T. 4 प MS. 5 मा+क K′. 6 ति–T. 7 प्यंते MS. 8 तथा तथा–T. 9 ण्येवं MS. ण्येव T. ण्यश्च K. 10 यथाकामतया–MS.K.K′. 11 त्वा MS. 12 द्धा T. 13 दश+भू T. 14 कां ध T. कान्ध K. 15 र्तंते K′. 16 नि उत्त MS. 17 न्या T. 18 अनुत्तरायां सम्यक्सबोधौ+य T. 19 ष्ठि T. 20 स्यां एवं T. 21 बोधिसत्त्व–K′. 22 मै K′. 23 स्पं MS.K.K′. 24 गवेषितव्याः T. 25 णाश्च K. णा च T. 26 शेभ्यः। अतृ T. 27 न+च K. 28 द T. 29 म्यां T. 30 मे 8 य=मेरिति T. 31 प्रतिपक्ष–T. 32 व्य MS.K. 33 च–K′. 34 भ+विभव MS.K.K′. 35 च–K. 36 च–K′. 37 मिं MS. 38 भूम्ये भूमि MS. भूम्यभूम्य K.K′. 39 भूमेर्भूमि T. 40 त्रो MS. 41 बोधिसत्त्व–T.

धिसत्त्वभूमेरुच्चलितस्य[1] निष्ठानं[2] न भवति[3] । यावद्दशमीभूम्याक्रमणमिति[4] । मार्गानिष्ठान[5][6]-
गमनेन च भूमिज्ञानालोकेन च बुद्धज्ञानालोकं प्राप्नोति ॥

तद्यथापि नाम भवंतो जिनपुत्राः[7] कुशलः सार्थवाहो महासार्थपरिकर्षणाभिप्रायो[8] महा-
नगरमनुप्रापयितुकामः[9] । आदावेव मार्गगुणांश्च[10] मार्गविवर्तदोषांश्च[11] मार्गस्थानान्तरवि[12][13]-
शेषांश्च[14] मार्गास्थानान्तरविवर्तदोषांश्च[15] मार्गपथ्युदनक्रियाकार्यतां[16][17] च परिमार्गयति[18] परिगवे[19]-
षयते । स यावन्महानगरमनुप्राप्तीय[20] कुशलो भवत्यनुच्चलित[21] एवं[22] प्रथमान्मार्गान्तरस्थाना[23]-
त्[24] । सं[25] एवं ज्ञानविचारितया बुद्धया महापथ्युदनसमृद्धयानुपूर्वेण[26][27] महासार्थेन सार्धं या-
वन्महानगरमनुप्राप्नोति[28] । न चाटवीकान्तारदोषैः[29] सार्थस्य वात्मनो वास्योपघातः संपद्यते ।
एवमेव भवन्तो जिनपुत्रा[30] बोधिसत्त्वः कुशलो महासार्थवाहो यदा प्रथमायां बोधिसत्त्व-
भूमौ स्थितो भवति । तदा भूमिविपक्षप्रतिपक्षकुशलश्च भवति । भूमिसंवर्तविवर्तकुशलश्च ।
भूम्याकारनिष्पन्दकुशलश्च । भूमिप्रतिलंभविभावनाकुशलश्च[31] । भूम्यंगपरिशोधनकुशलश्च ।
भूमेर्भूमिसंक्रमणकुशलश्च । भूमिर्भूमिव्यवस्थानकुशलश्च[32] । भूमिभूमिविशेषज्ञानकुश[33]-
लश्च । भूमिभूमिप्रतिलंभाप्रत्युदावर्त्यकुशलश्च । सर्वबोधिसत्त्वभूमिपरिशोधनतया तथा-
गतज्ञानभूम्याक्रमणकुशलश्च[34] भवति । तदा बोधिसत्त्वो महापुण्यज्ञानसंभारपथ्युदनसुसं[35][36]-
गृहीतो[37] ज्ञानसंभारसुकृतनिचयः[38] । महासत्त्वसार्थपरिकर्षणाभिप्रायः[39][40] सर्वज्ञतामहानगरम-
नुप्रापयितुकामः[41] । आदावेव भूमिमार्गगुणांश्च[42] भूमिमार्गविवर्तदोषांश्च भूमिमार्गस्थानान्त-

1 रि T. 2 धि T. 3 सं+भ MS.K.K'. 4 म्यां T. 5 धि MS.K.K'. 6 ना R. 7 त्रा K.K'. 8 महां तां सार्थं T. 9 म MS. 10 णा K. 11 पा MS.K. 12 र्ग T. 13 विवर्तदोषांश्चं T. 14 षा MS. 15 मा 10 श्च—T. 16 क्रियापथ्यदन T. 17 थ्यं MS.K.K'. थ्यो R. 18 य—T. 19 पृच्छते T. 20 सये T. सायं K'. 21 ति । अनु T. 22 वं T. 23 र्मा T. 24 न् K. 25 स—T. 26 थ्य MS.K.K'.T. थ्यो R. 27 ध्या MS. 28 न्म T. 29 तवि T. 30 त्राः T. 31 रं T. 32 भू-मि—MS.K'. 33 मि+ज्ञान MS. 34 न+तया K. 35 ज्ञान—T. 36 थ्य MS.K.K'.T. थ्यो R. 37 त T.K. तः MS. 38 यो T. 39 महान्तं सर्वसार्थ MS. महान्तसार्थं T. 40 र्थं K'. 41 माः T. 42 णा MS.

रविशे[1]षांश्च भूमिमार्गस्थानान्त[2]रविवर्तदो[3]षांश्च [4]भूमिमार्गमहापुण्यज्ञानसंभारप[5]थ्युदनक्रि[6]या-कार्य[7]तांश्च परिमार्ग[8]यते परि[9]गवेषते। बुद्धानां भगवतां बोधिसत्त्वानां [10]कल्याणमित्राणां [11]च सकाशात्स [12]यावत्स[13]र्वज्ञतामहानगरानुप्राप्तिकुशलो भवति[14]। अनु[15]चलित एव प्रथमान्मार्गा-न्तरस्थानात्[16]स एवं ज्ञानविचारितया बुद्ध्या महापुण्यज्ञानसंभारप[17]थ्युदनसमृद्ध्या[18]नुपूर्वेण महान्तं [19]सत्त्वसार्थं यथा परिपाचितं संसाराटवीकान्तारदुर्गादतिक्र[20]म्य यावत्सर्वज्ञतामहा-नगरमनु[21]प्रा[22]पयति। [23]न संसाराटवीकान्तारदोषैः सत्त्वसार्थ[24]स्य [25]वात्मनो वा[26]स्योपघातः संप-द्यते। तस्मात्तर्हि भवंतो जिनपुत्रा बोधिसत्त्वेनापरिखिन्नेन भूमिपरिकर्मविशेषाभियुक्तेन भवितव्यं॥

अयं भवंतो जिनपुत्रा[27] बोधिसत्त्वस्य [28]प्रथमायाः प्रमुदितायाः बोधिसत्त्वभूमेर्मुखप्रवे[29]शः समा[30]सतो निर्दिश्यते। यो[31] ऽस्यां[32] प्रतिष्ठितो बोधिसत्त्वो भूयस्त्वेन जम्बूद्वीपेश्वरो[33] भव-ति। [34]महैश्वर्याधिपत्यप्रतिलब्धो धर्मानुरक्षी [35]कृती प्रभुः। सत्त्वान्महात्यागेन संगृही[36]तुकुश-[37]लैः सत्त्वानां मात्सर्यम[38]लविनिवृत्तये [39]ऽपर्यन्तो महात्य[40]गारंभैः। यच्च किं चित्कर्मारभते दा-नेन वा प्रियवा[41]द्येन वार्थक्रियया वा समानार्थ[42]तया [43]वा तत्सर्वमविरहितं बुद्धमनसिका-रैर्धर्ममनसिकारैः संघमनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्यामनसिकारैः पारमिताम-नसिकारैर्भूमिमनसिकारैर्बलमनसिकारैर्वैशारद्यमनसिकारैरावेणिकबुद्धधर्ममनसिकारैर्यावत्स-र्वाकारव[44]रोपेतसर्वज्ञज्ञानमनसिकारैः। किमिति सर्वसत्त्वानामग्र्यो भवेयं श्रेष्ठो ज्येष्ठो वरः

1 पा MS. 2 रं T. 3 पा MS. 4 भूमिमार्ग–T. 5 थ्य MS.K.K'.T. थ्यो R. 6 य MS. 7 ताञ्च K. 8 गेति T. 9 पृच्छति T. 10 महा+क K'. 11 च–T. 12 यावत्स–T. 13 न्स MS.K.K'. 14 त्यनु T. 15 चरितो भवति। प्रथमा T. 16 तूस K. तू। एवं T. 17 थ्य MS.T.K.K'. थ्यो R. 18 नुपूर्वेण–MS.K.K'. 19 सर्वसार्थ T. 20 मर्थ्य MS. 21 प्र MS. 22 प–K'. 23 न+च T. 24 र्थवाह आत्म T. 25 चा MS. 26 प्यो K'. 27 त्राः T. 28 प्रमुदितायाः प्रथमायाः MS. 29 शतः T. 30 सनिर्देशता यत्र प्रतिष्ठितो T. 31 या MS. 32 स्या K. 33 रा MS. 34 T.K'. 35 कृती–MS.K.K'. 36 तुं T. 37 ल MS. 38 ले MS. 39 अपर्यन्त MS.K.K'. 40 ग महै MS. 41 द्यतया T. 42 क्रियया T. 43 याव तत्स MS. 44 वलो MS.K.

प्रवर उत्तमो ऽनुत्तमो नायको विनायकः परिणायको यावत्सर्वज्ञज्ञानप्रतिशरणो भवेयं[1] । आकां[2]क्षंश्च तथारू[3]पं वीर्यमारभते । यथारू[4]पेण वीर्यारंभे[5]न सर्व[6]परिग्रहकल[7]त्रभो[8]गानु[9]त्सृज्य तथागतशासने प्र[10]व्रजति । प्र[11]व्रजितश्च सन्नेकक्षणलवमुहूर्तेन समाधिशतं [12]च प्रतिलभ[13]ते बुद्धशतं च पश्यति । तेषां चाधिष्ठानं संजानीते । लोकधातुशतं च कम्पयति । [14]क्षेत्रशतं चा[15]क्र[16]मति । लोकधातुशतं चाव[17]भासयति । सत्त्वशतं च परिपाचयति । कल्प[18]शतं च तिष्ठति । कल्पशतं च पूर्वान्तापरान्त[19]तः प्रवि[20]शति । धर्ममुखशतं च प्रविचिनोति । कायशतं च दर्शयति । कायं कायं च बोधिसत्त्वशतपरिवा[21]रमादर्शयति । तत उत्तरे[22] प्रणिधानब[23]लिका बोधिसत्त्वाः[24] प्रणिधान[25]वैशेषि[26]कतया विकुर्वति । येषां न सु[27]करा[28] संख्या[29] कर्तु[30] । कायस्य वा प्रभाया वा [31]ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्याया वा व्यूहस्य [32]वाधिष्ठानस्य [33]वाधिमुक्तेर्वा [34]ऽभिसंस्कारणां वा यावदेतावद्भिरपि कल्पकोटीनियुतशतसहस्रै[35]रपि ॥

अथ खलु वज्रगर्भो बोधिसत्त्व एतदेव भूम्यर्थं प्र[36]रूपयमा[37]नस्तस्यां वेलायामिमा[38] गाथा[39] अभाषत ॥

[40]ते शुक्लध[41]र्ममुपचिताः कुश[42]लै[43]रुपेताः
पर्युपासि[44]ताः सुगतमैत्रकृपानुकूलाः ।
अधिमुक्त[45]युदारकुशलाशय[46]शुद्धभावाः[47]

1 यमिति T. 2 क्ष MS. 3 प MS. 4 णा MS.K. 5 ण K. 6 परि—R. 7 र T. 8 दोषानवसृज्य T. 9 सृ MS. 10 वजिति T. 11 व्रजितो ऽनेक T. 12 च—T. 13 ते+समापद्यते च T. 14 क्ष T. 15 क्रा K. 16 म+य MS. 17 तोष MS. भाश T. 18 ल्पं MS. 19 न्तं प्र MS. K.K'. 20 स T. 21 राश्चाद MS. रानाद K'. 22 रेण T. 23 सि T. 24 त्त्वो MS. 25 नवि MS.K.K'. 26 क—MS.K.K'. 27 शू MS. 28 रां MS. 29 ख्यां MS.K.K'. 30 तुं T. 31 गंधर्वा MS. 32 वा अधि MS.T. 33 वा अधि T. वा ऽधि K'. 34 अभि T. 35 रिति T. 36 पूरय K. 37 ण K. 38 मां MS.T.K. 39 थामभा T. 40 Metre: वसंततिलका 41 र्ममु MS.K.K'.T. 42 लोपुपेताः T.B.K. 43 पै K. 44 सिता MS. शिताः T.L. मिता B. 45 क्त्हार MS.K.K'.B.L. 46 बु T.L. 47 वा T.L. वाश्चि RS.

चित्तं [1]जनेंति अतुलं जिनज्ञानहेतोः ॥ १ ॥
सर्व[2]ज्ञबुद्धबल[3]शोधन[4]वैर्यस्था[5]नां
जिनध[6]र्मनि[7]ष्प[8]त्तिजगत्परित्रायणा[9]र्थाः ।
माहाकृपोपचयव[10]र्तनधर्मचक्रं
जिनक्षेत्रशोधमुपपद्यति चित्तश्रेष्ठं ॥ २ ॥
त्रय[11]ध्वै[12]कविक्षणविबुद्धननिर्विकल्पा
नानाविधे[13] जगति कालविशोधनार्थं ।
[14]संक्षेप सर्वगुण [15]एषितु नायकानां
आकाशतुल्य स[16]मुदेति उदारचित्तं ॥ ३ ॥
प्रज्ञाधिप[17]त्यकृपपूर्वमुपाय[18]युक्तं
अधिमु[19]क्तिआशयविशु[20]द्धिबलाप्रमाणं ।
आ[21]संग[22]ताभिमुखताअपरप्रणेयं
समतो[23]पुपेतसुग[24]तावरचित्तज्ञानं ॥ ४ ॥
सह जाति चित्त[25]रतनं सुग[26]तात्मजानां
अतिक्रांत बालचरि[27] [28]बुद्धचरि ह्युपेतः ।
[29]जातः कुले[30] दशब[31]लान [32]अनोद्यपद्यः

1 जनेति T.L. जनंति K.K'. जानंति B. 2 ज्ञा B. 3 सो T. 4 वीर्य K. 5 ने MS. मा RS. 6 र्म अनि B. 7 स्प K'. 8 न्दि MS. दि B. or ति? 9 र्था K. 10 र्तें MS. 11 ध्वे B. 12 लक्ष MS. रक्ष T. 13 ध MS. 14 स MS. 15 एष तु MS.K.K'.T. एव तु B. 16 द्रे MS. 17 त्ये T. 18 युक्तः MS. चित्त K. 19 क्त K.K'. 20 ध RS. 21 श MS. 22 तो B. 23 पपत्ति MS.T.K.K'. 24 त MS.T.K.K'. तं RS. 25 (रत्नं) RS. 26 तो त्म T. 27 लि B. 28 द्धि L.B. 29 या T.L. 30 ल MS. 31 लान् MS. लोन् T.L. लो न B. 32 अतोपपद्यः MS. अनवद्यपद्यः 無瑕玷 Sn. Sdh. 無有譏嫌 Kj. Bh. 永無諸罪殃 Dhr.

समतां जिने[1] अनुगतो नियताग्रबोधिः ।। ५ ।।
एकस्मिं[2] चित्त [3]उपपद्यति भूमिलाभो[4]
भवते अचल्यु[5] गिरिराजसमाशयश्च ।
[6]प्रामोद्य[7]प्रीतिबहु[8]लश्च [9]प्रसादवांश्च
उत्साहवेगविपुलः[10] [11]सदुदग्रचित्तः ।। ६ ।।
संरंभहिंसविगत[12]श्च अक्रोधनश्च
ह्री[13]गौरवार्जवतर[14]श्च सुसंवृतश्च ।
जगता[15]यनं स्म[16]रति अप्रतिमान[17]ज्ञानं
प्रीतिं जने[18]त्युपगत स्पृहमेत[19] स्थानं ।। ७ ।।
[20]पंचाभया अपगताः सह भूमिलाभो[21]
आजीविका मरण [22]कीर्त्यथ दुर्गतिश्च ।
पर्षद्भ[23]यं [24]च विगतं तथ [25]छंभितत्वं
किं कारण त[26]थ हि आत्मनिकेतु नास्ति ।। ८ ।।
ते [27]च्छंभितत्वविगताः कृपमैत्रयुक्ता[28]ः
[29]श्रद्धाः [30]सगौरवह्रि[31]योपगता गुणाढ्या[32]ः ।
रात्रिं दिवं कुशलपक्षनिषेवमाना[33]ः
सत्या[34]र्थधर्मनिरता[35] न तु कामभोगे[36] ।। ९ ।।

1 न MS. 2 स्मिं MS.T. 3 स+उ T.B.L. 4 भा T.L. 5 ल्य B. 6 प्र MS.T. 7 प्र T. 8 लं MS. 9 प्रभाववांश्च K.K'. प्रभावनांश्च MS. 10 लो MS. 11 मृदुरागचित्तः MS.T.K.K'.B.L. उदग्री Prose 12 म MS. 13 गैां K. 14 र—T.L 15 म MS. 16 तो MS. 17 ण MS. 18 नं MS. न K'.B. 19 व MS. 20 पञ्च B. पंच MS. 21 भ T. भा K. भः K'. भे B.L. 22 का L. 23 त्भ T. 24 चा T. 25 च्छंवि T.L. च्छभि K'. 26 था MS. 27 छं MS.K.K'. 28 क्ता B. 29 शु B. सु L. 30 सुगौरव T. 31 यौ MS. 32 द्याः T. 33 णाः T.K.K'.L. 34 त्वा MS. 35 ताः K. 36 गैः T.L. गै B.

श्रुतधर्मचिं[1]त[2]कुशला[3] अनिकेतचित्ता[4]

[5]लाभाउशी[6]वि[7]षगताय[8]तबोधिचित्ताः ।

ज्ञानाभिलाषिब[9]लशोधनबुद्धधर्मा[10]

[11]एषन्ति पारमित वर्जितमा[12]यशाठ्याः[13] ॥ १० ॥

[14]याथोदितास्तथ[15]क[16]रा स्थितसत्यवाक्या[17]

न तु [18]दूषणा जिनकुले चरि[19] बोधिशिक्षां ।

[20]लोकक्रियाय विगता[21] निरता जगार्थे[22]

शुक्लैरतृप्त भुय उत्तरिमारभन्ते ॥ ११ ॥

ते एव धर्मनिरता गुणअर्थयुक्ता

अभिनिर्हरंति प्रणिधिं जिनदर्शनाय ।

सद्धर्मधारणु[23]पसंक्रमणं[24] ऋषीणां

अभिनिर्हरन्ति प्रणिधिं वरचारिकायां ॥ १२ ॥

परिपाकसत्त्वपरिशोधनबुद्धक्षेत्रं

ते[25] चास्य क्षेत्र स्फुटि[26]ता जिनौ[27]रसेहि ।

एकाशया जिनसुतेहि अमोघतायाः

सर्वत्र बालपथि बुद्धियहेतुम[28]र्थे ॥ १३ ॥

1 चित्त B. 2 ता MS. 3 लो T.L. 4 चिंता K'. 5 लोभोदशी MS. 永除愛欲利 Dhr. 斷諸利養心 Kj. Bb. 不貪於利養 Śn. Śdh. 6 सी L. 7 चित्तगता RS. 8 यु T.B. 9 पल T. 10 र्मा L. 11 एषंति K'. 12 म K. 13 थ्याः T. थाः K. 14 यथावादिनस्तथ RS. 15 था T.L. 16 क्रियाः RS. 17 क्ये B. 18 दुपणा T.K.B. ऊपण MS. दूषण Prose. 19 लिता MS. लितो T.K. 20 以離方俗事•不樂世諸利 Dhr. 遠世間事業•樂利於世間 Kj. 遠世間事願•樂出於世間 Bb. 不樂於世事•常利益世間 Śn. 不捨世間事•而入出世道 Śdh. 21 तो MS. 22 र्थां T.B. 23 नु MS. मु K. 24 णमृषी K. 25 तै T.L. 26 टा MS. टिका RS. 27 नौर MS. 28 मा MS. or अ?

एतांश्च नैकप्रणि[1]धीमभिनिर्हरन्ति
ते चा[2] अनन्तविपुलाय अनन्तताया[3]ः ।
[4]आकाश[5]सत्त्वअ[6]ध्वधर्मतनिर्वृतं च
लोको हिं[7] निष्ठ जिन[8]उ[9]त्पदि[10] ज्ञानभूमी ॥ १४ ॥
चित्तस्य [11]नो विषय ज्ञानप्रवे[12]श निष्ठा
या वर्तनित्रिविधनिष्ठ जगत्यनन्ता ।
प्रणिधाननिष्ठि[13]तु भवे[14]न्मम एवरूपं
यथ एत निष्ठ तथ चर्य[15] समालभेयं ॥ १५ ॥
एवं सुनि[16]र्हित[17]सुमार्दवस्निग्धचित्ताः
[18]श्रद्धे[19]य बुद्धगुण सत्त्व [20]भिलोकयन्त[21]ः ।
[22]प्रीत्यातुलंतु जगतः कृपमैत्रतां[23] च
[24]परि[25]तायितव्य [26]मय सत्त्व[27]दुःखार्दितानि ॥ १६ ॥
तेषार्थि त्याग[28]मतिविदुर आरभन्ते
राज्यं[29] वरं[30] विविधर[31]त्नहयां ग[32]जांश्च ।
शिरहस्तपादनयना स्वकमात्ममांसं[33]
सर्वं त्यजन्ति न च दीनमना भवन्ति ॥ १७ ॥

1 धि MS. 2 चो RS. 3 या RS. 4 सत्त्व, लोक, आकाश, धर्म, निर्वाण, बुद्धोत्पाद, तथागतज्ञान, चित्तारंवन, बुद्धविषयज्ञानप्रवेश, लोकवर्तनीधर्मवर्तनीज्ञानवर्तनी Prose 5 अन्त MS. धातुसत्त्वधर्मत RS. 6 र्थं All MSS. 7 ह्य MS. 8 मु MS. 9 त्पा L. 10 दि+त T.L. 11 तो MS. 12 भेद MS. K.K'.T. 13 नु MS. त्व T.L. 14 वेन्न ममैवरूपा RS. वेत्म° T. 15 र्यें MS.K.K'. 16 हिं MS. 17 सुसमार्दव MS. 18 शु MS. 19 त MS.K.K'. 20 हि MS.K.K'. 21 न्त MS.K'. 22 प्रतीत्यन्तु-लम्भुपगतः (प्रतीत्यसमुद्भवगतः Tib.) RS. 23 कां B. 24 फुटि T. 25 तापि MS.K.K'. 26 रय MS. मयः T.K.L. 27 or दु? 28 विविधं पुन आरभन्ते (विविधत्याग पुनः Tib.) RS. 29 ज्य MS. 30 र MS.K. 31 त्नं L. 32 जा MS.K.T. 33 स MS.K.

एषन्ति शास्त्रविविधान्न च खेदमेति
शास्त्रज्ञ[1] लोकचरितान्यनुवर्तयन्ति ।
लोकज्ञतामुपगता ह्रियता[2]धृतिं च
पूजन्ति[3] चाप्रतिसमान् गुरुगौरवेन[4] ॥ १८ ॥
एषो[5] भियुक्त विदुना[6] दिवरात्रिनित्यं
उत्तप्यते[7] कुशल स्वर्ण यथैव[8] अग्नौ ।
सो[9] चापि एव परिकर्मु दशान[10] भूमीं
कृत्वा असंगतमुपेति अनिष्ठिहंता[11] ॥ १९ ॥
यथ[12] सार्थवाहु[13] महसार्थहिताय[14] युक्तो[15]
पृच्छित्व[16] मार्गगुण[17]क्षेमतम[18]भ्युपेति[19] ।
एवमेव भूमि[20]प्रथमास्थितबोधिसत्त्वः
कृतनिष्क्रमो[21] दशभि[22] बोधिमुपे[23]त्यसंगः ॥ २० ॥
अवस्थिता[24] गुणधरा[25] नृपती[26] भवंति[27]
धर्मानुशासक[28] अहिंसक[29]मैत्रयुक्ताः ।
जम्बूध्वजं सकलराज्य[30] प्रशासयन्तः[31]
स्थापेन्ति[32] त्यागि[33] जनतां[34] वरबुद्ध[35]ज्ञाने[36] ॥ २१ ॥

1 ज्ञे L. 2 धितिं T. 3 ज्य K'.B.L. 4 ण T.K.K'.L. 5 पा हि MS. 6 तां MS. नां K.K'.B. 7 त MS.K'. 8 वरग्नौ T.L. 9 सा MS. 10 सा T.B.L. 11 वि MS. 12 यथा T.L. यः MS. 13 ह MS. 14 वाहिता K. 15 क्ते MS. 16 बुद्धित्व MS. वृद्धित्व T.B.L. (पृच्छित्व) RS. 17 क्षम T.L. 18 त्यु K.K'. 19 पे T. 20 भूम्य MS. 21 मा T.L. 22 ति MS. 23 पे MS. 24 तो MS.K.K'. 25 रो All MSS. 26 ति T. 27 भव MS. 28 सास T.L. 29 श T. 30 ज्यं T. 31 णाश T. 32 स्थापंति MS. 33 गी MS. ग K. 34 ग K. 35 ल MS. 36 नं MS.K'. न K.

आकांक्ष[1]मानं[2] वृषभी[3] विजहित्व राज्यं
जिनशासनें[4] उपगताश्चरि आरंभंतः[5] ।
लब्धां[6] समाधि[7]शतं[8] बुद्धशतं च पश्यि[9]
कंपेन्ति [10]क्षेत्रशतु भासि[11] समाक्रमन्ति ॥ २२ ॥
शोधंति[12] सत्त्वशत धर्ममुखान्[13]विशन्ति
प्रविशन्ति कल्पशत कायशतं निदर्शि ।
पूर्णं[14] शतं जिनसुतान निदर्शयन्ति
भूयोत्तरिं प्रणिधिश्रेष्ठिबलाप्रमाणाः ॥ २३ ॥
[15]इत्येषां[16] प्रथमाभूमिर्[17]निर्दिष्टा सुगतात्मजाः ।
सर्वलोकहितैषीणां[18] बोधिसत्त्वान[19]मुत्तमा ॥ २४ ॥

[20]इति प्रमुदिता नाम प्रथमा बोधिसत्त्वभूमिः ॥ १ ॥

---

[21][22]श्रुत्वैतदुत्तमं स्थानं भूम्यां[23]ः श्रेष्ठं मनोरमं[24] ।
प्रसन्न[25]मनसंकल्पा[26] हर्षितां[27]ः सुगतात्मजाः[28] ॥ १ ॥
अभ्युत्थिता[29] आसनेभ्यो[30] अभ्युद्गम्य[31] खगपथे[32] ।
अभ्याकिरन्ति कुसुमैः[33] साधु साध्विति[34] व्याहरी[35] ॥ २ ॥

1 क्षम T. 2 णं K. ण K'. 3 भि T.L. 4 न MS. 5 रंभ MS. लभं T.L. 6 or ब्ध्वा? 7 स T.L. 8 ततः MS.K.K'. 9 श्य MS. 10 क्ष T. 11 सि संक्र MS. सि असंक्र T.K.K'. सि अतिक्र RS. 12 ध्यन्ति T. 13 (विचिनन्ति) RS. 14 ण MS.K'. 15 Metre : श्लोक 16 षां MS. 17 नि MS.K. 18 षिणा MS.T. 19 नु T.L. 20 इति–T.L. 21 द्वितीया भूमिः 22 त्वे MS.K.K'. तै T.L. 23 म्या MS.L. 24 म K. 25 श T. 26 सां T.L.K'. 27 ता MS. तां T.L. 28 जा K. 29 त्यु MS. 30 भ्यः MS. भ्य K.K'. 31 त्यु MS. 32 गे K. 33 मै T.L. 34 धिगिरो व्या MS. 35 रि K.

साधु साधु महाप्राज्ञ वज्रगर्भे[1] वि[2]शा[3]रदे ।
यन्निर्दिष्टा त्वया भूमिर्बोधिसत्त्वान या चरी ॥ ३ ॥
पर्षद्धि[4] सुप्रसन्ना तु विमुक्तिचन्द्र[5] पृच्छति ।
उत्तरि[6] कीर्तिया भूमिं[7] द्वितीयं सुगतात्मजाः[8] ॥ ४ ॥
कीदृशा मनसंकल्पा द्विती[9]य[10]मभिलक्षि[11]ताः ।
प्रव्याहर महाप्र[12]ज्ञ श्रोतुकामा जिनात्मजाः ॥ ५ ॥

वज्रगर्भो बोधिसत्त्व आह ॥

यो ऽयं भवंतो जिनपुत्रा बोधिसत्त्वः[13] प्रथमायां बोधिसत्त्वभूमौ सुपरिकर्मकृतो द्विती-[14]यंबोधिसत्त्वभूमिमभिलषति । तस्य दशचित्ताशयाः प्रवर्तन्ते । कतमे दश यदुत । ऋ-[15]ज्वाशयता च । मृद्वाशयता च । कर्मण्या[16]शयता च । दमाशयता च । शमाशयता च । कल्याणाशयता च । असंसृ[17]ष्टाशयता च । अ[18]नपेक्षाशयता च । उ[19]दाराशयता च । म-हात्म्याशयता च । इमे दशचित्ताशयाः प्रवर्तंते । ततो द्वि[20]तीयायां बोधिसत्त्वभूमौ वि-मलायां [21]प्रतिष्ठितो भवति ॥

[22]तत्र भवन्तो जिनपुत्रा विमलायां बोधिसत्त्वभूमौ[23] स्थितो[24] बोधिसत्त्वः प्रकृत्यैव[25] दश-भिः कुशलैः कर्मपथैः समन्वागतो भवति । कतमैर्दशभिर्यदुत । [26]स प्राणाति[27]पातात्[28]प्रति-विरतो[29] भवति । निहतदण्डो निहतशस्त्रो निहतवैरो[30] लज्जावान्दयाप[31]न्नः । सर्वप्राणिभूतेषु

1 र्भो MS. 2 सा T.L. 3 दः T.L. दा K. 4 द्भिः MS. द्विप्र T.L. 5 न्द्रः T.K.K'.L. 6 रि MS.
7 मि MS. 8 जा L.K'. 9 ति L. 10 या T.L.K'. 11 क्षतः K'.L. क्षितः MS. क्षः T. 12 प्राज्ञो T.L. प्राज्ञ K'. प्राज्ञा K. 13 त्त्व MS. 14 यायां T.K. यां K'. 15 द्वचा MS. द्व K.K'. 16 न्या T.
17 मृ K.K'. 18 ना MS.K.K'. 19 द T. 20 ति T. 21 बोधिसत्त्व+प्र T. 22 तत्र=ते T. 23 मि MS. 24 ता MS.K. 25 त्येव MS. 26 स—MS.K.K'. 27 नि MS. 28 त्प्र MS.K.K'. 29 तः खलु पुनर्भवति MS. 30 रो MS. 31 वन्तः MS.

हितसु[1]खानुकंपी[2] मैत्रचि[3]त्तः । स संकल्पैरपि प्राणि[4]विहिंसां[5] न करोति । कः[6] पुनर्वादः [7]परसत्त्वेषु सत्त्वसंज्ञि[8]नः [9]संचिंत्य[10]दौदारिककायविहे[11]टायाः । अदत्तादानात्प्रतिविर[12]तः खलु पुनर्भवति । स्वभोगसंतुष्टः परभोगानभिलाषी । [13]स परपरिगृहीतेभ्यो वस्तुभ्यः परपरिगृहीतसं[14]ज्ञी [15]स्तेयचित्तमुपस्थाप्यान्त[16]शः तृणपर्णमपि नादत्तमादाता भवति । कः पुनर्वादो ऽन्येभ्यो जीवितोपकरणेभ्यः । काममिथ्याचारात्प्रतिविरतः खलु पुनर्भवति । स्वदारसंतुष्टः परदारानभिलाषी[17] । स परपरिगृही[18]तासु स्त्रीषु परभार्यासु गोत्रध्वजधर्मरक्षितास्वभिध्यामपि नोत्पादयति । कः पुनर्वादो द्वीन्द्रियसमापत्त्यां[19] वा अनं[20]गविज्ञप्त्या वा । अ[21]नृतवचनात्प्रतिविरतः खलु पुनर्भवति । सत्यवादी भूतवादी कालवादी यथावादी तथाकारी । सो ऽन्तशः स्वप्नान्तरगतो ऽपि विनिधाय दृष्टिं क्षांतिं रुचिं [22]मतिं प्रेक्षां विसंवादनाभिप्रायो[23] [24]नानृतां वाचन्निश्चारयति । कः पुनर्वादः समन्वाहृत्य । पिशुनवचनात्प्रतिविरतः खलु पुनर्भवति । अभे[25]दाविहे[26]टाप्रतिपन्नः सत्त्वानां स ने[27]तः श्रु[28]त्वामुत्राख्याता भव[29]त्य[30]मीषां भेदाय । ना[31]मुतः श्रु[32]त्वेहाख्याता भवत्ये[33]षां भेदाय । न संहिता[34] भि[35]नत्ति न भिन्नानामनु[36]प्रदानं करोति । न व्य[37]ग्रारा[38]मो भवति । [39]न व्यग्ररतो[40] न व्यग्रकरणीं[41] वाचं भाषते । सद्भूतामसद्भू[42]तांम्वा । [43]परुषवचना[44]त्प्रतिविरतः खलु पुनर्भवति । [45]स येयं वागदे[46]शा कर्कशा [47]परुषा परक[48]टुका परा[49]भि[50]संजननी । अ[51]नक्षा अ[52]नक्षप्राग्[53]भारा [54]ग्राम्या पा[55]र्थ[56]ग्जनिकी ।

1 पा T. 2 पि T. 3 त्ता T. 4 ण T. 5 सान्न K. 6 क K. 7 पलसत्येषु MS. 8 गि MS. 9 संचिंत्यौदारिकया कायविहेथनय T. 10 त्यैदा K. 11 था K.K'. 12 तो MS. तः+स T. त K. 13 अनुकम्पकः+स T. 14 गी T. 15 स्ते MS. 16 शास्तृ MS.K.K'. 17 पा T. 18 तो T. 19 न्नो MS. 20 गं MS. त T. 21 मृ MS.T. 22 मतिं—T. 23 या K. 24 वा T.K. 25 द MS. 26 थना T. था K.K'. 27 नः T. 28 त्वा अमू T.MS. 29 ति । अमी T. 30 मा MS. 31 म T.K. 32 त्वा इत्या MS. 33 न्तेषां MS. ति । एषां T. 34 ता MS. 35 नंति MS. 36 प्रा MS. 37 वे T. 38 नामो MS. मारो K.K'. 39 न व्यग्ररतो—T. 40 तः MS.K.K'. 41 णी T. 42 तां वा T. 43 पुरुष MS. 44 त्प्र T. 45 स यं सम्वा MS. 46 द T.K.K'. 47 परुषा—K.K'. 48 तु T. ट K. 49 रो MS. 50 भिषं T. 51 न्व MS. च K. 52 न्वक्ष MS. नक्ष=थ T. 53 टहा MS. 54 ग्रो MS. 55 प्रार्थय MS. प्रार्थ K'. 56 न MS.

अनेला अकर्णसुखा[1] क्रोध[2]रोष[3]निश्चारिता । हृदयपरिदहनी [4]मन्युजननी मनःसंता[5]पकरी अप्रिया[6] अम[7]नापा अमनोज्ञा । स्वसंतानपरसंतानविनाशि[8]नी । तथारूपां वाचं [9]प्रहाय येयं वाक्स्निग्धा मृद्वी[10] मनोज्ञा [11]मधुरा प्रियक[12]रणी म[13]नापकरणी हितक[14]रणी नेला कर्ण[15]सुखा हृदयंगमा प्रेमणीया[16] पौरीवर्णवि[17]स्पष्टा विज्ञा[18]या [19]श्रवणीया [20]अमिश्रिता बहु[21]जनेष्टा बहुजन-कान्ता बहुजनप्रिया बहुजनमनापा[22] विज्ञापन्ना[23] सर्वसत्त्वहितसुखावहा समाहिता [24]मनोत्प्ला-वनकरी स्वसंतानपरसंतानप्रसादनकरी । तथारूपां वाचं नि[25]श्चारयति । [26]संभिन्नप्र[27]लापात्प्र-तिविरतः खलु पुनर्भवति । [28]सुपरिहार्यवचनः का[29]लवादी भूत[30]वादी अर्थवादी धर्मवादी न्यायवादी विनयवादी [31]सनिदानवतीवाचं भाषते । कालेन [32]सावदानां [33]स चान्तश इति-हासपूर्वकमपि वचनं परिहार्य परिहरति । कः पुनर्वादो वाग्विक्षेपेन । अनभिध्या[34]नः ख-लु पुनर्भवति । [35]स परस्वेषु परकामेषु परभोगेषु परचित्तोपकरणेषु परपरिगृ[36]हीतेषु [37]स्पृहा-मपि नोत्पादयति । किमिति यत्पर[38]षां तन्मम स्यादिति नाभिध्यामुत्पादयति । न प्रा-र्थयति[39] न प्रणिदधाति न लोभचित्तमुत्पादयति । [40]अव्यापन्नचित्तः खलु पुनर्भवति । [41]सर्वसत्त्वेषु मैत्रचित्तो हितचित्तो दयाचित्तः सुखचित्तः स्निग्धचित्तः सर्वजगदनुग्र[42]हचित्तः [43]सर्वसत्त्वहितानुकं[44]पाचित्तः स या[45]नीमानि क्रोधोपनाहखि[46]लमलव्यापादपरिदाहसंधुक्षितप्र-ति[47]घात्यानि तानि प्रहाय या[48]नीमानि हितोपसंहितानि । [49]मैत्र्युपसंहितानि सर्वसत्त्वहित-

1 पा T. 2 दोष T. नारोष K. 3 श्च T. 4 मन्युजननी—K.K′. 5 ष MS. 6 य MS. 7 न आपा T. नपा K. 8 श MS.T. 9 प K. प्रहायेय T.K. 10 पी MS. द्वी K′. 11 म 19 ला=अनेला T. 12 रणी=री K. 13 नो K. 14 रि K.K′. 15 मु MS. 16 यो T. 17 निस्प MS. 18 ज्ञे K′. 19 स्त्र MS. 20 अनि MS. 21 नन्ता MS. 22 था MS. 23 स्ता MS. त्त K. त्ता K′. 24 मन उत्प्ला-वनीकरी MS. मनउत्प्लामनकरी मनःप्रह्लादनकरी T. मनउत्सादनकरी । मनःप्रह्लादनकरी K.K′. 25 निश्चा-वयति K′. 26 सांतेन MS.K.K′. 27 रा T. 28 पर्पत्परि MS.K.K′. 29 र T. 30 व्य MS. 31 सं MS. 32 साप MS. सोप 33 सो न्तश K.K′. 34 लः MS. लुः T.K.K′. 35 स—R. 36 हेषु MS. 37 नाभिधामुत्पादयति T. 38 रैषां MS. 39 ते T.K′. ति+प्रार्थते K. 40 अध्य MS. सुव्या T. 41 स+स T. 42 हन K. 43 भूत T. 44 प K′. 45 मीमनैः MS. 46 षिलमर T. 47 पाद्यानि T. 48 नीमानां MS. नि मानि T. 49 मे MS.

सुखा[1]य । वितर्कितविचारितानि । तान्यनुवितर्कयिता भवति । सम्यग्दृष्टि[2]ः खलु पुनर्भवति । सम्यक्पथानुगतः कौतुकमंगलनानाप्रकारकु[3]शीलदृष्टिविगत[4]ः । ऋजु[5]दृष्टिरशठो[6]ऽमायावी बुद्धधर्मसंघनियताशयः । स इमां दशकुशलां कर्मपथां सतत[7]समि[8]तमनुरक्ष[9]न्नेवं चित्ता[10]शयम[11]भिनिर्हरति । या का चित्सत्त्वानामपायदुर्गतिविनिपातप्रज्ञ[12]प्तिः सर्वा[13]सां एषां दशानामकुशलानां कर्मपथानां समादानहेतोः । हन्ताहमात्मनैव सम्यक्प्रतिपत्ति[14]ष्ठितः परां सम्यक्प्रतिपत्तौ [15]स्थापयिष्यामि । तत्कस्य हेतो[16]ः । न स्थानमेतदनवकाशो यावदात्मा विप्रतिपत्ति[17]स्थितः परां सम्यक्प्रतिपत्तौ स्थाप[18]येन्नैतत्स्थानं विद्यत[19] इति । स एवं [20]प्रविचिनोति । एषां दशानामकुशलानां कर्मपथानां समादानहेतोर्निरयतिर्यग्योनियमलोकगतयः प्रज्ञायन्ते । दशानां पुनः कुशलानां कर्मपथानां समादानहेतोर्मनुष्योपपत्तिमादिकृत्वा यावद्भवाग्रमित्युपपत्तयः प्रज्ञायन्ते । तत[21] उत्तर[22] एत एव दशकुशलाः कर्मपथाः प्रज्ञाकारेण परि[23]भा[24]व्यमानाः प्रादेशिकचित्ततया त्रैधातुकोत्त्रस्तमानसतया महाकरुणाविकल[25]तया । परतः श्र[26]वानुगमेन [27]घोषानुगमेन च श्रावकयानं संवर्तयंति । त[28]त उत्तरतरं परिशोधिता [29]अपरप्रणेयतया [30]स्वयंभूत्वानुकूलतया । स्वयमभिसंबोधनतया परतो ऽपरिमार्गणतया । महाकरु[31]णोपायविकल[32]तया गंभीर[33]प्रत्ययानुबोधेन च प्रत्येकबुद्धयानं संवर्तयंति । तत उत्तरतरं[34] परिशोधिता विपुलाप्रमाणचित्ततया । [35]कृपाकरुणोपेततया उपायकौशल[36]संगृहीततया । सुनिबद्धमहाप्रणिधानतया सर्वसत्त्वापरित्यागतया बुद्धज्ञानविपुला[37]ध्यालम्बनत-

1 षा T. 2 ष्टि T. 3 श K. 4 तो T. 5 ज्र MS. 6 थो T.K.K'. 7 तं T. 8 मी T. 9 क्षेन्नेव T. 10 स MS. 11 वक्षंति MS. रक्षंति K. 12 ज्ञे T. 13 शां MS. 14 ष्टि—MS. स्थि R. 15 ष्टा T.K.K'. 16 तोर्न ष्टा T.K. 17 ष्ठितः T.K.K'. 18 पय MS. 19 पते MS. 20 प्रतिविनोति MS. T.K.K'. 21 त्त T.K'. 22 रे All MSS. 23 ता (भा) वा MS. 24 वय K.K'. 25 र T. 26 व्द्वा MS. 27 घो 4 न—MS. 28 तत्त गुरुतरं MS. 29 अ—K.K'. 30 स्त्र 7 या—T. 31 णा MS. 32 ल्प MS. रण T. 33 रेन्द्रं प्रत्य MS.K'. रेन्दं प्रत्य TK. 34 र MS. 35 कृपा—K. 36 स MS. 37 रा T.

या बोधिसत्त्वभूमि[1]परिशुद्ध्यै[2] पारमितापरिशुद्ध्यै[3] चर्याविपुलत्वाय संवर्तन्ते[4]। तत[5] उत्तरतरं [6]परिशोधिता[7]: सर्वाकारपरिशोधितत्वाद्यावद्दशबलत्वाय सर्वबुद्धधर्मसमुदागमाय संवर्तन्ते[8]। तस्मात्तर्ह्यस्माभिः [9]समाभिनिर्हारे सर्वाकारपरिशोधना[10]भिनिर्हार एव योगः करणीयः। स भूयस्या मात्रया एवं[11] प्रति[12]संशिक्षते। इमे [13]खलु पुनर्दशाकुशला[14]: कर्मपथा[15] अधिमात्रत्वा[16]दासेविता [17]बहुलीकृता निरयहेतुर्मध्यत्वात्तिर्यग्योनिहेतुर्मृदुत्वाद्यमलोकहेतुः। तत्र प्राणातिपातो[18] निरय[19]मुपनयति तिर्यग्योनिमुप[20]नयति यमलोकमुप[21]नयति। अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ[22] वि[23]पाकावभिनिवर्तयति। अल्पायुष्कतां[24] च बहुग्लान्यतां च। अदत्तादानं निरयमुपनयति तिर्यग्योनिमुप[25]नयति यमलोकमुप[26]नयति। [27]अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपाकावभिनिवर्तयति। [28]परीत्तभोगतां च[29] साधारणभोगतां च[30]। काममिथ्याचारो[31] निरयमुपनयति तिर्यग्योनिमुपनयति यमलोकमुपनयति। [32]अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपाकावभिनिवर्तयति। [33]अनाजानेयपरिवारतां च ससपत्नदारतां च। मृषावादो निरयमुपनयति तिर्यग्योनिमुपनयति यमलोकमुपनयति। [34]अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपाकावभिनिवर्तयति। अ[35]भ्याख्यानबहुलतां च [36]परैर्विसंवादन[37]तां च। पैशुन्यं निरयमुपनयति तिर्यग्योनिमुपनयति यमलोकमुपनयति। अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपाकावभिनिवर्तयति। [38]भिन्नपरिवारतां[39] च हीनपरिवारतां च। पारुष्यं[40] निरयमुपनयति तिर्यग्योनिमुपनयति यमलोकमुपनयति। अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपा-

1 मी MS. 2 द्धि MS. द्धौ K. 3 द्धि MS. 4 ते MS. 5 त्र MS. 6 सर्वाकार+प T. 7 षिता K'. धिता K. धितया यावद्दशबल MS. धितत्वात्। यावद्दशबल T. 8 ते MS. 9 समान MS.K.K'. समाने T. 10 नामभि T. 11 व MS. 12 सं–K. संक्षिते MS. संसिक्षेते T. 13 खलु–T. 14 लो MS. 15 था: K. 16 त्। असेविता T. दासेविता K.K'. 17 भाविता+ब T.K.K'. 18 ता MS. 19 मुपनयति–T. 20,21 नामयति T. 22 द्वा MS. 23 पा MS. 24 तां चा MS. ताञ्च K. 25,26 नामयति T. 27 सचेत्पु T. 28 परित्त T. परिवर्त MS. 29 चा MS.K.K'. 30 चा T. 31 र MS.K'. 32 सचेत्पु T. 33 आ T. 34 सचेत्पु T. अथ चेन्मनु K. 35 त्या MS. भ्यो T.K. 36 परविसं T. 37 न–MS.K.K'. 38 सं+भिन्न K., भिनु T. 39 तां च–MS.K.K'. 40 ष्य MS.K.

कावभिनिवर्तयति । अमना[1]पश्रवणतां च कलहवचनतां च । संभिन्नप्रला[2]पो[3] निरयमुप-
नयति तिर्यग्योनिमुपनयति यमलोकमुपनयति । [4]अथ चेत्पुनर्मनुष्येषू[5]पपद्यते द्वौ विपा-
कावभिनिवर्तयति । अनादेयवचनतां च अनिश्चितप्रतिभानतां च । अभिध्या निरयमुप-
नयति तिर्यग्योनिमुपनयति यमलोकमुपनयति । अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपा-
कावभिनिवर्तयति । असंतु[6]ष्टतां च महे[7]च्छतां च । व्यापादो निरयमुप[8]नयति तिर्यग्यो-
निमुपनयति यमलोकमुपनयति । अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपाका[9]वभिनिवर्तय-
ति । अहि[10]तैषितां च [11]परोत्पीडनतां च । मिथ्यादृष्टि[12]र्निरयमुप[13]नयति तिर्यग्योनिमुपनयति
यमलोकमुप[14]नयति । अथ चेत्पुनर्मनुष्येषूपपद्यते द्वौ विपाकावभिनिवर्तयति । कुदृष्टिप-
तितश्च भवति शठ[15]श्च मायावी च [16]भवति । एवं खलु महतो ऽपरिमाणस्य दुःखस्कंधस्ये[17]मे
दशाकुशलाः कर्मपथाः[18] समुदागमाय संवर्तन्ते[19] । हन्त[20] वयमिमां दशाकुशलान्कर्मपथा[21]-
न्विवर्ज्य धर्मारामरतिरता विह[22]रामः[23] । स[24] इमां दशा[25]कुशलान्कर्मपथान्प्र[26]हाय दशकुशलकर्म-
[27]पथप्रतिष्ठितः परांस्तेष्वेव प्रतिष्ठापयति । स भूयस्या मात्रया [28]सर्वसत्त्वानाम[29]न्तिके हित-
चि[30]त्ततामुत्पादयति । सुखचित्ततां [31]स्निग्धचित्ततां कृपाचित्ततां दयाचित्त[32]तां अनुग्रहचि-
त्ततां[33] आर[34]क्षचित्ततां [35]ममचित्तनां आ[36]चार्यचित्ततां शास्तृचित्ततामुत्पादयति । तस्यैवं
भवति । कुदृष्टिपतिता [37]वतेमे[38] सत्त्वा[39] [40]विषम[41]मतयो विषमाशया[42]ः । उत्पथगह[43]नचारिणस्ते
[44]ऽस्माभिर्भूतपथसम्यग्दृष्टिमार्गे[45] यथा[46]तथैव प्रतिष्ठापयितव्याः । भिन्नविगृहीत[47]चित्तविवा-

1 न आप T. 2 रा T. 3 प K'. 4 सचेत्पु T. 5 ष्वेत K'. 6 ष्टि T. 7 छ MS.K. 8 गच्छति K'. 9 म MS. 10 ते MS.K.K'. 11 परोत्प्री T. 12 नि MS.K.K'. 13 गच्छति K'. 14 नामयति T. 15 थ T.K. 16 भवति–T. 17 स्य । इमे T. 18 था K. 19 ते MS.K'. 20 न्ते T. 21 थां वि T. 22 ह–MS. 23 म MS.T. 24 सः MS.T. 25 श K. 26 विहाय T. न्विहाय K. 27 कुल MS. 28 सर्व–T. 29 मंतिक MS. 30 त्तमुत्पा MS. 31 मैत्र T. 32 तामनु K. 33 तां च K. 34 क्षा T.K.K'. 35 स K'. 36 च MS. 37 वे K'. 38 त K. 39 त्त्वो MS. 40 विषममतयो–K. 41 य T. म–MS. 42 या उत्प MS. 43 ण K'. 44 ऽ–T. 45 र्गेयाथातथ्ये प्रति R. 46 थे प्रति T. 47 चित्त–T.

[1]दोपपन्ना वतेमे सत्त्वा[2]ः सततसमितं[3] क्रोधोपनाहसंधु[4]क्षितास्ते [5]ऽस्माभिरनुत्तरे[6] महामैत्र्यु[7]-
पसंहारे प्रतिष्ठापयितव्याः । अतृप्ता वतेमे सत्त्वाः परवित्ताभिलाषिणो[8] विषमाजीवा[9]नुच-
रितास्ते ऽस्माभिः परिशु[10]द्धकायवाङ्मनस्कर्मा[11]न्ताजीविका[12]यां प्रतिष्ठापयितव्याः । रागद्वेष-
मोहत्रिनिदानानुगता वतेमे सत्त्वा विविधक्लेश[13]ज्वालाभिः सततसमितं प्रदीप्ता[14]ः । न च
ततो ऽत्यन्तनि[15]ःसरणोपायं परिमार्गयन्ति ते ऽस्माभि[16]ः सर्वक्लेशप्रशमे निरुपद्रवे[17] निर्वाणे
प्रतिष्ठापयितव्याः । महामोहतमस्तिमिरपटला[18]विद्यांधकारावृता वतेमे सत्त्वा म[19]हांधकारग-
हनानु[20]प्रविष्टा[21]ः प्रज्ञालोकसुदू[22]रीभूता[23]ः । महांधकारप्रस्कं[24]न्नाः कुदृष्टिकान्तारस[25]मवसृता[26]स्तेषा-
मस्माभिरना[27]वरण[28]प्रज्ञाचक्षुर्विशोधयितव्यं[29] । यथा सर्वधर्मयाथातथ्या[30]पर[31]प्र[32]णेयता[33] प्रति-
लभ्स्यन्ते । महासंसाराटवीकांतारमार्गप्रप[34]न्ना वतेमे सत्त्वाः । अयोगक्षेमिणो ऽनाश्वा-
सप्राप्ता महाप्रपा[35]तप[36]तिताः । निरयतिर्यग्योनियमलोकग[37]तिप्रपाताभिमुखाः । कुदृष्टिविषम-
जाला[38]नुपर्यवनद्धा । [39]मोहगह[40]नसंच्छन्ना । मिथ्यामार्गविपथप्रयाता । जा[41]त्यंधीभूताः ।
[42]परिणायकविकलाः । अनि[43]ःशरणे[44] निःसरण[45]संज्ञिनः । नमुचिपाशबद्धा विषयतस्करो-
[46]पगृहीता[47]ः कुशलपरिणायकविरहिता[48]ः । मारा[49]शयगहनानुप्रविष्टाः । बुद्धा[50]शयदूरीभूता[51]स्ते
ऽस्माभिरे[52]वंविधात्[53]संसाराटवीकान्तारदुर्गा[54]दुत्तारयितव्याः । अभयपुरे च सर्वज्ञ[55]ज्ञाननगरे
निरुपद्रवे निरुपतापे प्रतिष्ठापयितव्याः । महौघो[56]र्म्यामर्थैर्निमग्ना वतेमे सत्त्वाः कामभवावि[57]-

1 दा T. 2 त्त्वा T.K. 3 त MS.K.K'. 4 ध्र MS.K.T 5 ऽ—K'. 6 र T. 7 त्र्यो T. 8 णौ T. 9 वा+जीवा MS.K'. 10 द्धा MS. 11 र्मतां T. 12 कया MS.K. 13 शाग्निज्वालाभिः T. श=शे K. 14 प्ताः K. 15 निस्स MS.K'. निःश T. 16 भि K. 17 मे M.S. 18 लांधकारा MS.K.K'. 19 महामोहां MS.K.K'. 20 नु—MS.T. 21 ष्टा T. 22 दु K. 23 ता महां MS. 24 कंधाः MS. K.K'. 25 स—K. 26 ताः । ते T. 27 णा T. 28 णं MS.K.K'. 29 व्य T. 30 थ्य MS.K'. 31 रा MS.K.K'. 32 ण R. 33 तां+च T. 34 स K. 35 तं MS. 36 रि MS. 37 गति—T. 38 नुप्राप्ताः T. 39 महा MS. 40 णे T. 41 अन्धी T. 42 अपरि MS.K.K'.T. 43 निस्स T.K. 44 ण R. 45 दर्शिनो T. 46 प+रि T. 47 तो । T.K.K'. 48 ता MS. तो T. 49 लाश T. राश्र MS.K.K'. 50 श्र MS.K.K'. 51 ताः । तस्मा T. ते स्मा K.K'. 52 वे MS. व T.K. 53 सं T. 54 उत्ता MS. 55 तामहानगरे T. 56 र्म्यासधैर्यनिमाना MS.K. र्म्यामधैर्यानिमग्ना K'. पनिमग्ना T. 57 विद्या—MS.

द्यादृष्ट्यो[1]घसमवसृता[2]ः संसारस्रो[3]ता[4]नुवाहिनस्तृ[5]ष्णानदीप्रपन्ना महावेगग्रा[6]प्ताः । अविलोकनसमर्थाः कामव्यापादविहिंसावितर्कप्रता[7]नानुचरिताः सत्कायदृष्ट्यु[8]दकराक्षस[9]गृहीताः कामग[10]हनावर्तानुप्रविष्टाः । [11]नंदीरागम[12]ध्यसंछ[13]न्ना अस्मि[14]मानस्थ[15]लोत्सन्ना दौःशील्यविषमाचारान्तःपू[16]तीभूताः षडायतनग्रामभयतीरमनुच्चलिताः कुशलसंतार[17]कविरहिता अनाथा अपरायणा[18] अ[19]शरणास्ते ऽस्माभिर्महाकरुणाकुशलमूलबलेनोद्धृत्य निरुपद्रवे ऽरजसि क्षेमे शिवे ऽभये सर्वभय[20]त्रासा[21]पगते सर्वज्ञतारत्नद्वीपे प्रतिष्ठापयितव्याः । रुद्धा वतेमे सत्त्वा बहु[22]दुःखदौर्मनस्यो[23]पायासबहुले । अनुनयप्रतिघप्रियाप्रियवि[24]निबंधने सशोकपरिदेवानुचरिते तृष्णा[25]निगड[26]बंधने मायाशाठ्या[27]विद्यागहनसंछन्ने त्रैधातुकचारके[28] ते ऽस्माभिः सर्वत्रैधातुकवि[29]वेके । अभयपुरे सर्वदुःखोपश[30]मे अनावरणे[31] निर्वाणे प्रतिष्ठापयितव्याः । आत्मात्मीयाभि[32]निविष्टा वतेमे सत्त्वाः स्कंधालयानुच्च[33]लिताश्चतुर्विपर्या[34]सानुप्रयाताः । षडायतनशून्यग्रामसन्निश्रिताश्चतुर्महाभूतो[35]रगाभि[36]द्रुताः । स्कंधवधकतस्कराभि[37]प्रघातिताः । अपरिमाणदुःखप्रतिसंवेदिन[38]स्ते ऽस्माभि[39]ः परम[40]सुखे सर्वनिकेतविगमे प्रतिष्ठापयितव्याः । यदुत सर्वावरणप्रहाणा[41]निर्वा[42]णे हीन[43]लीन[44]दीनाधि[45]मुक्तिका वतेमे सत्त्वा[46] अग्रसर्व[47]ज्ञज्ञानचित्तविकलाः । [48]संति नि[49]ःशरणे महायाने श्रावकप्रत्येकबुद्धयान[50]मतयस्ते ऽस्माभिरुदार[51]बुद्धधर्म[52]मतिविपुलाध्यालम्बे[53]न [54]सर्वज्ञज्ञानलोचनतया अनुत्तरे महायाने प्रतिष्ठापयितव्याः ॥

1 ष्टौ MS.T. 2 ता T. 3 श्रो T. 4 तो MS.K'.T. 5 ष्टा MS. 6 ग्रस्ता T. 7 ताना=भा T. 8 ष्टु T. 9 श T. 10 ग्र MS. 11 न T 12 ग T. 13 युक्ताः। T. 14 न्मा MS. 15 त्वो MS. 16 री T. 17 न T. 18 णो MS. 19 अ 3 स्त=आयतनग्रामानुच्चरिताः कुशलसंभारविरहितास्ते T. 20 ये MS. 21 शा T. 22 दुःख–MS.K.K'. 23 स्यौ T. 24 निबद्धे T. 25 श्रा MS. 26 त All MSS. 27 साथ्य T. 28 क T. 29 विवेके–MS.K. 30 स T. 31 ण R. 32 ति T. 33 च T. 34 र्ज्यासा T. 35 तौ T. 36 वि T. 37 भिप्रघापिताः MS. भिघातिकाः T. 38 नः ते T. 39 भिर्वा परम MS.K.K'. 40 मे MS.K.K'. 41 णे T. 42 निर्वाणे–K. 43 री T. 44 ही MS.K'. 45 मुक्ता T. 46 त्वाः T. 47 संज्ञाज्ञान MS.K.K'. 48 सत्व K. 49 निस्स T.K. 50 ने मजयस्ते MS.K.K'. नावतीर्णासततये ते T. नावतीर्णमतयस्ते R. 51 रे MS.K.K'. 52 ग T. 53 म्बने MS. 54 सर्व 15 ने–MS.K.K'.

इति हि भवंतो जिनपुत्रा एवं शीलबला[1]धानानुगतस्य बोधिसत्त्वस्य कृपाकरुणामैत्र्य[2]-भिनिर्हारकुशलस्य सर्वसत्त्वान[3]धीष्टकल्याण[4]मित्रस्य अपरित्यक्तसर्वसत्त्वस्य क्रिया[5]क्रियाभि-निर्हारकुशलस्य विमलायां बोधिसत्त्वभूमौ प्रतिष्ठितस्य बहवो बुद्धा आभासमागच्छंति । औदारिकदर्शनेन प्रणिधानबलेन च । [6]बहूनि बुद्धशतानि बहूनि बुद्धसहस्राणि बहूनि बु-द्धशतसहस्राणि बहूनि बुद्धनियुतशतसहस्राणि [7]बह्वो बुद्धकोट्यो बहूनि बुद्धकोटीशतानि बहूनि बुद्धकोटीसहस्राणि बहूनि बुद्धकोटीशतसहस्राणि बहूनि बुद्धकोटीनि[8]युतशतस-हस्राणि आभासमागच्छन्ति । औदारिकदर्शनेन च[9] प्रणिधानबलेन च । स [10]तांस्तथागता-नर्हतः[11] सम्यक्संबुद्धान्दृष्ट्वो[12]दाराध्याशयतया सत्करोति गुरुकरोति मानयति पूजयति । चीवरपिण्डपातशयना[13]सनग्लानप्रत्ययभैषज्यपरिष्कारै[14]श्च प्रतिपादयति । बोधिसत्त्वसुखो-पधानं चोपसंहरति संघगणं[15]संमान[16]नां च करोति । तानि कुशलमूलानि अनुत्तरायां[17] स-म्यक्संबोधौ परिणामयति । तांश्च तथागतानर्हतः[18] सम्यक्संबुद्धान्पर्युपास्ते । तेषां च[19] त-थागताना[20]मर्हतां सम्यक्संबुद्धानां सकाशेभ्यो[21] गौरवेन[22] इ[23]मानेव दशकुशलान्कर्मपथान्प-रिगृह्णाति । यथा परिगृहीतां[24]श्च[25] [26]नान्तरा प्रणाशयति । सो ऽनेकानि कल्पानि अनेकानि कल्पशतानि अनेकानि कल्पसहस्राणि अनेकानि कल्पशतसहस्राणि अनेकाः[27] कल्पकोटी[28] अनेकानि कल्पकोटीशतानि अनेकानि कल्पकोटीसहस्राणि अनेकानि कल्पको[29]टीशतस-हस्राणि अनेकानि कल्पकोटीनि[30]युतशतसहस्राणि । मात्सर्य[31]दौः[32]शील्यमलापनीततया त्या-गशीलविशुद्धौ समुदागच्छ[33]ति ॥

1 ध्यातानु MS. ध्यानानु K.K'. 2 त्य T. त्ता K. 3 नवधीष्व MS. 4 न T. 5 क्रिया—T.K. 6 बहुबुद्ध MS. 7 वह्ये T. वहूनि K. वह्वयो K'. 8 न K'. 9 च—T. 10 तां तथा MS. 11 त T. 12 ष्ट्योदा MS. ष्ट्रा उदा T. 13 श K'. 14 स्का T.K. 15 णं T. 16 नयति तां T 17 या K. 18 तः MS. त T. 19 च—T. 20 नर्हत T. 21 भ्यः । K. 22 ण K'. 23 इमांन्येव T. 24 ह्री T. 25 श्च—K. 26 त्वांतरां MS. नांतरां K'. नान्तशः K. 27 कः T. 28 ट्यः T. टीः MS. 29 टि T. 30 न K'. 31 त्स T. 32 भ T. 33 छ MS.

तद्यथापि[1] नाम भवंतो जिनपुत्रा[2]स्तदेव जातरूपं काशीसं[3]प्रक्षिप्तं[4] भूयस्या मात्रया सर्वम[5]-लापगतं[6] भवति। एवमेव भवंतो जिनपुत्रा बोधिसत्त्वो [7]ऽस्यां विमलायां बोधिसत्त्वभूमौ स्थितो ऽने[8]कानि [9]कल्पा[10]नि यावदनेकानि कल्पकोटीनियुतशतसहस्राणि[11] मात्सर्यदौ[12]ःशील्य-मलापनीततया त्यागशीलविशुद्धौ समुदागच्छति। तस्य चतुर्भ्यः संग्रहवस्तुभ्यः प्रिय-वद्यतातिरिक्ततमा भवति। दशभ्यः पारमिताभ्यः शीलपारमितातिरिक्ततमा[13] भवति। न च परिशेषासु न समुदागच्छति। यथाबलं यथाभजमानमियं भवंतो जिनपुत्रा बो-धिसत्त्वस्य विमला नाम द्वितीया बोधिसत्त्वभूमिः[14] समासनिर्देशतः। यस्यां प्रतिष्ठितो बो-धिसत्त्वो[15] भूयस्त्वेन राजा भवति चक्रवर्ती। चतुर्द्वीपाधिपति[16]र्धर्माधिपत्यप्रतिलब्धः। सप्तरत्नसमन्वा[17]गतः कृ[18]ती प्रभुः। सत्त्वानां दौःशील्यमलविनिवर्तनाय कुशलैः[19] सत्त्वान्दश[20]-कुशलेषु कर्मपथे[21]षु प्रतिष्ठापयितुं[22]। यच्च किं चित्कर्मा[23]रभते दानेन वा प्रियवद्यतया वा अर्थक्रियया वा [24]समानार्थतया वा। तत्सर्वमविरहितं बुद्धमनसिकारैर्धर्ममनसिकारैः संघ-मनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्यामनसिकारैः। पारमितामनसिकारैर्भूमिमन-सिकारैर्बलमनसिकारैः। वैशारद्यमनसिकारैरावेणिकबुद्धधर्ममनसिकारैः। यावत्सर्वाकारव-रोपेतसर्वज्ञज्ञानमनसिकारैः। किमिति सर्वसत्त्वानामग्र्यो[25] भवेयं श्रेष्ठो[26] ज्येष्ठो[27] वरः प्रवर उत्तमो ऽनुत्तमो[28] नायको विनायकः[29] परिनायको यावत्सर्वज्ञज्ञानप्रतिश[30]रणो भवेयं[31]। आ-कां[32]क्षंश्च तथारूपं वीर्यमा[33]रभते [34]यथारूपेण वीर्या[35]रंभेन सर्वगृहकलत्रभोगा[36]नुत्सृज्य तथाग-

1 पि—MS.K.K′. 2 स्तेदेव T. 3 श K′. 4 प्त T.K. 5 मा MS. 6 त T. 7 ऽ—K′. 8 कां T. 9 कल्पानि—K. 10 ल्पान्यावदेव तानि T. 11 नि T. 12 दौः K. 13 या K. 14 मीः MS. 15 त्त्व MS.K′. 16 त्या धर्म K. तिः धर्म K′. 17 न्वितः T. 18 पी MS. पी K.K′. 19 ल MS. 20 श+सु R. 21 षु—K. 22 तु MS. 23 ल T. 24 सं K′. 25 or ग्रो? 26 ष्ठो+भवेयं T. 27 ष्ठः K. 28 मः T. 29 को K. 30 स K′. 31 यमिति T. 32 क्ष T. 33 लभते यथा T. रभेता MS. रभेत। तथा K. 34 त MS.K.K′. 35 लंभेण T. 36 गानवसृ T.

तच्छासने [1]प्रव्रजति । प्रव्रजितश्च सन्नेकक्षणलवमु[2]हूर्तेन समाधिसहस्रं प्रतिल[3]भते बुद्धसहस्रं [4]चं पश्यति । तेषां [5]चाधिष्ठानं संजानीते । लोकधातुसहस्रं च कम्पयति । क्षेत्रसहस्रं चा-[6]क्रमति । लोकधातुसहस्रं चावभासयति । सत्त्वसहस्रं च परिपाचयति । कल्पसहस्रं च तिष्ठति । कल्पसहस्रं च पूर्वातापरा[7]न्ततः प्रवि[8]शति । धर्ममुखसहस्रं च प्रवि[9]चिनोति । कायसहस्रं चादर्शयति कायं [10]कायं च बोधिसत्त्वसहस्रपरिवारमादर्शयति । तत उत्तरे[11] प्रणिधानबलिका बोधिसत्त्वाः प्रणिधानवैशेषिकतया विकुर्वंति । येषां न सुक[12]रा संख्या कर्तुं । कायस्य वा प्रभाया वा ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्याया वा [13]व्यूहस्य वा अधिष्ठानस्य वा अधिमुक्तेर्वा अभिसंस्काराणां वा । याव[14]देतावद्भिरपि कल्प-कोटी[15]नियुतशतसहस्रैरिति ॥

अथ खलु वज्रगर्भो बोधिसत्त्व [16]एतमेव भूम्यर्थं प्ररूपयमा[17]नस्तस्यां वेलायामि[18]मां गाथा [19]अभाषत ॥

[20]ते मार्दवार्जवमृ[21]दू[22]कमनीयचित्ताः
कल्याणआशयदमाशयताभ्युपेताः ।
संसर्गपेक्षविगताश्च उदा[23]र[24]बुद्धी
मा[25]हात्म्यआशयवि[26]दू द्वि[27]तियाक्रमंति ॥ १ ॥
अवस्थिता गुणध[28]राः कुशलोपुपेताः
प्राणाति[29]पातविगता अविहिंसचित्ताः ।

1 प्र 7 श्च=वर्जितः T. 2 दू MS. 3 भेत MS. भते पद्यते च T. 4 च—MS. 5 वा MS. 6 क्रा T. 7 न्त MS. न्तः T.K. 8 स T. 9 ति T. 10 कायं—K. 11 र MS.K.K'. 12 ला T. 13 अ MS. 14 देव ताव T. 15 न K'. 16 एतस्मिमे K. 17 णम्त K. नं त T. 18 मां MS.K.T. 19 म MS. 20 Metre: वसंततिलका, त K'. 21 दु MS.K. 22 मंणीय RS. वां° K. 23 रे T. 24 द्धि MS. 25 ह MS. 26 दु K.M. 27 ती T.K.K'.L. 28 रा K. राः+स T.L. 29 नि MS.K.K'.

[1]आदत्तदान[2]प[3]गताः [4]परदारतां च
सत्यान्विता अपिशुनाः [5]परुषाप्रहा[6]णाः ॥ २ ॥
परभोगभि[7]ध्यविगता विदु मैत्रचित्ताः
सम्यक्पथे उपगताः अ[8]शठु[9]ज्ञकाश्च ।
निर्माणकायगह[10]नाश्च सुपेशलाश्च
[11]वंदन्ति शास्तु[12] चरणं[13] सद [14]अप्रमत्ताः ॥ ३ ॥
दुःखानि यानि निरये[15] तथ[16] [17]तीर्य[18]योनौ
यमशासने[19]ज्वलित[20]आश्रयनित्युपेताः ।
सर्वे ति[21] पापपतिताकुशलाः प्रभोंति
हन्तौ[22] विवर्जित[23] उपेमहि सत्यधर्मे ॥ ४ ॥
आदौ[24] च कृत्व मनुजानुपपत्तिमिष्टं[25]
यावद्भवाग्रमर[26]णाशय[27]धानुशि[28]क्षं ।
प्रत्येकयानमथ श्रावकबुद्धयानं[29]
सर्वं[30] इतो दशभि[31] शुक्ल[32]पथैः[33] प्रभूतं[34] ॥ ५ ॥
एवं विदित्व[35] सततं विदु [36]अप्रमत्ताः
[37]शीलेपु संस्थित[38] परानपि स्थापयंति ।

1 अदत्तदानापगताः परदारापगताश्च MS. 2 नादत्तमादाता भवति Prose, 不與不取 Śdh. 或 अदत्तादानात्प्रतिविरत Prose, 離不與取 Śdh. 3 व T.L. 4 परदारानभिलापी Prose, 離欲邪行 Śdh. 5 पुरुष MS.K.K'. 6 ही K. 7 विध्या MS.K. 8 अशथुज्ञताश्च T.L. 9 ज्ञाकाश्च K. 10 णा T.L. 11 व MS. रक्षन्ति RS. 12 स्तृ MS. स्त T.L. 13 ण K. 14 अ—T.L. 15 य T.L. 16 था MS. 17 ति T.K.K'.L. 18 ग्यो MS.T.K.K'.L. 19 ने जो T. 20 मा MS.K.K'.T. 21 भि or धि? 22 र्षा K. 23 र्जेयि K. र्जिय RS. 24 दो T.K.L. 25 निष्टां MS. मिष्टा T.L. 26 ण RS. 27 ध्यानु MS.K.K'. ज्ञानु Pali. 28 शो MS.K'.T. 29 ज्ञा MS. 30 र्वे K. र्वं MS. 31 भिः All MSS. 32 क्ले T. 33 थै T.L. 34 ते K. 35 त T. 36 अ L. 37 शि T.L. 38 तं T.L. तः K.K'.

भूयोत्तरे[1] करुणआशयताभ्युपेताः
सत्त्वां[2]न्विदित्व दु[3]खितां कृप संजनें[4]ति ॥ ६ ॥
हंता[5] [6]विदृष्टिपतिता इमि[7] बा[8]लबुद्धी[9]
क्रो[10]धोपनाह[11]द्रुतचित्तविवादप्राप्ताः ।
सततं अतृ[12]प्त विषये[13] भुयु प्रार्थयन्ति
त्रिनिदानसत्त्व परिमो[14]चयितव्य एते ॥ ७ ॥
महअंधकारतमसावृतमोह[15]छन्नाः
कांतारमार्गि[16] पतिता[17] महदृष्टिजा[18]ले ।
संसारपंजरगता[19] [20]रिपु धर्षयंति
मोक्षाम्यहं नमुचिपंज[21]र[22]मध्य[23]प्राप्तान् ॥ ८ ॥
क्ले[24]शोर्मिभिर्ह्रियत [25]ओघचतुर्निमग्ना[26]ः
त्रैधातुके[27] [28]दुःखशतैः परिपीड्यमानाः ।
स्कंधालयाभ्युपगता[29]वृतआत्मसंज्ञा[30]ः
ते[31]षार्थि युज्यमि अहं[32] [33]दुःखमोचनार्थं[34] ॥ ९ ॥
अवसृ[35]ज्य श्रेष्ठ[36]प्रवरं इम बुद्धया[37]नं
स[38]त्येव निःसरणि[39] हीनमतिं[40] जने[41]न्ति ।

1 रेषु T.L. 2 त्त्वं वि T.L. 3 दुः MS. 4 नं MS.K.K'. 5 भो MS. तो RS. हो K. 6 or कु? 7 म MS. 8 र T. 9 द्धिः MS.K. 10 ध्य MS. 11 हनद्रु MS. 12 प्तः K.,+तु MS. 13 यै T.L. 14 चितव्य T.L. 15 च्छ RS. 16 र्गं K. र्मिं T. 17 ताः K. 18 ज MS.K. 19 तो MS. 20 ऋपु T.K'.L. रिपु K. 21 ल T. 22 धे T. ध्ये L. 23 प्ता T.K'. प्त MS. प्तान K. 24 शे T.L. शा K. 25 दोघ T.L. 26 ग्नाः K. 27 क T.K.L. 28 or दु? 29 वत K.K'. 30 ज्ञा MS.T.K'. 31 षां MS.T.K'. 32 ह MS. 33 or दु? 34 र्थं K. 35 ष्ट K'. 36 च MS. 37 जा (=ज्ञा) T.L. 38 त्यै T.L. 39 ण MS. णे K. 40 ति T.L. 41 नन्ति MS.

स्थापेमि तां विमलज्ञानि[1] तथागतानां
वीर्यारं[2]भन्ति अतुलं विदु बोधिहेतोः ॥ १० ॥
अवस्थिता गुणश[3]तोपचि[4]ता महर्षी[5]
पश्यन्ति [6]नैकसुगतानपि पूजयन्ति ।
तेषां शुभं भुयु उत[7]प्यति कल्पकोट्यां
का[8]शीस कांचनवरं च यथा निक्षिप्तं[9] ॥ ११ ॥
अवस्थिता जिनसुता नृपचक्रवर्ती
भूत्वा प्रणेन्ति दशभिः कुशलेभि सत्त्वान् ।
यश्चै[10]व किं[11] चि शुभसंचयं[12] संचिनं[13]ति
त्राता भवेम जगतो[14] दशभिर्बलाढ्याः[15] ॥ १२ ॥
आ[16]कांक्षमाणं[17] विजहित्व च राज[18]भोगान्
प्रव्रज्य शासन[19]वरे[20] उ[21]पगम्य धीराः ।
वीर्यान्वि[22]तालभिय श्रेष्ठवरं[23] समाधिं[24]
बुद्धा[25]सहस्रपरिपूर्ण क्षणे दृशन्ति ॥ १३ ॥
एवंविधां गुणनयां भुयु ऋ[26]ध्यनेकां
[27]आदर्शयन्ति वृष[28]भी स्थित अत्रभूमौ ।
अत उत्तरि प्रणिधिज्ञानबलाभ्युपेतौ[29]

1 न MS.K.K'. 2 ल T. 3 स T. 4 रि T. वि MS.K. 5 र्षि T. र्षिः K. 6 ने T.L. 7 त्त MS.K.K'.T.B. 8 कांसि T.L. 9 प्त K. 10 श्चै K. 11 सं चित्सु MS. 12 यं MS. 13 वि MS. 14 ता T.L. 15 ढ्यैः RS. 16 का T.L. 17 णा MS. 18 भा T.L. 19 (ने, or नि ?) RS. 20 ले T.L. 21 न्द्र MS. 22 न्धि T.L. 23 ल T. र MS. 24 धि MS. 25 न्द्र MS.K.K'. 26 आस्र-नेका MS. अन्य नेका RS. 神通力 Sdh. 27 अ T. 28 भि T. 29 ताः MS.

नैका[1]विकुर्वितविधैर्विनयन्ति सत्त्वान् ॥ १४ ॥

[2]इत्येषां[3] द्वि[4]तिया भूमिर्निर्दिष्टा सुगतात्मजाः ।

सर्वलोकहितै[5]षिन बोधिसत्त्वानमुत्तमा ॥ १५ ॥

इति विमला नाम द्वितीया बोधिसत्त्वभूमिः ॥ २ ॥

---

[6]एवं श्रुणित्वा चरि[7]भूमिमुत्तमां [8]बोधिसत्त्वविषये अचिंतियान् ।

हर्षिता जिनसुताः सगौरवाः पुष्पमेघ नभतः प्रमुंचिषुः[9] ॥ १ ॥

साधु साधु गिरिसारसाकया देशितो विदु[10]रशीलसम्वरः ।

सर्वसत्त्वकरुणाय[11]आशयो[12] भूमिश्रे[13]ष्ठ[14]द्वि[15]तियायगोचरः ॥ २ ॥

[16]भूत[17]तत्त्ववितथं[18] [19]अनन्यथं बोधिसत्त्वचरणं मनोरमं[20] ।

सर्वलोकहित[21]सौ[22]ख्य[23]चिन्तुना देशितं तु परमं[24]प्रभास्वरं ॥ ३ ॥

भू[25]यु भू[26]यु नरदेवपूजितां[27] भूमि[28]श्रेष्ठतृ[29]तियामुदाहर[30] ।

धर्मज्ञानक्रि[31]य[32]युक्तिसूचनां[33] यादृशो [34]भवनुदारगोचरः ॥ ४ ॥

दानशीलचरणं महर्षिणां[35] क्षांतिवी[36]र्यशमप्र[37]ज्ञुपायतां ।

मैत्रश्रेष्ठकरुणायमार्गणं[38] भाष त्वं[39] जिनच[40]रीविशो[41]धनं ॥ ५ ॥

1 क MS.K. 2 Metre: श्लोक 3 पां L. 4 ती MS.K.K'.T. 5 ते T.L. 6 तृतीया भूमिः, Metre: इन्द्रवंशा (एव शुत्व चरि भूमिमुत्तमां, रथोद्धता) 7 बोधि MS.K.K'.T. 8 Metre: रथोद्धता 9 षु MS. K'.T. 10 न RS. 11 अ T.L. 12 यौ T.L. 13 ष्ठा K. 14 or दु? 15 ती All MSS. 16 菩薩微妙行•眞實無有異 Kj. Bh. 是諸菩薩微妙行•眞實無異無差別 Śn. Śdh. 17 or अ? 18 था MS 19 म MS.K.K'. 20 थं MS. 21 ता MS. 22 ख्यं T.L. 23 चित्तना MS. चिंतना K'. (चित्तया or चिन्तया?) RS. 24 or मा? 25, 26 य MS. 27 तं MS. तां T.L. 28 मिशेष T.L. मीश्रेष्ठ K. 29 ती All MSS. 30 रः T.L. 31 या L. 32 मु L. 33 नो T.L. य RS. 34 नुभवतुदारगोचरः T.L. उभव तादृ (शो) गोचरः RS. 35 णा T.K. 36 स MS. 37 ज्ञ L. 38 णे K'. 39 ध्वं RS. or तं? 40 रि T. 41 षन् T. धं K'.

[1]विमुक्तिचन्द्रः[2] उवाच[3] वज्रगर्भं[4] विशारदं[5] ।
तृतीयासंक्रमन्तानामाशयं[6] भण सूरन[7] ॥ ६ ॥

वज्रगर्भो[8] बोधिसत्त्व आह ॥

यो[9] ऽयं भवंतो जिनपुत्रा बोधिसत्त्वो[10] द्वितीयायां बोधिसत्त्वभूमौ सुपरिशोधिताध्याशयस्तृतीयां[11] बोधिसत्त्वभूमिमाक्रमति[12] । स दशभिश्चित्ताशयमनस्कारैराक्रमति । कतमैर्दशभिर्यदुत । शुद्धचित्ताशयमनस्कारेण च । स्थिरचित्ताशयमनस्कारेण च । निर्विंत्चित्ताशयमनस्कारेण च । विरागचित्ताशयमनस्कारेण च । अविवर्त[13]चित्ताशयमनस्कारेण च । दृढचित्ताशयमनस्कारेण च । उत्तप्तचित्ताशयमनस्कारेण च । अतृप्तचित्ताशयमनस्कारेण च । उदारचित्ताशयमनस्कारेण च । महा[14]त्म्य[15]चित्ताशयमनस्कारेण च । एभिर्दशभिश्चित्ताशयमनस्कारैराक्रमति[16] ॥

स खलु पुनर्भवंतो जिनपुत्रा बोधिसत्त्वस्तृतीयायां बोधिसत्त्वभूमौ स्थितो[17] ऽनित्यतां च सर्वसंस्कारगतस्य यथाभूतं प्रत्यवेक्षते । दुःखतां[18] च अशुभतां च अनाश्वासिकतां[19] च । विप्रलोपतां[20] च अचिरस्थितकतां च । क्षणिकोत्पादनिरोधतां च पूर्वान्तासंभवतां च । अपरान्तासं[21]क्रांतितां[22] च प्रत्युत्पन्नाव्यवस्थितितां[23] च सर्वसंस्कारगतस्य प्रत्यवेक्षते[24] । स एवंभूतं सर्वसंस्कारगतं संपश्यन्ननभिसरन्निराक्रन्दं[25][26] । सशोकं[27] सपरिदेवं सोपायासं[28] । प्रियाप्रिय[29]विनिबद्धं[30] दुःखदौर्मनस्योपायासबहुलं । असन्निचयभूतं रागद्वेषमोहाग्निसंप्रदीप्तं[31] । अनेकव्याधिविवर्धितं[32] चात्मभावं[33] संपश्यन्[34] । भूयस्या मात्रया सर्वसंस्कारेभ्यश्चित्तमु[35]च्चालय[36]-

1 Metre : श्लोक 2 द्रं MS. द्र T. 3 पुनरुवाच All MSS. 4 र्भं K′. 5 दं ति MS.K′. 6 मता MS.K′. मताना T.K. 7 सुरत MS. सूरत K′. शूरतः T. 8 र्भ K. 9 सा K. 10 त्त्वा MS. 11 तीयायां MS.K.K′. 12 क्रा T. 13 वि+नि R. 14 मा K′. 15 त्म MS.T. 16 क्रा T. 17 तः सन्ननित्यतां T. 18 ता MS. 19 स्वामि MS. 20 पु MS. 21 न्त MS. 22 क्रामतां T. 23 अ MS.K.K′. 24 तो K. 25 भि+सं MS. 26 क्रान्तं MS. ष्क्रांदं K′. 27 सं MS.K.K′. 28 सां MS. स K. 29 य T. 30 द्ध T. 31 प्रजोरितं T. 32 विं MS. 33 त्म+सं MS. 34 सं–MS. 35 चि T. 36 च्च T.

ति । तथागतज्ञाने [1]च संप्रेषयति । [2]स तथागतज्ञानस्याचिंत्यतां च समनुपश्यति । अतुल्यतां चा[3]प्रमे[4]यतां च । दुरासदतां चा[5]संस्पृ[6]ष्टतां च । निरुपद्रवतां च निरुपायासतां च । अभ[7]यपुरगम[8]नीयतां चापुनरावृत्तितां च । बहुजनपरित्राणतां च समनुपश्यति । स एवमप्रमा[9]णतां च तथागतज्ञान[10]स्य समनुपश्य[11]न् । एवं ब[12]हूपद्रवतां च सर्वसंस्कारगतस्य व्युपपरीक्षमाणो भूयस्या मात्रया सत्त्वा[13]नामन्तिके दशचित्ताशयानुपस्थापयति । कतमान्दश यदुत । अनाथा[14]प्रतिशरणचित्ताशयतां च । नित्य[15]दरिद्रचित्ताशयतां च । रागद्वेषमोहाग्निसं[16]प्रदीप्तचित्ताशयतां च । भवचा[17]रकावरुद्धचित्ताशयतां च[18] । सततसमित[19]क्लेशगहनावृत्ति[20]प्रसुप्तचित्ताशयतां च । अवि[21]लोकनसमर्थचित्ताशयतां[22] च । कुशलधर्मछन्दरहितचित्ताशयतां च । [23]बुद्धधर्मछन्दरहितचित्ताशयतां च । बुद्धधर्मप्रमुषि[24]तचित्ताशयतां च । संसारस्रो[25]तानु[26]वाहिचित्ताशयतां च । मोक्षोपायप्रणष्टचित्ताशयतां च । इमां दशचित्ताशयानुपस्थापयति । स एवं[27] बहूपद्रवं सत्त्वधातुं समनुपश्य[28]न्नेवं वीर्यमा[29]रभते । मयैवैते सत्त्वाः परित्रातव्याः परिमोचयितव्याः । [30]परिशोधयितव्या उत्तारयितव्या [31]निवेशयितव्याः । प्रतिष्ठापयितव्याः परि[32]तोषयितव्याः । संरोपयितव्याः [33]परिनिर्वापयितव्या[34] इति । स एवं निर्विदनुगतश्च सर्वसंस्कारगत्यां[35] । अपेक्षानुग[36]तश्च सर्वसत्त्वेषु । अनु[37]शंसानुगतश्च सर्वज्ञज्ञाने । [38]तथागतज्ञाने[39] प्रतिशरणः । सर्वसत्त्व[40]परित्राणाया[41]भियुक्तः । एवं व्युप[42]री[43]क्षते । कतमेन खलूपायमार्गेण शक्या इमे सत्त्वा एवं बहुदुः[44]खोपक्ले[45]शप्रपतिता [46]अभ्युद्धर्तुमत्यन्तसुखे च[47]

1 न+च T. 2 स–T. 3 चा 3 तां–K. 4 यं T. 5 च T. 6 सृ T. स्प K. 7 यं T. 8 ना T. री K. 9 णं च MS. णताञ्च T. 10 नं समनु MS. नतां च समनु K. 11 ति T.K. 12 हु MS. 13 त्त्वान्तिके MS. 14 त्राणा+प्र R. 15 त्या T. 16 प्र–MS.K.T. 17 रु MS.K.K′. 18 च–MS. 19 ता MS. 20 त K.K′. 21 रो MS. 22 ताञ्च MS. 23 बु 13 च–T.K.K′. 24 स्वत K. 25 श्रो MS. 26 न्द्र T. 27 व T.K. 28 इयं । इमं T. 29 रभत MS. लभते T. 30 प 5 व्या–MS.K′. विमोचयितव्याः K. 31 नि 4 व्याः–K′. 32 मोच T. 33 विनेतव्याः+प R. Śdh. 34 व्याः K. 35 त्यावेक्षा T. 36 तः च K. 37 शासगतश्च MS. 38 तथागतज्ञाने–K. 39 न R. 40 प्रति K. 41 या–T. 42 रि K. 43 क्षे T. 44 खा MS. 45 शो T. 46 अत्यु MS. 47 न MS. च–T.

निर्वाणे प्रतिष्ठापयितुं[1] । [2]सर्वधर्म[3]निःसंशयतां चानुप्रापयितुमिति । तस्य[4] बोधिसत्त्वस्यैवं भवति । नान्यत्रानावरणविमोक्ष[5]ज्ञानस्थानात् । [6]तच्चानावरणज्ञानविमोक्षस्थानं नान्यत्र सर्वधर्मयथावदवबोधात्[7] । स च सर्वधर्मयथावदवबोधो[8] नान्यत्राप्र[9]चारानुत्पादचारिण्याः प्रज्ञायाः । [10]स च प्रज्ञालोको[11] नान्यत्र ध्यान[12]कौ[13]शल्यविनिश्चयबुद्धिप्रत्यवेक्षणात् । [14]तच्च ध्यानकौ[15]शल्यविनिश्चयबुद्धिप्रत्यवेक्षणं[16] नान्यत्र श्रुतकौ[17]शल्या[18]दिति । स एवं प्रत्यवेक्षि[19]तज्ञा[20]नो भूयस्या मात्रया [21]सद्धर्म[22]पर्येषणाभियुक्तो[23] विहरति । रात्रिं[24] दिवं धर्मश्रवणार्थिको धर्मकामो[25] धर्मारामो धर्मरतो धर्मप्रतिशरणो धर्मनिम्नो धर्म[26]प्रवणो धर्मप्राग्भारो धर्म[27]परायणो[28] धर्मलयनो [29]धर्मत्राणो धर्मानुधर्मचारी । [30]स एवं बुद्धधर्मपर्येषणाभियुक्तो[31] नास्ति तत्किं चि[32]द्द्रव्यजातं [33]वा [34]धनधान्यको[35]शको[36]ष्ठागारजातं वा हिरण्यसुवर्णमणिमुक्ता[37]वैडूर्यशंखशिलाप्रवा[38]लजातरूपरजतजातं वा यावत्सर्वांगप्रत्यंगपरित्यागो वा यन्न[39] परित्यजति । [40]तया धर्मकामतया न च [41]तस्मिन् दुष्करसंज्ञी भवति । अन्यत्र [42]तस्मिन्नेव धर्मभाण[43]क[44]पु[45]द्गले दुष्करसंज्ञी भवति । [46]यो ऽस्यैकधर्मपदमपि देशयति [47]स बुद्धधर्महेतोर्नास्ति तत्किं चिदुपात्तं[48] बाह्यवस्तु यन्न परित्यजति । नास्ति तत्किं चिदाध्यात्मिकं वस्तु यन्न परित्यजति । नास्ति तत्किं चिद्गुरुपरिचर्योपस्थानं यन्नोपादत्ते । नास्ति सा का चित् मानाभिमानोत्सर्गनिर्माणोपचारता या[49] नोपा[50]दत्ते । नास्ति सा का चित्कायि[51]कीपीडा या[52] नोपादत्ते । [53]संचित्ततरो भवत्य-

1 तुमिति T. 2 स 15 ति—T. 3 निस्सं MS. 4 त्व MS.K.K'. 5 ज्ञान—T. 6 तं चा T. 7 धै 8 धौ T. 9 च T. 10 सचेत्प्र MS. 11 का MS.K. 12 न+विनिश्चय T. 13 ल MS.K.K'. 14 तं च T. 15 ल MS.K.K'. 16 ण T. 17 ला MS.K.K'. 18 दिभिः । T. 19 क्ष MS. 20 ना MS. 21 सर्वधर्म T. 22 पर्यैं K. 23 क्ता MS. 24 त्रि R. 25 मा T.,+तृप्तो ऽप्रतिप्रस्रब्धो बुद्धधर्मपर्येष्टिहेतोः T. 26 श्र K'. 27 पा MS. 28 णः T. 29 धर्मत्राणो—K. 30 सर्व T. स एवं=सं MS. 31 क्तानामस्ति K. 32 व्य+चित्त R. 33 वा धानजातं+वा MS. 34 धा MS. 35 ष्ठ MS.K'. 36 ष्ठां T. 37 क्ता+बहु T., वज्र R. 38 द T. ड R. 39 त्न T.K. 40 तया 5 य—MS.K.K'. 41 तस्माद्दुःखसंज्ञी MS.K.K'. 42 तस्मिं धर्म T. 43 न T. 44 के MS.K.K'.T. 45 पुद्गले T. 46 यो 12 ति—MS.K.K'. 47 सद्धर्म MS.K.K'. 48 न्तं MS. त्त K.K'. 49 यां R. 50 ददाति T. 51 कि K. 52 यां R. 53 स चित्तो R.

श्रुतधर्मपदश्रवणेन[1] । न[2] त्वेव त्रिसाहस्र[3]महासाहस्रलोकधातुप्रतिमेन रत्नराशिप्रतिलंभेन । [4]संचित्ततरो भवत्येकसुभाषितगाथा[5]श्रवणेन । न त्वेव चक्रवर्ति[6]राज्यप्रतिलंभेन [7]संचित्ततरो भवत्यश्रुतधर्मपदसम्यक्संबुद्धोपनीतश्रवणेन बोधिसत्त्वचर्यापरिशोधनेन[8] । न त्वेव शक्रत्वब्रह्मत्वप्रतिलंभेन बहुकल्पशतसहस्रपर्यवसानेन । [9]सचेदिदं कश्चिदेवं ब्रूयात् । एवमहं तुल्यमिदं धर्मपदं सम्यक्संबुद्धोपनीतं बोधिसत्त्वचर्यापरिशोधनं [10]संश्रावयेयं । सचेत्त्वं महत्यामग्निखदायां [11]संप्रज्व[12]लितायामेकज्वालीभूतायामात्मानं [13]प्रपातये[14]: । महान्तं च दुःखवेद[15]नोपक्रमं स्वशरीरेणोप[16]दद्य इति । तस्यैवं भवत्युत्सहेयमहमेकस्यापि धर्मपदस्य[17] सम्यक्संबु[18]द्धोपनीतस्य बोधिसत्त्वचर्यापरिशोधनस्यार्थाय त्रिसाहस्रमहासाहस्र[19]लोकधातावग्निपरिपूर्णे[20] ब्रह्मलोकादात्मानमुत्स्रष्टुं[21] । किं पुनः प्राकृतायामग्निखदायां । अपि तु खलु पुनः [22]सर्वनिरयापायदुःखसंवा[23]सैरप्यस्माभिर्बुद्धधर्माः पर्येषितव्याः । किं पुनर्मानुष्यदुःखसंवासैरिति । स एवंरूपेण वीर्या[24]रंभेण धर्मान्पर्येषते । यथा श्रुतेषु[25] धर्मेषु च[26] योनिशः प्रत्यवेक्षणजा[27]नीयो भवति । तांश्च धर्मा[28] श्रुत्वा स्वचित्त[29]निध्य[30]प्त्यैको रहोगत एवं मीमांसते । धर्मानुधर्मप्रतिपत्त्या इमे बुद्धधर्मा अनुगंतव्या न केवलं वाक्कर्मपरिशुद्ध्येति । सो ऽस्यां प्रभाकर्यां बोधिसत्त्वभूमौ स्थितो[31] बोधिसत्त्वो [32]धर्मानुधर्मप्रतिपत्तिहेतोर्विविक्तं कामैर्विविक्तं पापकैरकुशलै[33]र्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति । सवितर्क[34]सविचाराणां व्युपश[35]मादध्यात्मसंप्र[36]सादाच्चेतस एको ऽति[37]भावादवितर्क[38]मविचारं स-

1 वा K. 2 रत्वेव T. 3 स्रो MS. 4 स चित्तो R. 5 थाश्च श्र MS.K.K'. 6 र्ती T. 7 स चित्तो R. 8 प्रतिलंभेन+प K. 9 सचेदेतदेवं ब्रूयात् MS.K.K'. 10 संप्रकाशयेयं T. 11 सं– MS.K.K'. 12 जो T. 13 प्रतिपा K'. 14 ये T. 15 ना K.K'. 16 पदद्या MS.K.K'. पादद्या R. 17 स्यापि MS. 18 द्धा T. 19 स्राया लो T. 20 णायां T. 21 त्सृजयं MS. त्सृजेयं K.K'. त्श्रष्टुं T. 22 सर्वनिरया T. 23 चारै MS. भारै T. 24 र्यामारं MS.K. 25 षु+च T. 26 च– T. 27 ती T. 28 र्मान्छ्रुत्वा R. 29 त्ते MS.K.K'. 30 प्त्या एको MS.K.K'. 31 ष्ठितो T. 32 सर्व+ध MS. स+ध K'. 33 लधर्म R. 34 स– T. 35 स T. 36 मा T. 37 ती MS. टि T. 38 स MS.

माधिजं[1] प्रीति[2]सुखं द्वितीयं ध्यानमुपसंपद्य विहरति । स प्रीते[3]र्विरागादुपेक्षको विहरति । स्मृतिमान्संप्रजानन्सुखं च कायेन प्रतिसंवेदयते[4] । यत्तदार्या आचक्षन्ते[5] । उपेक्षकः स्मृतिमान्सुखविहारी नि[6]ष्प्रीतिकं तृतीयं[7] ध्यानमुपसंपद्य विहरति । स सुखस्य च प्रहाणाद्दुःखस्य च प्रहाणात् पूर्वमेव[8] च सौ[9]मनस्यदौर्मनस्ययोरस्तंगमाददुःखासु[10]खोपेक्षस्मृ[11]तिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति । स सर्वशो रूपसंज्ञा[12]नां समतिक्रमात्प्रतिघसंज्ञानामस्तंगमात् । नानात्वसंज्ञानाममनसिकारात् । अनन्तमाकाशमित्याकाशानन्त्यायतनमुपसंपद्य विहरति । स सर्वशो आकाशानन्त्यायतनसमतिक्रमादनन्तं विज्ञानमिति विज्ञानानंत्यायतनमुपसंपद्य विहरति । स सर्वशो विज्ञानानंत्यायतनसमतिक्रमात् । नास्तिकिंचिदित्याकिंचन्यायतनमुपसंपद्य विहरति । स सर्वशं[13] आकिंचन्यायतनसमतिक्रमात् । नैवसंज्ञानासंज्ञेति नैवसंज्ञानासंज्ञायतनमुपसंपद्य विहरति । [14]तेनानभिरतिपदस्था[15]नेन नान्यत्न धर्मानुधर्मप्रतिपत्ति[16]मुपादाय । स मैत्नीसहगतेन चित्तेन विपुलेन महद्गतेनाद्वयेनाप्रमाणेनावैरेणासपत्नेनानावरणेनाव्याबाधेन [17]सर्वत्नानुगतेन धर्मधातुपरमे लोके[18] आकाशधातुपर्यवसा[19]ने सर्वावन्तं लोकं स्फु[20]रित्वोपसंपद्य विहरति । एवं करुणासहगतेन प्रमुदितासहगतेन उपेक्षा[21]सहगतेन चित्तेन विपुलेन महद्गतेनाद्वयेनाप्रमाणेनावैरेणा[22]सपत्नेनानावरणेना[23]व्याबाधेन सर्वत्नानुगतेन धर्मधातुपरमे लोके[24] आकाशधातुपर्यवसाने सर्वावन्तं लोकं स्फुरित्वोपसंपद्य विहरति । सो ऽनेकविधा[25]मृद्धिविधिं प्रत्यनुभवति । पृथिवीमपि कम्पयति । एको ऽपि भूत्वा बहुधा भवति । बहुधापि भू[26]त्वैको भवति । आविर्भावं[27] तिरोभावमपि प्रत्यनुभवति ।

1 स्तं MS. ज T. 2 ती T. 3 विरागा T. 4 यते=ये K. यति T.K'. 5 न्त R. ते T. 6 निःप्री T. 7 यकं MS. 8 धर्मैव T. 9 र्म K. 10 खमुपेक्ष T. खमुपेक्षा R. खापेक्ष K.K'. 11 स्मृतित्वाच्चतुर्थं MS.K.K'. 12 ख्या K. 13 स T. 14 तच्चानुविहरति पदस्थानं MS.K.K'. तं चानभि T. 15 नेन=ने MS. 16 त्तिताम‌ु All MSS. 17 सर्वानु T. 18 के T.K.K'. 19 शा T. 20 स्फ R. 21 सह–K. 22 सं MS. 23 न अव्या K. 24 के MS. 25 ध MS. 26 त्वा एक T. त्वेक K. 27 व T.

[1]तिरःकुड्यं तिरःप्राकारं [2]पर्वतमप्यसज्जं गच्छति[3] । [4]तद्यथापि नामाकाशे । आकाशे ऽपि [5]पर्यङ्केन प्रक्रा[6]मयति । तद्यापि नाम [7]पक्षी शकुनिः पृथिव्यामप्युन्मज्जननिमज्जनं करोति । तद्यथापि ना[8]मोदके[9] ऽप्यसज्जन्गच्छति । तद्यथापि नाम पृथिव्यां [10]धूमयति [11]प्रज्वलति । तद्यथापि नाम महानग्निस्कंध[12] [13]उदकमपि कायात्[14]प्रमुंचति । तद्यथापि नाम महामे[15]घः । [16]येन वारिणा [17]त्रिसाहस्रमहासाहस्र[18]लो[19]कधातुर[20]प्यादीप्तो निर्वाप्यते[21][22] । इमावपि चंद्रसूर्यावेवं [23]महानुभावा[24]वेवं महाशाख्यौ[25] पाणिना परामृ[26]शति परिमार्ष्टि । यावद्ब्रह्मलोकमपि कायेन वशं[27] वर्तयति । स दिव्येन श्रोत्रधातुना[28] विशुद्धेनातिक्रान्तमानुष्यके[29]नोभयां [30]शब्दां [31]श्रृणोति । दिव्यान्मानुष्यकान्[32]सूक्ष्मा[33]नौदारिकांश्च ये दूरे[34] ऽन्तिके वा अंतशो[35] दंशम[36]शककी[37]टमक्षिका[38]नामपि शब्दां[39] श्रृणोति । [40]स परसत्त्वानां [41]पर[42]पुंगलानां चेतसैव चित्तं[43] सरागचित्तं सरागचित्तमिति यथाभूतं प्रजानाति । [44]विगतरागचित्तं वि[45]गतरागचित्तमिति यथाभूतं प्रजानाति । [46]सदोषं[47] [48]विदोषं समोहं [49]विमोहं [50]सक्लेशं[51] [52]निःक्लेशं [53]परीत्तं विपुलं [54]महद्गतमप्रमाणं [55]संक्षिप्तं[56] [57]विक्षिप्तं समाहितं असमाहितं विमुक्तं अविमुक्तं [58]सांगनम[59]नंगनं । औदारिकचित्तमौदारिकचित्तमिति यथाभूतं प्रजानाति । अनौदारिकचित्तमनौदारिकचित्तमिति यथा-

1 रकुं MS. 2 तिरः+प T. 3 न्ति K. 4 यथा आकाशे T. 5 र्यङ्केन क्रामति T.K′. 6 मति T.K. 7 क्षीं MS. 8 मौ T. 9 के+उदके MS.K.K′. 10 धुमा K. धूमा MS.K′. 11 जो T. 12 धः MS. 13 स्वकायादपि महावारिधारा उत्सृजति R. 14 दुत्सृजति T. प्रमुचति K.K′. (प्रमुञ्चति) R. 15 घ MS. 16 याभिर्वारिधाराभिरयं त्रि R. 17 साहस्रमहा—K. 18 स्रो K.K′. 19 लोकधातुर—T. 20 र 6 ते=रादीप्तः प्रदीप्तः संप्रज्वलितो ग्निना एकज्वलीभूतो निर्वाप्यते R. 21 प्ये K. 22 तः MS. त K. 23 म 5 वं=महर्द्धिकावेवम्महर्द्धिकावेवं K. महर्द्धिकावेवं+म K. 24 वौ पाणिना R. 25 ख्यो MS. 26 ष T. 27 सं MS. 28 ना विशुद्ध—T.K. 29 न उ T. 30 छ MS. 31 छु MS. श्रु R. 32 श्च सू T. 33 णो MS. 34 रे अन्तिके T. 35 तो MS. 36 स MS. 37 टा MS.K′. 38 णा T. 39 ब्दां छु MS. 40 [एषा दिव्यश्रोत्राभिज्ञा]+स R. 41 पुद्ग R. 42 रा T. 43 त्तं स्फुरित्वा यथाभूतं प्रजानाति सराग T. त्तं यथा° K.K′. 44 वीतरागं T. विराग K.K′.R. 45 गत—K.K′ R. 46 एवं+स T. 47 षं+समोहं T. 48 विगतदोषं MS. 49 विगतमोहं MS. 50 सं MS.K. 51 सं वीतक्लेशं निः T. 52 निःशेषं T. 53 परिचित्तं MS. 54 द्गग T. 55 सं MS. 56 तं T. 57 विक्षिप्तं—T.K. (विस्तीर्णम्) R. 58 साङ्ग K. 59 नङ्ग K.

भूतं प्रजानाति । इति[1] परसत्त्वानां [2]परपुंगलानां चेतसैव चित्तं यथाभूतं प्रजानाति[3] । सोऽनेकविधं पू[4]र्वनिवा[5]सम[6]नुस्मरति । एकामपि जातिमनुस्मरति । द्वे तिस्रश्चतस्रः पंच दश विंशति[7] त्रिंशतं[8] चत्वारिं[9]शतं[10] पंचाशतं[11] जातिशतमप्य[12]नुस्मरति । अनेकान्यपि जातिशतानि अनेकान्यपि जातिसहस्राणि अनेकान्यपि जातिशतसहस्राणि अनेकान्यपि जातिकोटीनियुतशतसहस्राणि अनुस्मरति । संवर्तकल्पमपि विवर्तकल्पमपि संवर्तविवर्तकल्पमपि अनेकानपि संवर्तविवर्तकल्पानप्यनुस्मरति । कल्पशतमपि कल्पसहस्रमपि कल्पशतसहस्रमपि कल्पकोटीमपि कल्पकोटीशतमपि कल्पकोटीसहस्रमपि कल्पकोटीशतहस्रमपि यावदनेकान्यपि कल्पकोटीनियुतशतसहस्राण्यनुस्मरति । अमुत्रा[13]हमासमेवं नामा । एवं गोत्र एवं जातिरेवमाहार एवमायु[14]ष्प्रमाण[15]ः । एवं चिरस्थि[16]तिक[17] एवं सुखदुःखप्रतिसंवेदी । [18]सो ऽहं ततश्च्युतो[19] [20]अत्रोपपन्नः ततश्च्युत इहोपपन्न[21] इति । साकारं[22] सनिमित्तं सोद्देशमनेकविधं पूर्वनिवासमनुस्मरति[23] । स दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्य[24]केन सत्त्वान्पश्यति[25] । च्[26]यवमाना[27]नुपपद्यमाना[28]न्सुवर्णान् दुर्वर्णान्सुगतान् दुर्गता[29]न्हीनान्प्रणीतां यथाकर्मोप[30]गान्सत्त्वान् यथाभूतं प्रजानाति । इमे[31] भवन्तः सत्त्वाः कायदुश्चरितेन समन्वागता[32]ः । वाग्दुश्चरितेन समन्वागता मनोदुश्चरितेन समन्वागता[33]ः । आर्या[34]णामपवादका[35] मिथ्यादृष्ट[36]यः । मिथ्यादृष्टिकर्मसमादानहेतोस्तद्धेतुं तत्प्रत्ययं[37] कायस्य भेदात्परं मरणादपायदुर्गतिविनिपातं[38] नरकेषूपपद्यंते । इमे[39] पुनर्भवं[40]तः सत्त्वा[41]ः कायसुचरितेन समन्वागताः ।

1 ति+हि T. 2 प 4 नां—MS. 3 ती [त्यू एषा परचित्तज्ञानाभिज्ञा] R. 4 र्वें T. 5 सानु MS. 6 स्मा MS. 7 तिं—T. ति MS. 8 ति MS.K. 9 रि K. 10 त् T. 11 त K. 12 प्य—K. 13 हं नामास MS.K.K'. 14 युःप्र R. 15 न K. 16 स्ति MS. ष्ठि T. 17 कः MS.K.K'. का T. 18 सो ऽहं—T. 19 त All MSS. 20 अमुत्रो T. 21 न्नः K. 22 रं सोद्देशं सनिमितिमने T. रसमचित्तसोद्देशमने K. 23 ति । [एषा पूर्वनिवासानुस्मरत्यभिज्ञा] R. 24 प्येन MS.K'. 25 न्ति MS.K'. 26 व्य MS.K'. 27 मु T. 28 नुसु T. 29 तान्प्रणीतान्हीनान् R. 30 गान्यथा T. 31 मे+खलु पुन T. 32 ता वा T. 33 ता MS.K.K'. 34 ना T. 35 काः T.K. 36 यस्ते मि T. 37 यं+तन्निदानं T. 38 तनिरयेषू K. 39 मे+खलु T. 40 तो MS. 41 त्वा MS.

वाक्सुचरितेन समन्वागताः । मनःसुचरितेन समन्वागताः । आर्याणामनपवादकाः सम्यग्दृष्टयः[1] सम्यग्दृष्टिकर्मधर्मसमादानहेतोस्तद्धेतुं तत्प्रत्ययं[2] कायस्य भेदात्परं मरणात्सुगतौ स्वर्ग[3]लोक[4]देवलोकेषूपपद्यंते । इति[5] दिव्येन चक्षुषा विशुद्धेनातिक्रांत[6]मानुष्य[7]केण साकारं[8] [9]सोद्देशं सनिमित्तं [10]सत्त्वान्पश्यति च्यवमाना[11]नुपपद्यमानान्[12]सुवर्णान्दुर्वर्णान्सुगतान्दुर्गतान् हीना[13]न् प्रणीतान् यथाकर्मोपगतान्सत्त्वान् यथाभूतं [14]प्रजानाति । [15]स इमानि ध्यानानि विमोक्षान्समाधीन्[16]समापत्ती[17]श्च समापद्यते व्युत्तिष्ठते । न च तेषां वशेनोपपद्यते[18] । अन्यत्र यत्र बोध्यंगपरिपूरिं पश्यति तत्र [19]संचिंत्य प्रणिधानवशेनोपपद्यते । तत्कस्य हेतोः । तथा हि तस्य बोधिसत्त्वस्योपायकौश[20]ल्या[21]भिनिर्हृता चित्तसंततिः । त[22]स्यामस्यां प्रभाक[23]र्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्य बहवो बुद्धा आभासमागच्छंत्यौदारिकदर्शनेन प्रणिधानबलेन च । बहूनि बुद्धशतानि बहूनि बुद्धसहस्राणि बहूनि बुद्धशतसहस्राणि बहूनि बुद्धनियुतशतसहस्राणि बह्वो बुद्धकोट्यो बहूनि बुद्धकोटीशतानि बहूनि बुद्धकोटीसहस्राणि बहूनि बुद्धकोटीशतसहस्राणि बहूनि बुद्धकोटीनि[24]युतशतसहस्राणि[25] आभासमागच्छंत्यौदारिकदर्शनेन प्रणिधानबलेन च । स तथागतानर्हतः सम्यक्संबुद्धान्दृ[26]ष्ट्वोदाराशयतया [27]सत्करोति गुरुकरोति मानयति पूजयति चीवरपिण्डपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैश्च प्रतिपादयति । बोधिसत्त्वसुखो[28]पधानं चोपसंहरति । संघग[29]णसंमाननां च करोति । तानि [30]च कुशलमूलान्यनुत्तरायां सम्यक्संबोधौ परिणामयति । तांश्च तथागतानर्हतः सम्यक्संबुद्धान्पर्युपास्ते । तेषां च धर्मदेशनां सत्कृत्य शृणोति उद्गृह्णाति धारयति

1 यस्ते T. 2 यं+तन्निदानं T. 3 र्गे K. 4 के देवे T.K'. 5 ति+हि T. ति+(प्रजानाति । एवं) R. 6 म R. 7 ष्येण MS.K.K'. 8 र K. 9 सा MS. सोदे K. 10 सर्व+स T. 11 नु K'. 12 सु MS. 13 ता K. 14 पश्यति R. 15 स–K'. 16 नूस K. 17 त्तीश्च MS.K. त्तिश्च T. 18 ते न्य T. 19 सचित्य T. 20 ला MS.K.K'. 21 र्हि T. 22 स्या–T. 23 र्या T. 24 नयुत T. 25 ण्याभा T. 26 ष्ट्वा उदा T. ष्टोदा K. 27 श T. 28 पसंपादनं T. 29 न T. 30 च–T.

वाचयति श्रुत्वा च यथाभजमानं प्रति[1]पत्त्या[2] संपादयति । स[3] सर्वधर्मा[4]णामसंक्रान्तितां चाविनाशितां च प्रतीत्यप्रत्ययतया व्यवलोकयति । त[5]स्य भूयस्या मात्रया सर्वाणि कामबंधनानि तनूनि भवंति । सर्वाणि रूपबंधनाति सर्वाणि भवबंधनानि सर्वाण्यविद्याबंधनानि तनूनि भवंति । दृष्टि[6]कृतबंधनानि [7]चास्य पूर्वमेव प्रहीणानि भवंति । तस्या[8]स्यां प्रभाकर्यां बोधिसत्त्वभूमौ स्थितस्य[9] बोधिसत्त्वस्या[10]नेकान्कल्पाननेकानि कल्पशतान्यनेकानि कल्पसहस्राण्यनेकानि कल्पशतसहस्राण्य[11]नेकानि कल्पनियुतशतसहस्राण्यनेकाः कल्पकोटीरनेकानि कल्पकोटीशतान्यनेकानि कल्पकोटीसहस्राणि अनेकानि कल्पकोटीशतसहस्राण्यनेकानि कल्पकोटीनि[12]युतशतसहस्राण्यनुपचयं[13] मिथ्यारागः[14] प्रहाणं[15] गच्छति । अनुपचयं मिथ्यादोषः प्रहाणं गच्छति । अनुपचयं मिथ्यामोहः प्र[16]हाणं गच्छति । तानि चास्य कुशलमूलान्युत्तप्यंते परिशुद्ध्यंति कर्मण्यानि च भवंति । तद्यथापि नाम भवंतो जिनपुत्रा[17]स्तदेव जातरूपं कुशलस्य कर्मारस्य हस्तगतं तुल्यधरणमेव प्रमाणेनावतिष्ठति[18] । एवमेव भवंतो जिनपुत्रा बोधिसत्त्वस्यास्यां प्रभाकर्यां बोधिसत्त्वभूमौ स्थितस्यानेकान्कल्पान्यावदनेकानि कल्पकोटीनि[19]युतशतसहस्राण्यनुपचयं मिथ्यारागः प्रहाणं गच्छति । अनुपचयं मिथ्यादोषः अनुपचयं मिथ्यामोहः प्रहाणं गच्छति । तानि चास्य कुशलमूलान्युत्तप्यन्ते परिशुद्ध्यंति[20] कर्मण्यानि च भवंति । तस्य भूयस्या मात्रया [21]क्षांतिसौरत्याशयता च परिशुद्ध्यंति । [22]सौखिल्यमा[23]धुर्याशयता च अकोप्याशयता च अक्षुभिताशयता च [24]अलुडिताशयता च अनुन्नामावनामाशयता च सत्त्वकृतानां निःकांक्षाशयता च कृतप्र[25]तिकृतानां नि[26]ः-

1 णि MS. 2 त्या T. 3 स—T. 4 णामसंकीर्तितां च अवि T. णामसक्तिता वावि K'K. 5 स्या MS. K. 6 ष्ठ MS.K.T. 7 च पूर्व R. 8 स्या—T. 9 स्यां T. 10 स्यां ने T. 11 न्यने T. 12 नयुत T.K'. 13 य MS.K. 14 ग T. गं K. 15 ण K. 16 मा K'. 17 त T. 18 तो MS. न्ति T. ते K.K'. 19 यू K'. 20 त MS.T. 21 कांक्षति MS.K.K'. 22 स T. 23 धू MS.K.K'. 24 अलुभिता R. 25 ति—T. 26 निः—All MSS.

कांक्षाशयता च अशाठ्य[1]मायावि[2]ताशयता च अग[3]हनाशयता च परिशुद्ध्यति । तस्य[4] च[5]-तुर्भ्यः संग्रहवस्तुभ्यो ऽर्थचर्यातिरिक्ततमा[6] भवति । दशभ्यः पारमिताभ्यः क्षांति[7]पारमितातिरिक्ततमा भवति[8] । न च परिशेषासु न समुदागच्छति यथाबलं यथाभजमानं[9] । इयं भवंतो जिनपुत्रा बोधिसत्त्वस्य प्रभाकरी नाम तृतीया बोधिसत्त्वभूमिः समासनिर्देशतः[10] । यस्यां प्रतिष्ठितो[11] बोधिसत्त्वो[12] भूयस्त्वेन[13] इंद्रो भवति देवराज[14]स्त्रिदशाधिपतिः कृती प्रभुः । सत्त्वानां कामरागविनिवर्तनो[15]पायोपसंहाराय कुशलः सत्त्वान्कामपंकादुद्धर्तुं । यच्च[16] किं चित्कर्मा[17]रभते दानेन वा प्रियवद्यतया वा अर्थक्रियया वा समानार्थतया वा । तत्सर्वमविरहितं बुद्धमनसिकारैर्धर्ममनसिकारैः संघमनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्यामनसिकारैः पारमितामनसिकारैर्भूमिमनसिकारैर्वैशारद्यमनसिकारैरावेणिकबुद्धधर्ममनसिकारैर्यावत्सर्वाकारवरोपेतसर्वज्ञज्ञानमनसिकारैः । किमिति सर्वसत्त्वानामग्र्यो भवेयं श्रेष्ठो ज्येष्ठो वरः प्रवर उत्तमो ऽनुत्तमो नायको विनायकः परिणयकः । यावत्सर्वज्ञज्ञानप्रतिशरणो भवेयं[18] । आकांक्षंश्च तथारूपं वीर्यमारभते यथारूपेण वीर्यारंभेणै[19]कक्षणलवमुहूर्तेन समाधिशतसहस्रं[20] च प्रतिलभते[21] । बुद्धशतसहस्रं च पश्यति तेषां चाधिष्ठानं संजानीते । लोकधातुशतसहस्रं च कंपयति[22] । क्षेत्रशतसहस्रं[23] चाक्रमयति । लोकधातुशतसहस्रं चावभासयति । सत्त्वशतसहस्रं च परिपाचयति । कल्पशतसहस्रं च तिष्ठति । कल्पशतसहस्रं च पूर्वान्तापरांततः प्रविशति[24] । धर्ममुख[25]शतसहस्रं च प्रविचिनोति । कायशतसहस्रं चादर्शयति । कायं कायं च बोधिसत्त्वशतसहस्रपरिवारमादर्शयति । तत उत्तरे[26] प्रणिधा-

1 टा MS. था T.K'. थ K. 2 चिता K. 3 ग्र K'. 4 या MS.K.K'. 5 चतसृभ्यः MS.K.K'. 6 या MS. 7 शां MS. 8 वं MS. 9 क्त MS.K.K'. 10 शयतः MS. 11 ता MS. 12 त्त्व T. 13 नेन्द्रो T. 14 राज—MS. 15 नि—T. 16 यं च T. 17 मोल T.K. 18 यमिति। T. 19 ण एक T. 20 स्त्रंश्च T. 21 ते+समापद्यते च T. 22 कल्प K'. 23 स्त्रंश्चाक्रामति T. 24 स MS. 25 ष T. 26 र MS.

नबलिका बोधिसत्त्वाः प्रणिधानवैशेषिकतया[1] विकुर्वंति । तेषां न सुकरा संख्या कर्तुं । कायस्य वा प्रभाया वा ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्यायाा वा व्यूहस्य वा अधिष्ठानस्य वा अधिमुक्तेर्वा अभिसंस्काराणां वा यावदेव तावद्भिरपि कल्पकोटीनिं[2]-युतशतसहस्रैरिति ॥

अथ खलु वज्रगर्भो बोधिसत्त्व एवमेव भूम्यर्थं प्ररूपयमानस्तस्यां वेलायामिमा गाथा अभाषत ॥

[3]ते [4]शुद्धआशयगुणाकर[5]तीक्ष्णचित्ता
[6]निर्विण्णरागविगता अनिवर्तियाश्च ।
दृढ[7]चित्तुतप्तधृतियुक्तिउदारवेगा[8]
माहात्म्यता[9]शयविदू[10] तृ[11]ति[12]याक्रमन्ति ॥ १ ॥

अत्र[13]स्थिता विदु[14] प्रभाकरिभूमिदेशे[15]
दुःखं[16] अनित्य[17]मशुचिं च प्रलोप धर्मं ।
अचिर[18]स्थिताक क्षणिकं[19] च निरीहकं[20] च
विचिनन्ति संस्कृत[21] गतीकमनागतीकं[22] ॥ २ ॥

ते [23]रोगभूत सहशोकपरिद्रवं[24] च
[25]स उपायसं च [26]प्रियताप्रियतानुबद्धं ।

1 का T. 2 न K.K′. 3 Metre: वसंततिलका, तं K′. 4 शुद्धा K.; शुद्ध, स्थिर, निर्वि, विराग, अनि-वर्त्त, दृढ, उत्तप्त, तृप्त, उदार, महात्म्य Prose 5 का MS. 6 निर्वाणानुरागता MS. °रागशता K. °रा-गयिता K′. निर्वानुरागता T.L. 7 ढाश्च MS.K′. ध T. ढा K. 8 गाः MS. 9 ता—T. 10 दु MS.K. 11 ति T.K. 12 ती All MSS. 13 रा T. 14 द्व All MSS. 15 शो K. 16 ख T. 17 त्यं अशु-चि K. 18 स्ति T. 19 कश्च L. 20 रोधकं RS. 21 सत्कृ MS.K.K′. 22 ति T. 23 रा MS.K.K′.L. 24 पर्देवनं (परिदेवं) RS. 25 सोपा RS. 26 प्रिय अप्रियानु MS. प्रियता अप्रियानु T. प्रिय अप्रियतानु RS. K.K′.

[1]दुःखदौ[2]र्मनस्य नि[3]लयं ज्वलिताग्निकल्पं[4]
[5]पश्[6]यंति [7]संस्कृतमनन्त [8]समुचलं[9] ति ॥ ३ ॥
उद्विग्न सर्वत्रि[10]भवे अनपेक्षचित्ता
ज्ञानाभिलाष सुगतानमनन्यबुद्धी[11] ।
अविचिंति[12]यं अतुलियं असमंतपारं
संपश्यते[13] निरुपतापु[14] जिना[15]न ज्ञानं ॥ ४ ॥
ते बुद्धज्ञान निरुपद्रवमीक्षमाणा[16]
अत्रा[17]न ना[18]थ[19]रहिता [20]व्रजते चरंति ।
नित्यं दरिद्र [21]त्रिभिरग्निभि [22]संप्रदीप्ता
भवना[23]रके [24]दुःखशतैर्विनिबद्धचित्ताः[25] ॥ ५ ॥
क्लेशावृताश्च [26]अविलोकन[27]छंदहीनाः[28]
सुगता[29]न धर्मरतना[30]त्तु प्रनष्टबालाः ।
संसार[31]श्रोत अनु[32]वाहिन मोक्षत्रष्टा
[33]मयि त्रायितव्य [34]दृढवीर्य समारभंते ॥ ६ ॥
ज्ञानाभिलाष अ[35]नपेक्ष जगार्थचारी[36]

1 or दु? 2 र T.K.K'.L. 3 जो T. 常熾然三火 Dhr. 但爲貪恚痴•猛火所焚燒 Kj. Bb. 三毒猛火恒熾然 Śdh. 4 स्ति 5 以見有爲業•發起無限難 Dhr. 從無始世來•熾然常不息 Kj. Bb. 無始時來不休息 Śn. 與病俱有無休息 Śdh. 6 श्य RS. 7 सत्कृ MS.K.K'. 8 समुच्चलंति MS.K.K'. °ज्वलंति (°ज्जलंति) RS. 9 रं L. 10 or ति? 11 न्द्राः MS. द्धिः RS. द्धीः T.K.K'.L. 12 तयं MS. 13 or न्ते? 14 प RS. ष्ट T.L. 15 ना—K. 16 णाः MS.K.K'. नाः T. 17 (ने) RS. 18 णा K.K'.L. 19 र्थं K'. 20 व्रजते चरंति MS.K.K'. (विप्रमोचनार्थम् Tib. 愍衆生 Chin.) RS. 21 or ति? 22 सं MS. 23 चा RS. 24 or दु? 25 त्ता MS.K.K'. 26 अवलो MS. अलो K.K'. 27 च्छं L. 28 ना MS. 29 ना K. 30 न्तु MS. नु RS. 31 स्रो RS. 32 पा K'. 33 मयि=मे RS. मपि K. 34 ध T. 35 नु MS.K.K'. 36 रि L.

व्युपरीक्षते[1] कतम[2] हेतु जगस्य[3] मोक्षं[4] ।
नान्यत्र[5] नावरणज्ञान तथागतानां[6]
ज्ञानं च प्रज्ञप्रभवं सुगतान नन्तं ॥ ७ ॥
प्रज्ञा श्रुतान्तु[7] इति चिंतयि बोधिसत्त्वो[8]
ज्ञात्वा तमारभति[9] वीर्य श्रुतार्थचारी[10] ।
रात्रिं दिवं श्रवणहेतु अनन्यकर्मा
अर्थार्थिको भवति धर्मपरायणश्च ॥ ८ ॥
मणिमुक्तिरत्ननिचयां[11] प्रियबांधवांश्च
राज्यं अनंत[12]विविधां पुरस्फीत[13]श्रेष्ठां[14] ।
भार्यासुतांश्च परिवारमनोनुकूलां[15]
अनवेक्ष[16]चित्तु[17] त्यजते विदु धर्महेतोः ॥ ९ ॥
शिरहस्तपादनयनां[18] स्वकमात्ममांसं[19]
जिह्वां च दंष्ट्र[20]श्रवणाशिंक[21]सोणितं च ।
हृदयं उपाद्य[22][23] प्रियमज्जं[24] परित्यजंति
ना दुष्करेत[25] अथ[26] दुष्कर[27] यच्छृणोति[28] ॥ १० ॥

1 व्युपपरी MS.K.K'. व्युपरी T.K. 2 कतेन MS., 此智何爲因•無行々慧生•思惟是智慧•從於多聞起 Bb 此智何爲因•惟從智慧生•思惟是智慧•但從多聞生 Kj. 思何方便令解脱•不離如來無碍智•彼復無生慧所起•心念此慧從聞得 Sn. 思何方便令解脱•不離諸佛無碍智•斯由覺然如實理•覺由無行無生慧•慧從定發定由聞• Sdh. 觀察何等宜•逮致至解道•無他諸無礙•成諸如來慧•其慧爲智明•是衆安住樂•以聞智專惟•成菩薩聖慧 Dhr. 3 गा MS. 4 क्ष L. क्षे RS.K'. क्षां K. 5 अन्यत्र MS. 6 नं MS. or न? 7 शुभान्त MS. K.K'. सुतातु T.L. 8 त्वाः T.L. 9 भेन्ति MS.K'. 10 रि T. 11 ल RS. 12 ति MS. 13 स्थानश्रेष्ठां RS. ष्ठान° T.L. 14 ष्ठं MS. 15 कु T. 16 नपे RS. 17 न्त MS. 18 नां MS.K.K'. 19 सां MS.K.K'. 20 ष्ट्रा MS.K. 21 धि MS.K'. 22 तु MS. 23 द्या All MSS. 24 ज्य MS.K.K'. 25 स्करे K'. स्कैरेन T.L. 26 म All MSS. or द? 27 स्क T.K'. 28 शृ T.

यदि [1]कश्चिदेनमुपगम्य वदेय्यं[2] एवं
यदि अग्निगर्भ [3]पतति ज्व[4]लिताचि[5]र्घोरं ।
प्रापिष्य धर्मरतनं सुगतोपनीतं
श्रुत्वा अदीनमनसः प्रपते गुणार्थी[6] ॥ ११ ॥

एकस्यधर्मपदअर्थ सुमेरुमू[7]र्ध्वा
त्रिसहस्र[8]अग्निरुचिरं[9] परि ब्रह्मलोका[10]त् ।
[11]अपि दुर्लभा इमि[12] [13]जलाश्च उदारबोधि-
यं[14] मानुषे[15]ण [16]दुख लभ्यति ए[17]वरूपं ॥ १२ ॥

यावन्तरं[18]श्च [19]परिक[20]र्षिण ज्ञानलाभ-
स्तावन्तरं [21]दुखम[22]वीचिकमुत्सहामि ।
किं वा पुनर्विविधमानुषदुःखस्कंधं
हन्ता[23]भ्युपेमि[24] वरधर्मिपदार्थि दुःखं ॥ १३ ॥

धर्मं च श्रुत्व[25] पुन योनिसु चिन्तयंति
ध्यानाप्रमाण[26]चतुर[27]श्च तथा अरूप्यां[28] ।
पंचाप्यभिज्ञप्रवरां अभिनिर्हरंति
नो[29] चापि ते[30]षु वशिता उपपद्यि[31] याति[32] ॥ १४ ॥

1 का T.L. 2 or प्य ? 3 प्रपते RS. पतिति MS. 4 जो T. 5 पि T.L. 6 र्थं K. 7 मूर्ध्रा MS.K'. मुर्धां T. मुर्द्धा K. 8 स्त्रि T.L.K'. 9 तं K.T.L.K'. 10 कं MS.K.K'. 11 सूदुर्लभा RS. 12 मे T. 13 जिनस्य (जिनानां च) RS. 14 यें T.L. यं K.K'. 15 ष्येण All MSS. 16 सु All MSS. 17 वं T.L. 18 रेण MS.K'.T.L. 19 पवरर्षिन RS. 20 र्षी K. 21 दुः All MS. 22 तीषिक MS.K. K'.T.L. 23 不足以爲難•若爲求一句•諸佛所說法•救諸苦惱者•得之甚爲難 Kj. Bb. 24 सि MS.K.K'.L. or ति ? 25 त्वा T. 26 श्च All MSS. 27 रेण MS. 28 प्यात् T.L. 29 ना RS. न च तेषां वशेनोपपद्यते Prose. 30 ष MS.K'.T.L 31 द्य T.L. 32 नि MS.

अत्रस्थिता गुणधरा बहुबुद्धकोट्यः
पूज्यंति निश्चितमना शृणुवंति धर्मं ।
[1]तनुभूतिमि[2]थ्युपगताः परिशुद्धयंति
स्वर्ण[3] यथा विगतदोषप्रमाणतुल्यं ॥ १५ ॥

अत्रस्थिता गुणधरास्त्रिदशाधिपत्यं
का[4]रेन्ति ईश्वरनिवर्तितकामरागाः ।
[5]मनुसंघनेकविविधां कुशलान [6]रागात्
स्थापेन्त्यनन्यमन बुद्धगुणाभिलाषे[7] ॥ १६ ॥

अत्रस्थिता जिनसुता विरियारभंते
लब्धा[8] समाधिन सहस्रशतं अनूनं ।
पश्यन्ति बुद्धव[9]र[10]लक्षणचित्रगात्रां
भूयो अतः प्रणिधिश्रेष्ठगुणाप्रमाणाः ॥ १७ ॥

[11]इत्येषा तृ[12]तीया भू[13]मिर्निर्दिष्टा सुगतात्मजाः ।
सर्वलोकहितैषिणां बोधिसत्त्वानं[14] नुत्तमा ॥ १८ ॥

प्रभाकरी नाम तृतीया बोधिसत्त्वभूमिः ॥ ३ ॥

---

[15]एवं श्रुणित्व[16] च[17]रणं विपुलं [18]भूम्यतिभूमि[19]परिमितं प्रवरं ।

1 तत्रभूमि T.L. तनुभूत्व RS. 斷邪愛恚等•餘煩惱微薄 Kj. 斷邪愛恚癡•諸縛悉微薄 Bb. 斷諸邪惑轉明淨 Śdh. 2 थ्याप MS.K.K'.T.L. थ्यप RS. 3 र्णे RS. र्ण T.L.K'. 4 रयन्ति T. रन्ति K.L. 5 रु MS.K.K'. 6 मार्गे RS. रागां K.K'. 7 ष K. भे K'. 8 or ब्ध्वा? 9 ल MS. 10 चित्रितां गात्रां T.K.L. 11 Metre: श्लोक 12 ती All MSS. 13 मिः MS.K.K'. मी T.L. 14 नमु T.L.K'. न उ K. 15 चतुर्थी भूमिः, Metre: पदाकुलक (मात्रसम आर्या) 16 त्वा MS.K.K'.T.L. 17 ल T. 18 भूम्याविभूमिनरचितप्रवरं L. भूम्युत्तमं मनुरमं प्रवरं RS. 19 無有量 Kj. Bb.

[1]संहर्षिता जिनसुतात्तमना[2] अभ्याकिरंति कुसुमेभि जिनं ॥ १ ॥
संकम्पिता लवणतोयधरा[3] इह धर्मदेशनमुदीरयतां ।
[4]मरुकन्यका अभिमनोरुचिराः[5] संगीतियुक्तवरधर्मरता[6] ॥ २ ॥
वसंवर्तिदेवपति[7] आत्तमना[8] मणिरत्नदिव्य[9][10] सुगतस्य क्षिपी ।
वाचं[11] अभाषि[12] अर्थवदजिनो[13] उत्पन्न अर्थगुणपारगतः[14] ॥ ३ ॥
किं कारणं तथ हि धर्मवरं संबोधिसत्त्वचरणं परमं ।
भूमिर्विदून[15] इयमद्य[16] श्रुता यस्याश्रवो[17] दुर्लभु[18] कल्पशतैः ॥ ४ ॥
भूयः प्रभाष नरदेवहिता चर्यां वरां जिनसुतान विदू[19] ।
श्रोष्यंतिमे[20] मरुतसंघगणा भूतं विनिश्चयमनन्यपदं ॥ ५ ॥
[21]विमुक्तिचंद्रं[22] पुनर्वीरालपी[23] सुगतात्मजां ।
चतुर्थीसंक्रमंतानां[24] गोचरं भण[25] उत्तमं ॥ ६ ॥

वज्रगर्भो[26] बोधिसत्त्व आह ॥

यो ऽयं भवंतो जिनपुत्रा बोधिसत्त्वस्तृतीयायां बोधिसत्त्वभूमौ सुपरिशुद्धालोकश्[27]चतुर्थीं[28] बोधिसत्त्वभूमिमाक्रमति[29] । स दशभिर्धर्मालोकप्रवेशैराक्रमति[30][31] । कतमैर्दशभिर्यदुत । सत्त्वधातुविचारणालोकप्रवेशेन[32][33] च । लोकधातुविचारणालोकप्रवेशेन च । धर्मधातुविचारणालोकप्रवेशेन च । आकाशधातुविचारणालोकप्रवेशेन च । विज्ञानधातुविचारणालोकप्र-

1 सहायितो MS. (सहाय्रिनो) RS. सहामिता T.L. 2 नाः MS. 3 राः MS. 4 मे T. 5 मनुगरुचिराः MS.K.K'. or मनसरुचिराः ? 6 क्ता T.L. 7 श T.K'. 8 रा MS.T.L. 9 नाः MS. 10 त्न T.K.K'. 11 चमभा MS. 12 षित्वा अर्थवेदजिनो K. षि अथ एव जिनो T.L. 13 नः K'. 14 तो MS.K.T.L. 15 र MS. 16 भ्य MS. or भ्या ? 17 वा K. 18 भ MS.K.K'. 19 दु K. दूः MS. 20 ते RS. (मे=इमे Tib.) RS. 21 Metre : श्लोक 22 न्द्रः MS. 23 रा आल MS. रो आला RS. 24 संज्ञानां गो T 25 न T.L. 26 र्भ आह K. 27 च T. 28 र्थी MS. 29 क्रा T. 30 शेना K'. 31 क्रा T. 32 लना T. रणां MS. 33 के T.

वेशेन च । कामधातुविचारणालोकप्रवेशेन च । रूपधातुविचारणालोकप्रवेशेन च । अ[1]रूप्यधातुविचारणालोकप्रवेशेन च । उदाराश[2]याधिमुक्तिधातुविचारणालोकप्रवेशेन च । महात्म्याशयाधि[3]मुक्तिधातुविचारणालोकप्रवेशेन च । एभिर्दशभिर्धर्मालोकप्रवेशै[4]राक्र[5]मति । तत्र भवंतो जिनपुत्रा अर्चिष्मत्यां बोधिसत्त्वभूमेः सह प्रतिलंभेन बोधिसत्त्वः संवृत्तो भवति तथागतकुले तदात्मकधर्मप्रतिलंभाय दशभिर्ज्ञानपरिपाचकै[6]र्धर्मैः । कतमैर्दशभिर्यदुत । अप्रत्युदावर्त्याशयतया च । त्रिरत्नाभेद्यप्रसादनिष्ठागमनतया च । संस्कारोदयव्ययविभावनतया च । स्वभावानुत्पत्तिविभावनतया च । लोक[7]प्रवृत्तिनिवृत्तिविभावनतया च । क[8]र्मभवोपपत्तिविभावनतया च । संसारनिर्वाणविभावनतया च । सत्त्व[9]क्षेत्र[10]कर्मविभावनतया च । पूर्वान्तापरान्तविभावनतया च । [11]अभावक्षयविभावनतया च । एभिर्भवंतो जिनपुत्रा[12] दशभिर्ज्ञानपरिपाचकैर्धर्मैः समन्वागतो बोधिसत्त्वः संवृत्तो भवति तथागतकुले तदात्म[13]कधर्मप्रतिलंभाय । स खलु पुनर्भवंतो जिनपुत्रा बोधिसत्त्वो ऽस्यामर्चिष्मत्यां बोधिसत्त्वभूमौ प्रतिष्ठितो[14] ऽध्यात्मकाये काया[15]नुदर्शी विहरत्याता[16]पी संप्रजानन्स्मृतिमान्[17] विनीय लोके ऽभिध्यादौर्मनस्ये[18] । वहिर्धा[19]काये[20] काया[21]नुदर्शी विहरत्यातापी संप्रजानन्स्मृति[22]मान् विनीय लोके ऽभिध्यादौर्मनस्ये[23] । अध्यात्मवहिर्धाकाये कायानुदर्शी विहरत्याता[24]पी सं[25]प्रजानन् स्मृतिमान् विनीय लोके ऽभिध्यादौर्मनस्ये । एवमे[26]वाध्यात्म[27]वेदनासु[28] वहिर्धावेदनासु । [29]अध्यात्मवहिर्धावेदनासु । अध्यात्मचित्ते वहिर्धाचित्ते । अध्यात्मवहिर्धाचित्ते । अध्यात्म[30]धर्मेषु धर्मानुदर्शी विहरत्यातापी संप्रजानन्स्मृतिमान् वि-

1 आरूप्य MS. अरूप K. 2 शया—T. 3 वि MS.K.K'. 4 शेना K. 5 क्रा T. 6 नै T. 7 प्रतिपत्तिविभाव MS.K.K'. 8 र्मो T. 9 वं MS.K.K'. 10 ध T. 11 स्त्र MS.K.K'. 12 त्राः MS. 13 कं MS. 14 तः सन्नध्या T. 15 नुपदर्शी MS.K'. 16 पि T. 17 न्वि K. 18 स्य MS.K. 19 र्धां T. 20 य K. 21 नुपदर्शी MS.K.K'. 22 मां T. 23 स्य अध्या K.K'. 24 पि T. 25 प्र—MS.K'. 26 मध्या T.K. 27 त्मं T. 28 सु—MS. 29 एवमध्यात्मं वेदना T. अध्यात्मवेदना MS. 30 त्मं T.

नीय लोके ऽभिध्यादौर्मनस्ये । बहिर्धाधर्मेषु धर्मानुदर्शी विहरत्यातापी संप्रजानन्स्मृतिमान् विनीय लोके ऽभिध्यादौर्मनस्ये । [1]एवमध्यात्मं[2]बहिर्धाधर्मेषु धर्मानुदर्शी विहरत्यातापी संप्रजानन्स्मृतिमान् विनीय लोके ऽभिध्यादौर्मनस्ये । सो ऽनुत्पन्नानां पापकानामकुशलानां धर्मानामनुत्पादाय छंदं जनयति व्यायच्छते । वीर्यमारभते चित्तं [3]प्रगृह्णाति सम्यक्प्रणिदधाति । उत्पन्नानां पापकानामकुशलानां धर्माणां[4] प्रहाणाय छंदं जनयति व्यायच्छते । वीर्यमारभते चित्तं [5]प्रगृह्णाति सम्यक्प्रणिदधाति । अनुत्पन्नानां कुशलानां धर्माणामुत्पादाय छंदं जनयति व्यायच्छते । वीर्यमारभते । चित्तं [6]प्रगृह्णाति सम्यक्प्रणिदधाति । उत्पन्नानां कुशलानां धर्माणां स्थितये ऽसंप्रमोषाय वैपुल्याय भूयो भावाय [7]भावनाय परि[8]पूरये छंदं जनयति व्यायच्छते वीर्यमारभते । चित्तं प्रगृह्णाति सम्यक्प्रणिदधाति । छंदं[9]समाधिप्रहाणसंस्कारसमन्वागतमृ[10]द्धिपादं[11] भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्ग[12]परिणतं[13] । वीर्यसमाधिप्रहाणसंस्कारसमन्वागतमृद्धिपादं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । चित्तसमाधिप्रहाणसंस्कारसमन्वागतमृद्धिपादं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । मीमांसासमाधिप्रहाणसंस्कारसमन्वागतमृद्धिपादं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । स शुद्धेन्द्रियं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । वीर्येन्द्रियं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । स्मृतींद्रियं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । समाधीन्द्रियं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । प्रज्ञेन्द्रियं भावयति । विवेकनि-

1 अध्या T. 2 त्मं T. 3 प्रतिगृ T. 4 नां T. 5 प्रतिगृ T. 6 प्रतिगृ T. 7 भावनाय—T.
8 पूर्यैं K.K'. 9 न्दं T. 10 or ऋ? 11 भावं K'. 12 निश्रिनं K. 13 न T.

श्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । श्रद्धाबलं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । वीर्यबलं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । स्मृतिबलं भावयति । विवेकविश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । समाधिबलं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । प्रज्ञाबलं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । स्मृतिसंबोध्यंगं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । धर्मप्रविचयसंबोध्यंगं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । वीर्यसंबोध्यंगं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । प्रीतिसंबोध्यंगं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । प्रस्रब्धिसंबोध्यंगं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं समाधिसंबोध्यंगं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । उपेक्षासंबोध्यंगं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । सम्यक्संकल्पं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । सम्यग्दृष्टिं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । सम्यग्वाचं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । सम्यक्कर्मान्तं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । सम्यगाजीवं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । सम्यग्व्यायामं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं । सम्यक्स्मृतिं भावयति । विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं ।

सम्यक्समाधिं भावयति। विवेकनिश्रितं विरागनिश्रितं निरोधनिश्रितं व्यवसर्गपरिणतं।
[1]तच्च सर्वसत्त्व[2]सापेक्षतया च। पूर्वप्रणिधानाभिनिर्हारोपस्तब्धतया च। महाकरुणापूर्वंग-
मतया च। महामैत्र्युपेततया च। सर्वज्ञज्ञानाध्यालंबनतया च। बुद्धक्षेत्रवि[3]टपनालंका-
[4]राभिनिर्हारतया च। [5]सर्वतथागत[6]बलवैशारद्यावेनिकबुद्धधर्मलक्षणानुव्यंजन[7]स्व[8]रघोषसम्प-
[9]दाभिनि[10]र्हारतया च। उत्तरोत्तरवैशेषिक[11]धर्मपरिमार्गणतया च। गंभीरबुद्धधर्मविमोक्षश्र-
[12]वणानुगमनतया च। महोपायकौशल्य[13]बलविचारणतया च। तस्य खलु पुनर्भवंतो जि-
नपुत्र बोधिसत्त्वस्यास्यामर्चिष्मत्यां बोधिसत्त्वभूमौ स्थितस्य यानीमानि सत्कायदृष्टिपूर्वंग-
मान्[14]यात्मसत्त्वजीवपोष[15]पुरुष[16]पुंगलस्कंधधात्वा[17]यतनाभिनिवेशसमु[18]च्छ्रितानि। उन्मिंजितनि-
[19]मिंजितानि [20]विचिन्तितानि वितर्कितानि [21]विचारितानि केलायितानि ममायितानि [22]धना-
यितानि निकेतस्थानानि [23]तान्यस्य सर्वाणि विगतानि भव[24]न्ति। स [25]यानीमानि कर्माण्य-
करणीयानि सम्यक्संबुद्ध[26]विवर्णितानि संक्लेशोपसंहितानि [27]तानि सर्वेण सर्वं प्रजहाति। यानि
[28]चेमानि कर्माणि करणीयानि सम्यक्संबुद्धप्रशस्तानि बोधि[29]मार्गसंभारानुकूलानि [30]स तानि
समादा[31]य वर्तते। [32]स भूयस्या मात्रया [33]यथा यथोपायप्रज्ञाभिनिर्हृतानि मार्गसमुदागमा[34]य
मार्गांगानि भावयति। तथा तथा स्निग्धचित्तश्च भवति। मृदुचित्तश्[35]च कर्मण्यचित्तश्[36]च हित-
सुखावहचित्तश्च। अपरि[37]क्लिष्टचित्तश्चोत्तरोत्तरविशेषपरिमा[38]र्गणचित्तश्च। ज्ञानविशे[39]षाभिला-
[40]षचित्तश्च [41]सर्वजगत्परित्राणचित्तश्च। गुरुगौरवानुकूलचित्तश्च यथाश्रुतधर्मप्रतिपत्तिचित्तश्च

1 तं च T. 2 सो MS. 3 थ T.K'. 4 ला T. 5 सर्व–T. 6 बल–MS.K. 7 न+बुद्ध All MSS. 8 रु MS.K.T. 9 दो T. 10 हिंरण T. 11 क MS.K'. 12 वानु MS.K.K'. 13 लवि-चा T. 14 नि आत्म T. 15 पुरुष–R. 16 पुद्गल R. 17 यतना–MS.K.K'. 18 च्छि K. ष्टि T. 19 मिञ्जितानि K.K'. 20 विचित्तानि T. विचिन्तितानि–MS.K.K'. 21 विचारितानि–T.K.K'. 22 परा T. 23 तानि सर्वाणि T. 24 न्ति+स्म R. 25 नि T. 26 वि–T. 27 तानि–T. 28 चे–T. 29 धि+सत्त्व T. 30 स–T. 31 न T. 32 स–MS.K. 33 यथा–K. 34 य–K. 35 श्च+भवति T. 36 श्च–T. 37 क्लि T. 38 णा MS.K.K'. 39 षो T. 40 भ K'. 41 स 9 श्च–MS.

भवति । स कृतज्ञश्च भवति । कृतवेदी[1] च शूरतम[2]श्च सुख[3]संवासश्च ऋजुश्च मृदुश्च अ[4]गहनचारी च निर्मायश्[5]च निर्माणश्च सु[6]वचाश्च प्रदक्षिणग्राही च[7] भवति । स एवं क्ष[8]मोपेत एवं दमोपेत एवं शमोपेत एवं क्षमदमश[9]मोपेतः । उत्तराणि भूमिपरिशोध[10]कानि मार्गांगानि मनसिकुर्वाणः समुदाचा[11]रन्नप्रति[12]प्रस्रब्धवीर्यश्च [13]भवति । अपरिक्लिष्टवीर्यश्चा[14]प्रत्युदावर्त्यवीर्यश्च विपुलवीर्यश्चा[15]नन्तवीर्यश्च । उत्तप्तवीर्यश्चा[16][17]समवीर्यश्चासंहार्यवीर्यश्च सर्वसत्त्वपरिपाचनवीर्यश्च नयानयवि[18]भक्तवीर्यश्च । तस्य भूयस्या मात्रया आशयधातुश्च विशुद्ध्यति । अध्याशयधातुश्च न [19]विप्र[20]वशति । अधिमुक्तिधातुश्चोत्तप्यते । कुशलमूलविवृद्धि[21]श्चोपजायते । लोकमल[22]कषायतां च[23]ापगच्छति । सर्वसंशयविमतिसंदेहाश्चास्योच्छिद्यन्ते[24] । निष्कांक्षा[25]भिमुखता च परिपूर्यते । प्रीतिप्रस्रब्धी च समुदागच्छति । तथागताधिष्ठानं चाभि[26]मुखीभवति । अप्रमाणचित्ताशयता च समुदागच्छति । तस्यास्यामर्चिष्मत्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्य बहवो बुद्धा आभासमागच्छं[27]त्यौदारिकदर्शनेन प्रणिधानबलेन च । बहूनि बुद्धशतानि बहूनि बुद्धसहस्राणि बहूनि बुद्धशतसहस्राणि बहूनि बुद्धनियुतशतसहस्राणि बहवो बुद्धकोट्यो बहूनि बुद्धकोटीशतानि बहूनि बुद्धकोटीसहस्राणि बहूनि बुद्धकोटीशतसहस्राणि बहूनि बुद्धकोटीनि[28]युतशतसहस्राण्या[29]भासमागच्छं[30]त्यौदारिकदर्शनेन प्रणिधानबलेन च । स तांस्तथागतानर्हतः सम्यक्संबुद्धान्दृ[31]ष्ट्वोदाराध्याशयतया सत्करोति मानयति पूजयति । चीवरपिण्डपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैश्च प्रतिपादयति बोधिसत्त्वसुखोपधानं[32] चोपसंहरति । संघगणसंमान[33]नां च करोति । तानि च कुशलमूलान्य-

1 री MS. 2 म—MS.K'.T. 3 खं T. 4 अं MS. 5 श्च—MS. 6 सुवचाश्च—T. 7 च—T. 8 द K. 9 स MS. 10 भनानि MS. धनानि K.K'. 11 च MS.K.K'. 12 पत्तिवीर्य K. 13 भवति—T. 14 श्च भवति। अप्र T. 15 श्च अन T.K'. 16 श्च अस T. 17 समवीर्यश्चा—K. 18 वि T. 19 वि—MS.K.K'. 20 विशति MS.K.K'. 21 श्चाजा T. 22 कल्मापतां T. 23 चो K. वा K'. 24 न्तो MS. ते K. 25 क्षो MS. 26 भि—T. 27 ति। औ T. 28 नयुत T.K'. 29 णि आ T.K. 30 ति औ T. 31 ष्ट्रा उदा T. 32 नश्चो (श्चो ?) T. 33 नं च करोति T.

नुत्तरायां सम्यक्संबोधौ परिणामयति। तांश्च तथागतानर्हतः सम्यक्संबुद्धान्पर्युपास्ते। तेषां च धर्मदेशनां सत्कृत्य शृणोति उद्गृह्णाति धारयति श्रुत्वा च यथाभजमानं प्रतिपत्त्या संपादयति। भूयस्त्वेन च तेषां तथागतानां शासने प्रव्रजति। तस्य भूयस्या मात्रया आशयाध्याशयाधि[1]मुक्ति[2]समता विशुद्ध्यति। तस्यास्यामर्चिष्मत्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्यानेकान्कल्पाननेकानि कल्पशतानि। अनेकानि कल्पसहस्राणि। अनेकानि कल्पशतसहस्राणि। अनेकानि कल्पनियुतशतसहस्राणि। अनेकाः कल्पकोटीः। अनेकानि कल्पको[3]टीशतानि। अनेकानि कल्पकोटीसहस्राणि। अनेकानि कल्पकोटीशतसहस्राणि। अनेकानि कल्पकोटीनियुतशतसहस्राणि। आशयाध्याशयाधिमुक्तिसमताविशुद्धिस्तिष्ठति। तानि चास्य कुशलमूलानि सूत्तप्तानि प्रभास्वरतराणि च भवंति। तद्यथापि नाम भवंतो जिनपुत्रास्तदेव जातरूपं कुशलेन कर्मारेणाभर[4]णीकृतमसंहार्यं[5] भवति। तदन्यैरकृताभरणैर्जातरूपैरेवमेव भवंतो जिनपुत्रा बोधिसत्त्वस्यास्यामर्चिष्मत्यां बोधिसत्त्वभूमौ स्थितस्य तानि कुशलमूलान्यसंहार्याणि भवंति। तदन्येषामधरभूमिस्थितानां बोधिसत्त्वानां कुशलमूलैः। तद्यथापि नाम भवंतो जिनपुत्रा मणिरत्नं जातप्रभं[6] परिशुद्धरश्मिमंडलमालोक[7]प्रमुक्तमसंहार्यं भवति। तदन्यैरपि शुद्धप्रभैः[8] रत्नजातैरनाच्छेद्यप्रभं[9] च भवति सर्वमारुतोदकप्रवर्षैः[10]। एवमेव भवंतो जिनपुत्रा बोधिसत्त्वो ऽस्यास्यामर्चिष्मत्यां बोधिसत्त्वभूमौ स्थितः [11]सन्नसंहार्यो भवति। तदन्यैरधरभूमिस्थितैर्बोधिसत्त्वैरनाच्छेद्यज्ञानश्च भवति सर्वमारक्लेशसमुदाचारैः। तस्य चतुर्भ्यः संग्रहवस्तुभ्यः समानार्थतातिरिक्ततमा भवति। दशभ्यः पारमिताभ्यो वीर्यपारमिता[12]तिरिक्ततमा भवति। न च परिशेषासु न समुदागच्छति। यथाबलं यथाभजमानमियं भवंतो जिनपुत्रा बोधिसत्त्वस्यार्चिष्मती नाम

1 वि MS.K.K'. 2 श K'. 3 टि K. 4 णा MS. 5 नि। असं T. 6 भवं T. 7 के MS.K.K'.
8 भजातै T. 9 भासं T. 10 पः T. 11 असं T. 12 ता अति T.

चतुर्थी[1] बोधिसत्त्वभूमिः[2] समास[3]निर्दिशतः। यस्यां प्रतिष्ठितो बोधिसत्त्वो भूयस्त्वेन सुयामो भवति देवराजः कृती प्रभुः। सत्त्वानां सत्कायदृष्टिसमुद्घाताय कुशलः सत्त्वान्सम्यग्दर्शने प्रतिष्ठापयितुं। यच्च किं चित्कर्मारभते दनेन वा प्रियवद्यतया वा अर्थक्रियथा वा समानार्थतया वा। तत्सर्वमविरहितं बुद्धमनसिकारैर्धर्ममनसिकारैः संघमनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्यामनसिकारैः पारमितामनसिकारैर्भूमिमनसिकारैर्बलमनसिकारैर्वैशारद्यमनसिकारैरावेणिकबुद्धधर्ममनसिकारैर्यावत्सर्वाकारवरोपेतसर्वज्ञज्ञानमनसिकारैः। किमिति सर्वसत्त्वानानग्र्यो भवेयं श्रेष्ठो ज्येष्ठो वरः प्रवर उत्तमोनुत्तमो नायको विनायकः परिणायकः। यावत्सर्वज्ञज्ञानप्रतिशरणो भवेयमि[4]ाकांक्षंश्च तथारूपं वीर्यमारभते यथारूपेण वीर्यारंभेण एकक्षणलवमुहूर्तेन समाधिकोटीशतं च प्रतिलभते[5] बुद्धकोटीशतं च पश्यति तेषां चाधिष्ठानं संजानीते लोकधातुकोटीशतं च कंपयति क्षेत्रकोटीशतं चाक्रमति लोकधातुकोटीशतं चावभासयति सत्त्वकोटीशतं च परिपाचयति कल्पकोटीशतं च तिष्ठति कल्पकोटीशतं च पूर्वांतापरांततः प्रविशति धर्ममुखकोटीशतं च प्रविचिनोति कायकोटीशतं चादर्शयति कायं कायं च बोधिसत्त्वकोटीशतपरिवारमादर्शयति। तत उत्तरे[6] प्रणिधानबलिका बोधिसत्त्वाः प्रणिधानवैशेषिकतया विकुर्वंति। येषां न सुकरा संख्या कर्तुं कायस्य वा प्रभाया वा ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्याया वा व्यूहस्य वा अधिष्ठानस्य वा अधिमुक्तेर्वा अभिसंस्काराणां वा यावदेतावद्भिरपि कल्पकोटीनियुतशतसहस्रैरिति ॥

अथ खलु वज्रगर्भो बोधिसत्त्व एतदेव भूम्यर्थं प्ररूपयमाणस्तस्यां वेलायामिमां[7] गाथा अभाषत ॥

1 र्थीं K. 2 मी MS. 3 श T. 4 मिति। आक्षां T. 5 ते+समापद्यते च T. 6 रेण T. 7 मां गाथामभाषतः MS.

[1]परि[2]कर्मिणस्तृ[3]तियभूमिप्रभंक[4]रायां
[5]सत्त्वचर्य लोक तथ धर्म विचार्यमाणाः ।
आकाशधातु मनधातु त्रयश्च धातु
अधिमुक्तिआशयविशुद्धि समाक्रमंति[6] ॥ १ ॥
सह प्राप्तु अर्चिष्मति[7]भूमि[8] महानुभावः
संवृत्तु शास्तु कुलि भूयु विवर्ति[9]यत्वे ।
[10]आभेद्य बुद्धरतने तथ धर्मसंघे
उदय[11]व्ययास्थितिनिरीहक प्रेक्षमाणः[12] ॥ २ ॥
लोकप्रवृत्तिक्रियकर्मभवोपपत्तिं
संसारनि[13]वृ[14]त्तिविभावनक्षेत्रसत्त्वान् ।
धर्मां[15] च [16]पूर्व[17]अपरांतक्षयानु[18]त्पादं
संवृ[19]त्तु भावयति शास्तृ[20]कुलानुवर्ती[21] ॥ ३ ॥
सो[22] ए[23]वु[24]धर्मु[25]समुपेतु हितानु[26]कंपी
भावेति कायमपि वेदनचित्तधर्मां ।
अध्यात्मबाह्युभयथा विदु भाव[27]यंति

1 metre: वसंततिलका, परि=नि MS. 2 णा तृ MS. ता तृ K.K'. 3 तीया MS. 4 र T. 5 सत्त्वधातु-विचारणालोकप्रवेश, लोक°, धर्म°, आकाश°, विज्ञान°, काम°, रूप°, आरूप्य°, उदाराशयाधिमुक्ति°, महात्म्याशयाधिमुक्ति° Prose, सत्त्व=सर्व L. 6 ती K. 7 ती MS.T.K.K'. 8 म्य MS.K'.T. 9 यैत्वे K. यते MS. सत्त्वे T.L. 10 अ MS.K. 11 व्यया–L. 12 णैः MS. नः T. 13 वृ MS.K.K'. 14 सत्त्वक्षेत्रकर्मविभावनतया Prose. 15 र्मांञ्च RS. मांच्च MS. 16 觀前後際無性盡 Śdh. 觀前後際亦觀盡 Śn. 觀法先後際常滅不住相 Bb. 觀法先後際不住常滅相 Kj. 以法爲無始所興無盡際 Dhr. 17 म All MSS. 18 भावं K'. 19 त्त MS.K.K'. 20 स्तु RS. स्त्व T.L. 21 र्तिं K.L. 22 स T.L. 23 एष MS. एषु K. 得是法已 Śdh. Śn. 得如是法已 Bb. Kj. 積累法如是 Dhr. 24 र्म MS.T. 25 त MS. 26 पि T. 27 येMS. या T.K.K'.L.

स्मृत्योपस्थानभा[1]वना [2]निके[3]तवर्जिता ॥ ४ ॥
पापक्षयात्कुशलधर्मविवर्धि[4]ता च
सम्यक्[5]प्रहा[6]नचतुरो[7] विदु भावयंति ।
चतुऋद्धिपादबलइंद्रिय भावयंति
बोध्यंगरत्नरुचिरं तथ[8] मार्गश्रेष्ठं ॥ ५ ॥

भावें[9]ति तां जनहि[10]तं समवेक्ष्य[11] बुद्धिं[12]
उ[13]पस्तंभयन्ति[14] प्रणिधिं[15] [16]कृतपूर्वमैत्राः ।
सर्वज्ञज्ञानमभिप्रार्थन बुद्धक्षेत्रं
बलश्रेष्ठमुत्तमपथं अनुचिन्तयन्तः ॥ ६ ॥

वैशारदं अपि च धर्म [17]अहार्य शास्तु-
वरबुद्धघोषमभिप्रार्थयमान धीराः ।
गंभीरमार्गर[18]तनं च विमोक्षस्थानं
महता[19]मुपा[20]यसमुदागम भावयंति ॥ ७ ॥

सत्कायदृष्टिविगताश्च द्विषष्टिदृष्टी[21]
[22]अत्तात्मीयविगता[23]स्तथ[24] जीवलाभं ।
स्कंधास्तु [25]द्वार तथ धातुनि[26]केतस्थानं[27]
सर्वप्रहीण विदुषं चतु[28]र्था[29]यै भू[30]म्यां ॥ ८ ॥

1 or भ ? 2 or निश्रिताविविक्ता ? 依止於厭離 Kj. Bb. 世間貪愛皆除遣 Śn. Śdh. 3 विवर्जितानि MS. K.K'. 4 र्ति MS.K.K'.T. 5 क्प्रणिधाण T. 6 ण RS. 7 रा K. 8 था MS. 9 वं MS.L T.K. 10 यतां RS. हितां MS.K.K'.T.L. 11 क्ष T.L. 12 द्धि MS. 13 प्रस्तं T. 14 ति MS. 15 धि MS.K.K'. 16 कृतं MS. (कृप) RS. or कृपमैत्रपूर्वाः ? 17 असंहार्य T.K.K'. 18 त्नं All MSS. 19 नु MS. or उ ? 20 दा+य T. 21 ष्टीं MS. 22 आत्मात्मीये MS.K.K'. 23 तां T.L. 24 था MS. 25 (द्वार=आयतन Tib.) RS. 26 कै L. 27 न K'. 28 र्थाय MS.K.K'. थ्या RS. 29 यां T. 30 म्य K.

सो[1] यानिमानि सुगतेन विव[2]र्णितानि
कर्माणि क्लेशसहजा[3]नि अनर्थकानि[4] ।
तानी प्रहाय विदु आशयता[5] विशुद्धा[6]
[7]कर्मारभन्ति कुशलं जगता[8]यणार्थं ॥ ९ ॥

सुस्निग्धचित्तु[9] भवते[10] विदु [11]अप्रमत्तो
[12]मृदुमार्दवार्जवहितः[13] सुखआवहश्च ।
अपरीकिलिष्टु[14] परिमार्गति उत्तमार्थं[15]
[16]ज्ञानं विशेषमभिलाषि जगा[17]र्थचारी ॥ १० ॥

गुरुगौरवेषुपगतः प्रतिपत्तिकामो
भवते कृतज्ञ [18]सुवनाश्च अकुहक[19]श्च ।
[20]निर्मायता[21]समतआश्रयशू[22]रतश्च
अविवर्त्यवीर्यु भवते समुदानयं[23]तु ॥ ११ ॥

तस्या[24]र्थं भूमि[25]रुचिरा[26]य प्रतिष्ठितस्य
अध्याशयं अपि च शुद्धि[27]मुपे[28]ति ध[29]र्मे ।
अधिमुक्ति[30] त[31]प्यति विव[32]र्धति शुक्लधर्मो

1 सा MS.K.K'. 2 त्ति MS. 3 या K. 4 णि L. 5 ते K. तो K'. 6 द्धो T.K.K'.L. 7 धर्मा All MSS. कर्मा Kj. Bb. Śn. Śdh. 諸所作善業皆爲救世間 Bb. Kj. 8 त्रायना T. त्रायणा K.K'. 9 त्त MS. K.K'. 10 तो MS. 11 or आप्र ? 12 मृदुचित्तु सार्जव हिता सुख आवहवश्च RS. 13 त MS. K.K'. 14 किरिष्ट T. क्लिष्टु K'. क्लिष्टश्च RS. 15 र्थ T. 16 ज्ञान T. ज्ञानाभिषेक 大智慧職位 Bb. Kj. 受職 Śn. 受灌頂 Śdh. 聖慧 (ज्ञानं विशेष) Dhr. 17 ना MS.K'. 18 सुवरा MS. सुवचा T.K.L. सुमना RS. 易悔 Śdh. 易誨 Śn. 易化 Bb. Kj. 19 का MS.K.K'. 20 無有邪曲心 Kj. Bb. निर्मानता 無慢 Dhr. 捨慢 Śn. Śdh. 21 सुगत आशय MS.K. सुगत आश्रय T.L. गहन आशय RS. 同止樂 Kj. Bb. 22 शूरश्च MS.K.K'. शूरेताश्च T. 23 यन्तं L. यन्तः RS. 24 र्थ MS. त्व RS. अथ, अध, अधा, 又 Śdh. 25 म्यि MS. म्यु T.L. 26 ता K. 27 द्धि All MSS. 28 उ T.K'.L. 29 र्म MS. र्मा T. र्मां L. 30 क्ष MS.K. क्षु K'. 31 तस्य पि MS. 治 Dhr. 轉得明淨 Kj. 32 धा T.

मलकल्मषं विमतिसंशय सर्व यन्ति ॥ १२ ॥
अत्रस्थिता नरवरर्षभ बोधिसत्त्वाः
सुगताननेकनयुतानभिपूजयंति ।
शृण्[1]वंति धर्म य[2]थ शासनि प्रव्रजंति
असंहार्य [3]शान्तिकृतकांचनभूषणं वा ॥ १३ ॥
अत्रस्थितान विदु[4]षां गु[5]णआ[6]शयं च
ज्ञानं[7] उपायचरणं च विशुद्धिमार्गः ।
नो शक्[8]कु मारन[9]युतेहि निवर्तनाय
[10]रतुनं प्रभाव यथ वर्षजलैरहा[11]र्यं ॥ १४ ॥
अत्रस्थिता [12]विदु नरामरु[13]पूजनार्हा
भोंती सुयामपति[14] ईश्वरधर्मचारी ।
सत्त्वानि दृष्टिगहनाद्विनिवर्तयंति
संभारयंति[15] कुशलां जिनज्ञानहेतोः ॥ १५ ॥
वीर्योपुपेत [16]तथ कोटि नरर्षभाणां[17]
पश्यंति [18]नान्यमनसः [19]सुसमाहितत्वात् ।
तत उत्त[20]रीम् बहुकल्पामभिनिर्हरंति
ज्ञानाक[21]राप्रणिधिश्रेष्ठगुणार्थचारी ॥ १६ ॥

1 णों L. 2 प T.L. 3 शक्य RS. 4 ना MS K.T. 5 功勲志性和 Dhr. 諸功德深心 Kj. Bb. 具功德 Śn Śdh. 6 मा MS.K K'.L. 7 नमुपा K K'.L. 8 क्त MS. क्यु T.L. क्रु K'. 9 ण T.L. 10 रत्नप्रभेव T.L. 11 र्यां MS K K'. य RS. 12 विदु—All MSS. 13 रुद्गुणपू RS. 14 तिरीश्वर K. 15 ति+संभारयंति K. 16 शत RS. 得百億三昧能見百億佛 Kj, Bb. 17 नां K. 18 न RS. 19 等持 Śdh. 三昧 Śn. Kj. Bb. 20 रींसु बहु MS.K.K'.T. 21 का MS.K.K'.

चतुर्थी[1][2] इतियं[3][4] भूमि[5] विशुद्धा[6] शुभचारिणी[7] ।
गुणार्थज्ञानयुक्तानां निर्दिष्टा[8] सुगतात्मजाः[9] ॥ १७ ॥

अर्चिष्मती नाम चतुर्थी बोधिसत्त्वभूमिः ॥ ४ ॥

[10]हव्येते बहुतः शिखी[11] खगपथेयार्चिभिरुद्गीयते[12]
यस्यां[13] ज्ञानमयीभिरीश्वरसुतः[14] संस्वत्सुसंबुद्धवत्[15] ।
[16]अस्मादेव च कारणान्निगदिता यार्चिष्मतीरीश्वरै-
स्तां लोके र्च्यतमां नमामि शिरसा[17] भूमिं चतुर्थीमहं ॥

---

[18]चरणमथ[19] श्रुणित्वा भूमिश्रेष्ठां[20] विदूनां[21][22]
जिनसुत परितुष्टा हर्षिता धर्महेतोः[23] ।
गगनि[24] कुसुमवर्षं उत्सृजंती उदग्राः
साधु सुगतपुत्र[25] व्याहृतं तं[26] महात्मं[27] ॥ १ ॥
मरुपतिवशवर्ती[28] सार्ध देवीगणेन[29]
खगपथि[30][31] सुगतस्या पूजनार्थं[32] उदग्राः[33] ।
विविधरुचिरमेघाः स्निग्धआभा मनोज्ञा[34]
अभिकिर सुगतस्या हर्षिताः प्रीणिताश्च[35] ॥ २ ॥
गीतरुतमनोज्ञा वाद्य[36]तूर्या[37]भिनादा

1 Metre : श्लोक 2 र्थी+यं K. 3 ती L. 4 यं–K. 5 मी MS. 6 र्वि K'. 7 द्ध MT.K'. 8 ष्टा: K.K' 9 जा T.L. 10 Metre : शारुदूरविक्रीडिता,–Sdh. Śn. Kj. Bb. Dhr. RS. हव्येन L. हव्यते K. 11 शी T. 12 पगीयते K'. द्धा (द्मा ?) षते T.L. 13 स्या MS. 14 या T.L. 15 or श ? 16 अस्यां देव All MSS. 17 सि T.L. 18 पञ्चमी भूमिः, Metre : मालिनी 19 श MS. 20 ष्ठ MS.K'. ष्ठा K. 21 दु L. 22 मां K'. 23 धर्मताहेतोः K. 24 णि T. 25 त्ना All MSS. 26 तेन MS. ते RS. 27 त्मना MS.K.K'. 28 र्ति MS.K.K'.T.L. 29 व All MSS. 30 ग T.K.K'. 31 ति All MSS. त RS. 32 र्थमु All MSS. 33 ग्रा K. 34 ज्ञाः MS.K.K' 35 णी T. 36 琴瑟箜篌暢悲哀音 Dhr. 37 द्या T.

देववधु प्र[1]युक्ताः शा[2]स्तु[3] संपूजनार्थं ।

जिनसु[4]त तथरूपं दर्शयं[5]ती [6]धिस्थाने[7]

सर्वरुतस्वरेभी एवशब्दः प्रयुं[8]क्तः ॥ ३ ॥

[9]सुचिरेण [10]आशयु [11] [12]प्रपूर्ण मुनेः सुचिरेण बोधिशि[13]व प्राप्त जिनः[14] [15] ।

सुचिरेण दृष्ट नरदेवहितः संप्राप्त देवपुरि शाक्य[16]मुनिः ॥ ४ ॥

सुचिरेण सागरजलाः क्षुभिताः सुचिरेण आभशु[17]भ मुक्ति[18] जिने[19] ।

सुचिरेण सत्त्वदुखिताः सुखिताः सुचिरेण सा[20]ष्ट श्रु[21]त[22] कारुणिकः ॥ ५ ॥

सुचिरेण संगमु[23] महामुनि[24]ना संप्राप्त सर्वगुणपारमिता[25] ।

[26]मंदमानदर्प प्रजहित्व तमं पूजार्ह[27] पूजित[28] महाश्रमणं ॥ ६ ॥

[29]इह पूजिकृत्व खगमार्गगता इह पूजिकृत्व सुख[30]नेकविधं ।

इह पूजिकृत्व [31]दुखसर्वक्षयो[32] इह पूजिकृत्व जिनज्ञानवरं ॥ ७ ॥

गगनोपमः परमशुद्धि[33] जिनो[34] जगती अलिप्तु[35] यथ पद्म[36] जले ।

[37]अ[38]त्युद्गतो उदधि मेरुरिव हर्षित्व चित्तु जिनपूज यथा[39] ॥ ८ ॥

[40]अथाब्रवीद्वज्रगर्भ[41] [42]मुक्तिचंद्रो विशारदः ।

1 or मु? 2 सा L. 3 स्तुः K.K'. 4 पुत्र MS.K.K'. or पुत? 5 ति All MSS. 6 स्म All MSS. 威神故 Śdh. Śn. 所建立 Dhr. 7 नं RS. 8 or मु? 9 Metre: प्रमिताक्षरा 10 佛願 Śdh. 11 य T. 12 प्रतिपूर्ण All MSS. 13 सि T. 14 or मुनेः? 15 नो MS. 16 का MS. 17 सु L. 18 न्ति MS. 19 मुनेः? 20 सोप्तु MS. सोशु K. शासु RS. 21 or शु? 22 ति K'. 23 म L. 24 नीनां All MSS. 25 तः MS.K'.T.L. 26 聖王能悉破橋慢我心等 Kj. Bb. 27 र्हु RS. 28 म MS. 29 इह पूजिकृत्व खगमार्गगता RS. 能開諸天道・使得一切智 Kj. Bb. 此間供養經還天上 Dhr. 30 प T. 31 दुः All MSS. 32 यौ MS. य K. यः K'. 33 द्व T.K'.L. द्धु RS. 34 नः K'. नु K. 35 प्त L.L'. 36 द्मु RS. 37 大牟尼尊現於世+अ Śdh. Śn. 38 भ्यु RS. 39 था+如是無量諸天女・發此言詞稱讚已・一切恭敬喜充滿・瞻仰如來默然住 Śdh. Śn. 如是諸天女・各以衆妙音・敬心歌頌已・默然而觀佛 Kj. Bb. (de-skad dbyaṅs-su brjod byas-nas | Lha-yi-bu-mo brgya-maṅ-ba | dkad-bas rgyas-pas rab-tu-blta | śin-tu-dkaḥ-bas ri-ma gro-byed ‖ 9 ‖ Tib. Mong. Chin) RS. 40 Metre: श्लोक 41 भं T.K.L. 43 विमुक्ति RS.

पंचम्यां[1] भूम्यां[2] आकारान्निर्दिशस्व विशारद[3] ॥ ९ ॥

वज्रगर्भो बोधिसत्त्व आह ॥

यो ऽयं भवंतो जिनपुत्रा बोधिसत्त्वश्चतुर्थ्यां बोधिसत्त्वभूमौ सुपरिपूर्णमार्गः[4] पंचमीं बोधिसत्त्वभूमिमवतरति[5] । स दशभिश्चित्ताशयविशुद्धि[6]समताभिरवतरति । कतमाभिर्दशभिर्यदुत । अतीतबुद्धधर्मविशुद्ध्याशयसमतया च । अनागतबुद्धधर्मविशुद्ध्याशयसमतया च । प्रत्युत्पन्नबुद्धधर्मविशुद्ध्याशयसमतया च । शीलविशुद्ध्याशयसमतया च । चित्तविशुद्ध्याशयसमतया च । दृष्टिकांक्षाविमतिविलेखापनयनविशुद्ध्याशयसमतया च । मार्गामार्गज्ञानविशुद्ध्याशयसमतया च । प्रतिपत्प्र[7]हाणज्ञानविशुद्ध्याशयसमतया च । सर्वबोधिपक्ष[8]धर्मोत्तरोत्तरविभावनविशुद्ध्याशयसमतया च । सर्वसत्त्वपरिपाचनविशुद्ध्याशयसमतया च । आभिर्दश[9]भिश्चित्ताशयविशुद्ध्याशयसमताभिरवतरति । स खलु पुनर्भवंतो जिनपुत्रा बोधिसत्त्वः[10] पंचमीं बोधिसत्त्वभूमिम्[11]नुप्राप्तः । एषामेव बोधिपक्षाणां[12] मार्गांगानां सुपरिकर्मकृतत्वात्सुपरिशोधिताध्याशयत्वाच्च । भूय उत्तरकाल[13]मार्गविशेषमभिप्रार्थयमानस्तथत्वा[14]यानुप्रतिपन्नश्च । प्रणिधानबलाधानत[15]श्च । कृपामैत्रीभ्यां सर्वसत्त्वा[16]परित्यागतश्च । पुण्यज्ञानसंभारोपचयतश्च । अप्रतिप्रस्रब्धि[17]तश्च । उपायकौशल्या[18]भिनिर्हारतश्च । उत्तरोत्तरभूम्यवभासालोचनतश्च । तथागता[19]धिष्ठान[20]संप्रत्ये[21]षणतश्च । स्मृतिमतिगतिबुद्धिबलाधानतश्च । अप्रत्युदावर्तनीयमनसिकारो भूत्वा । इदं दुःखमार्यसत्यमिति यथाभूतं प्रजानाति । अयं दुःखसमुदयः । अयं दुःखनिरोधः । इयं[22] दुःखनिरोधगामिनी । इदं प्रतिपदार्य[23]सत्यमि-

1 म्या All MSS. 2 म्या T.K'.L. 3 दः All MSS. 4 भूमिमार्ग T. 5 न्ति T. 6 मुक्तिसमता MS.K.K'. 7 तप्र T. 8 क्ष्य K.K'. 9 भिर्भवन्तो जिनपुत्रा बोधिसत्त्वा दशभिश्चित्ताशय T. 10 त्त्व MS. 11 मी MS. 12 क्ष्यमार्ग T. क्ष्यामार्ग K. 13 लं MS.K.K'. र T. 14 त्वानु T. 15 त–MS.K.K'. 16 त्त्व T. 17 ब्धि T. 18 ल MS.K.K'. 19 तज्ज्ञानाधि T. 20 नं MS. 21 पु T. 22 अ All MSS. 23 तृआर्य MS.

ति यथाभूतं प्रजानाति । स संवृत्तिसत्यकुशलश्च भवति । परमार्थसत्यकुशलश्च । लक्षणसत्यकुशलश्च । विभागसत्यकुशलश्च । निस्तीर[1]णसत्यकुशलश्च । वस्तुसत्यकुशलश्च । प्रभवसत्यकुशलश्च । क्षयानुत्पादज्ञानसत्यकुशलश्च । मार्गज्ञानावता[2]रसत्यकुशलश्च । सर्वबोधिसत्त्वभूमिक्रमानु[3]संधिनिष्पादनतया । यावत्तथागतज्ञानसमुद[4]यसत्यकुशलश्च भवति । स परसत्त्वानां यथाश[5]यसंतोषणात्संवृत्ति[6]सत्यं प्रजानाति । एकनयसमवसरणात्परमार्थसत्यं प्रजानाति । स्वसामान्यलक्षणानुबोधाल्लक्षण[7]सत्यं प्रजानाति । धर्मविभागव्यवस्थानानुबोधाद्विभागसत्यं प्रजानाति । स्कंधधात्वायतनव्यवस्थानानुबोधान्निस्ती[8]र[9]णसत्यं प्रजानाति । चित्तशरीरप्रपीडनोपनि[10]पाति[11]तत्वाद्वस्तुसत्यं प्रजानाति । गतिसंधिसंबन्ध[12]नात्प्रभवसत्यं प्रजानाति । सर्वज्व[13]रपरिदाहा[14]त्यंतोपशमात्क्षयानुत्पादज्ञानसत्यं प्रजानाति । अद्वयाभिनिर्हारान्मार्गज्ञानावता[15]रसत्यं प्रजानाति । सर्वाकाराभिसंबोधात्सर्वबोधिसत्त्वभूमिक्रमा[16]नुसंधिनिष्पादनतया । यावत्तथागतज्ञानसमुद[17]यसत्यं प्रजानाति । त[18]च्चाधिमुक्तिज्ञानबलाधानान्न[19] तु खलु[20] पुनर्निरवशेषज्ञानात् । स एवं सत्यकौशल्य[21]ज्ञा[22]नाभिनिर्हृ[23]ततया बुद्ध्या सर्वसंस्कृतं रिक्त[24]तुच्छं मृषामोषधर्मा[25]विसंवादि[26]कं बालालापनमिति यथाभूतं प्रजानाति । तस्य भूयस्या मात्रया सत्त्वेषु महाकरुणाभिमुखीभवति । महामैत्र्या[27]लोकश्च प्रादुर्भवति । स एवं ज्ञानबलाधानप्राप्तः । सर्वस[28]त्त्वसापेक्षा[29]बुद्धज्ञानाभिलाषी पू[30]र्वान्तपरान्तं सर्वसंस्कारगतस्य प्रत्यवेक्षते । यथा पूर्वान्ततो[31] ऽविद्याभवतृष्णा[32]प्रसृतानां सत्त्वानां संसारस्रो[33]तो[34]नुवाहि[35]नां स्कंधालयानुच्चलितानां दुःखस्कंधो[36] विवर्धते । निरात्मा निःसत्त्वो निर्जीवो

1 रेण MS.K'. रणा T. 2 भास T. 3 सन्धि T.K.K'. 4 दा T. 5 यं K. 6 ति T.K'. 7 णा T. 8 स्तिर्ण T. 9 णा MS.K.K'. 10 री K. 11 ति–K'. 12 न्धात्प्र K.K'. न्धनत्वात्प्र R. 13 जे T. ज K. 14 हानांमत्यन्तो T. 15 त MS. 16 मात्सं MS.T. 17 दा T. 18 अधिमु T. 19 न T. 20 लु निरव All MSS. 21 ल MS.K.K'. ला T. 22 ज्ञाना–T. 23 र्हितितया T. 24 क्तं K.K'. 25 र्मि T. 26 दकमित्वं बाला T. 27 त्या T. 28 सत्त्व–K. 29 क्षो MS.K.K'. 30 पूर्वं MS.K.K'. 31 तः अवि T. 32 श्ना MS. 33 श्रो MS.T. 34 तो T.K. 35 तां T. ना MS. 36 भिनिवर्त्तते T.

[1]निष्पोषो निष्पुंगलः । आत्मात्मीयविगतस्तं यथाभूतं प्रजानाति । यथा [2]चानागतस्यास्यैवासत्संमोहाभिलाषस्य वा व्यवच्छेदः पर्यंतो ति[3]ःशरणं नास्त्यस्ति च तच्च यथाभूतं प्रजानाति । तस्यैवं भवत्याश्चर्यं याव[4]दज्ञानसंमूढा वतेमे बालपृथग्जनाः । येषामसं[5]ख्येया आत्मभावा निरुद्धा निरोत्स्यंते निरुध्यन्ते च । एवं च क्षीयमाणाः काये न निर्विदमु[6]त्पादयंति । भूयस्या मात्रया दुःखयंत्रं विवर्धयंति । संसार[7]स्रोत[8]सश्च महाभयान्न [9]निवर्तंते । स्कंधालयं च नोत्सृ[10]जंति । धातू[11]रगेभ्यश्च न निर्विद्यन्ते । [12]नंदीरा[13]गतश्चारकं च नावबुध्यंते । षडायतनशू[14]न्यग्रामं च न व्यवलोक[15]यंति । अहंकारममकाराभिनिवेशानु[16]शयं च न प्रज[17]हंति । मानदृष्टिशल्यं च नोद्धरंति । रागद्वेषमोहज्वल[18]नं च न प्रशमयंति । अविद्यां[19]धकारं [20]चं न विधमयन्ति । तृष्णार्णवं च नोच्छोपयन्ति । दशबलसार्थवाहं च न पर्येषन्ते । माराशयगहनानुगताश्च संसारसागरे विविधा[21]कुशलवितर्कग्राहाकुले परिप्लवन्ते । अप्रतिशर[22]णास्तथा संवेगमापद्यंते । बहूनि दुःखानि प्रत्यनुभ[23]वंति । यदुत जातिजराव्याधिमरणशोकपरिदेवदुःखदौर्मनस्योपायासान् । हन्ताहमे[24]षां सत्त्वानां दुःखार्तानामनाथानामत्राणानामशरणानामलयनानामद्वीपानामपरायणानामन्धानामविद्यां[25]डकोशपटलपर्यवनद्धानान्तमोभिभूतानामर्थाय । एको ऽद्वितीयो भूत्वा तथारूपं पुण्यज्ञानसंभारोपचयं[26] संविभर्मि[27] । यथारूपेण पुण्यज्ञानसंभारोपचयेन संभृतेन इमे [28]सर्वसत्त्वा अत्यन्तविशुद्धिमनुप्राप्नुयुः । यावद्दश[29]बलतां[30]मसंगज्ञाननिष्ठामनुप्राप्नुयुरिति । स [31]एवं सुविलोकितज्ञानाभिनिर्हृतया बुद्ध्या यत्किंचित्कुशलमूलमारभते[32] तत्सर्वं [33]सर्वसत्त्वपरित्राणायारभते । सर्वसत्त्वहिताय

1 निष्पोषो–T. 2 वा K. 3 स T 4 मुधा T 5 ध्ये K 6 नु T. 7 श्रो MS K'.T. 8 श or त? 9 वि T K K'. 10 ज k' 11 रा K'. 12 नं 12 ते–Śdh Śn. Br. Bb Kj Dhr. 13 गान्तश्चा MS. 14 न्यं MS K'. 15 य T 16 यश्च T 17 ह K K'. 18 नश्च (or श्च? T) 19 द्या-मोहान्धकारं T. 20 श्च K. 21 ध MS K K'. 22 णान च सं All MSS. 23 व K. 24 मेतेषां T. 25 द्याण्ड T. 26 येन T. 27 र्त्ति All MSS 28 सर्व–MS K K'. 29 बल+ब MS.K.K'. 30 तां असं 31 एवमेव लोकि MS.K.K'. 32 ते दानप्रियवद्यार्थचर्यासमानार्थताभिस्तत्स T. 33 सर्व–MS.L.T.

सर्वसत्त्वसुखाय सर्वसत्त्वानुकंपाय[1] सर्वसत्त्वानुपद्रवाय सर्वसत्त्वपरिमोचनाय । सर्वसत्त्वानुकर्षाय[2] सर्वसत्त्वप्रसादनाय सर्वसत्त्वविनयाय सर्वसत्त्वपरिनिर्वाणायारभते । स भूयस्या मात्रयास्यां[3] पंचम्यां सुदुर्जयायां बोधिसत्त्वभूमौ स्थितो बोधिसत्त्वः[4] स्मृतिमांश्च भवत्यसंप्रमोषधर्मतया । मतिमांश्च भवति सुविनिश्चितज्ञानतया । गतिमांश्च[5] भवति सूत्रार्थगति[6]संधायभाषितावबोधन[7]तया । ह्रीमांश्च भवत्या[8]त्मपरानुरक्षणतया । धृतिमांश्च भवति संवरचारित्रानुत्सर्गतया । बुद्धिमांश्च भवति स्थानास्थानकौशल्य[9]सुविचारित[10]तया । [11]ज्ञानानुगतश्च भवत्यपरप्रणेयतया । प्रज्ञानुगतश्च भवत्यर्थानर्थसंभेद[12]पदकुशलतया । सत्त्वपरिपाचनकुशलश्च भवत्यभिज्ञाज्ञानाभिनिर्हारकुशलतया । अभिज्ञानिर्हार[13]प्राप्तश्च भवति भावनाभिनिर्हारकुशलतया । उपायकुशलश्च भवति लोकानुवर्तनतया । अतृप्तश्च भवति पुण्यसंभारोपचयतया । अप्रतिप्रस्रब्धवीर्यश्च भवति ज्ञानसंभारपर्येषणतया । अपरिखिन्नाशयश्च भवति महामैत्रीकृपासंभारसंभृततया[14] । अशिथिल[15]पर्येषणाभियुक्तश्च भवति तथागतबलवैशारद्यावेणिकबुद्धधर्मपर्येषणतया । स्वभिनिर्हृत[16]मनसिकारानुगतश्च भवति बुद्धक्षेत्रविट[17]पनालंकारा[18]भिनिर्हारतया । विचित्रकुशलक्रियाभियुक्तश्च भवति लक्षणानुव्यंजनसमुदानतया । सततसमितं स्वभियुक्तश्च भवति तथागतकायवाक्चित्तालंकारपर्येषणतया । महागौरवोपस्थानशीलश्च भवति सर्वबोधिसत्त्वधर्मभाणक[19]शुश्रूषणतया । अप्रतिहतचित्तश्च भवति बोधि[20]सत्त्वमहोपायकौशल्य[21]संध्युपसंहितलोकप्रचारतया । रात्रिं[22] दिवमन्यचित्तपरिवर्जितश्च भवति सर्वसत्त्वपरिपाचनाभियोगतया । स एवमभियुक्तो दानेनापि सत्त्वान्परिपाचयति ।

1 यै T.K'. 2 र्पणाय T. 3 ऽस्यां K. 4 त्त्व MS.T. 5 म T. 6 सत्त्वाय भाषि T. 7 न—MS.K'K. 8 ति आ T. 9 ल All MSS. 10 त—MS.K.K'. 11 ज्ञानवांश्च भव MS.K.K'. 12 पद—K.K. 13 भि+नि ? 14 या+名爲一切有情加行者以能滅度諸有情故 Sdh. 名爲爲他勤修者欲令一切衆生入涅槃故 Śn. 15 or र 16 र्हृ MS.K.K'. 17 थ T. 18 र्हृ T. 19 हा K. 20 चित्त R. 21 ल All MSS. 22 त्रि MS.K.

प्रियवाद्येनाप्यर्थक्रिययापि समानार्थतयापि । रूपसंदर्शनेनापि धर्मदेशनयापि । बोधिसत्त्वचर्याप्रभावनयापि । तथागतमाहात्म्यप्रकाशनतयापि संसारदोषसंदर्शने[1]नापि । बुद्धज्ञानानुशं[2]सपरिकीर्तनेनापि । महा[3]र्धिविकुर्वणाभिनिर्हारनानोपचारक्रियाप्रयोगेनापि सत्त्वान्परिपाचयति । स एवं सत्त्वपरिपाचनाभियुक्तो बुद्धज्ञानानुगत[4]चित्तसंतानः । अप्रत्युदावर्तनीयकुशलमूलप्रयोगः । वैशेषिकधर्मपरिमार्गणा[5]भियुक्तः । यानी[6]मानि सत्त्वहितानि लोके प्रचरंति । तद्यथा लिपिशास्त्र[7]मुद्रासं[8]ख्यागणनानि क्षेपादीनि नानाधातुतंत्रचिकित्सातंत्राणि । शोषापस्मारभूतग्रहप्रतिषेधकानि । विषवेता[9]डप्रयोगप्रतिघातकानि । काव्यनाटकाख्यान[10]गांधर्वे[11]तिहाससंप्रहर्षणा[12]नि । ग्रामनगरोद्याननदीसरस्तडा[13]गपुष्करिणी[14]पुष्पफलौ[15]षधिवनख[16]ण्डाभिनिर्हारानि[17] । सुवर्णरूप्यमणिमुक्ति[18]वैडूर्यशंखशिलाप्रवाडरत्नाकरनिर्दे[19]शनानि । चंद्रसूर्यग्रहज्योतिर्नक्षत्रभूमिचा[20]लमृगशकुनिस्वप्ननिमित्त[21]प्रदेशप्रवेशानि । सर्वांगप्रत्यंगं[22]लक्षणं[23]चारानुचारप्रयोगनिमित्तानि । संवरचारित्रस्थानध्याना[24]भिज्ञाप्रमाणारूप्यस्थानानि । या[25]नि चान्यान्यप्यविहेठ[26]नाविहिंसासं[27]प्रयुक्तानि सर्वसत्त्वहितसुखावहानि तान्यप्यभिनिर्हरति । कारुणिकतयानुपूर्वं बुद्धधर्मं[28]प्रतिष्ठापनाय[29] । तस्यास्यां सुदुर्जयायां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्य बहवो बुद्धा आभासमागच्छंत्यौदारिकदर्शनेन प्रणिधानबलेन । [30]बहूनि बुद्धशतानि । बहूनि बुद्धसहस्राणि । बहूनि बुद्धशतसहस्राणि । बहूनि बुद्धनियुतशतसहस्राणि । बह्वो[31] बुद्धकोट्यः । बहूनि बुद्धकोटीशतानि । बहूनि बुद्धकोटीसहस्राणि । बहूनि बुद्धकोटीशतसहस्राणि । बहूनि बुद्धकोटीनि[32]युतशतसहस्राणि । आभासमागच्छंत्यौ-

1 नतया T. 2 शांस MS. संश T. 3 ह K'. 4 ता MS. त–T. 5 ना T. 6 नि K. 7 स्त्र+गना T. 8 सं 4 नि–T. 9 or ल? 10 ने T. 11 वैं T. 12 का T. 13 दा T. 14 णि K. 15 लोप MS.K. लऔप T. 16 प T.K. 17 णि T.K'. 18 क्त MS. क्ता T. 19 दर्श T.K'. 20 काल MS. चार T. 21 त्तादेश T. त्तानि प्रदेश R. 22 गानि ल T. 23 णानि चा R. 24 नो भि K. 25 यानि–T. 26 थ T.K.K'. 27 संप्र–K.K'.MS. 28 मैं K. 29 थैं T. 30 अनेकानि MS.K.K'. 31 हु MS.K.K'. 32 नयुत K.K'.

दारिकदर्शनेन प्रणिधानबलेन च । स तांस्तथागतानर्हतः सम्यक्संबुद्धान्दृ[1]ष्ट्वोदाराध्या-
शयतया सत्करोति गुरूकरोति मानयति पूजयति । चीवरपिण्डपातशयना[2]सनग्लानप्र-
त्ययभैषज्यपरिष्कारैश्च प्रतिपादयति । बोधिसत्त्वसुखोपधानं[3] चोपसंहरति । संघगणसंमा-
नना[4] च करोति । तानि कुशलमूलानि चानुत्तरायां सम्यक्संबोधौ परिणामयति । तांश्च[5]
तथागतानर्हतः सम्यक्संबुद्धान्पर्युपास्ते । तेषां च सकाशाद्गौरवचित्तीकारेण सत्कृत्य धर्मं[6]
शृणोति[7] उद्गृह्णाति धारयति । श्रुत्वा च यथाबलं यथाभजमानं प्रतिपत्त्या संपादयति ।
भूयस्त्वेन च तेषां तथागतानां शासने प्रव्रजति । प्रव्रजितश्च श्रुतधारी[8] धर्मभाणको भव-
ति । स भूयस्या मात्रया श्रुता[9]चारधारणी प्रतिलब्धो[10] धर्मभाण[11]को भवति । अनेकेषां च
बुद्धकोटीनियुतशतसहस्राणामन्तिके[12] अनेककल्पकोटीनियुतशतसह[13]स्राणि ऽसंप्रमोषतया ।
तस्यास्यां सुदुर्जयायां बोधिसत्त्वभूमौ स्थितस्यानेकान्कल्पांस्तानि कुशलमूलान्युत्तप्यन्ते प-
रिशुद्ध्यंति प्रभास्वरतराणि च भवंति । अनेकानि कल्पशतानि । अनेकानि कल्पसहस्रा-
णि । अनेकानि कल्पशतसहस्राणि । अनेकानि कल्पनियुतशतसहस्राणि । अनेकाः कल्प-
कोट्यः । अनेकानि कल्पकोटीशतानि । अनेकानि कल्पकोटीसहस्राणि । अनेकानि कल्प-
कोटीशतसहस्राणि । अनेकानि कल्पकोटीनियुतशतसहस्राणि । [14]तस्य तानि कुशलमूला-
न्युत्तप्यन्ते परिशुद्ध्यंति प्रभास्वरतराणि च भवंति । तद्यथापि नाम भवंतो जिनपुत्रास्तदेव
जातरूपं मुसारगल्वमृ[15]ष्टं भूयस्या मात्रयोत्तप्यते परिशुद्ध्यति प्रभास्वरतरं च भवति ।
एवमेव भवन्तो जिनपुत्रा बोधिसत्त्वस्यास्यां सुदुर्जयायां बोधिसत्त्वभूमौ स्थितस्य तानि
कुशलमूलान्युपायप्रज्ञाविचारितानि भूयस्या मात्र[16]योत्तप्यन्ते परिशुद्ध्यंति प्रभास्वरतराणि

1 ष्ट्रा उदा T. 2 श MS. 3 नश्चो (श्चो ?) T. 4 नं T. 5 ताश्च MS. तां च K'. 6 र्मंदेशनां T. 7 त्युतगृ T. 8 रि T. 9 तो MS. 10 ब्ध MS. 11 न T. 12 अ–K'.SK. 13 स्रासं T. स्राण्यसं K.K' 14 तस्य–T. 15 पृ MS. सृ R. 16 यौ T.

च भवंति। ज्ञानप्रयोगगुणाभिनिर्हारादसंहार्यविचारितानि[1] च भवन्ति। तद्यथापि नाम भवंतो जिनपुत्राश्चंद्रसूर्यग्रह[2]ज्योतिर्नक्षत्राणां विमानालोकप्रभा वातमंडली[3]भिरसंहार्या[4] भवति मारुता[5]साधारणा च। एवमेव भवंतो जिनपुत्रा बोधिसत्त्वस्यास्यां सुदुर्जयायां बोधिसत्त्वभूमौ स्थितस्य तानि कुशलमूलान्युपायप्रज्ञाज्ञानचित्तविचारणानुगतान्यसंहार्याणि भवन्ति। सर्वश्रावकप्रत्येकबुद्धैर्लौकिकै[6]साधारणानि च भवंति। तस्य दशभ्यः[7] पारमिताभ्यो ध्यानपारमिता[8]तिरिक्ततमा[9] भवं[10]ति। न च परिशेषासु न समुदागच्छति। यथाबलं यथाभजमानं। इयं भवंतो जिनपुत्रा बोधिसत्त्वस्य सुदुर्जया नाम पंचमी बोधिसत्त्वभूमिः समासनिर्दिशतः। यस्यां प्रतिष्ठितो बोधिसत्त्वो[11] भूयस्त्वेन संतुषितो भवति देवराजः[12] कृती प्रभुः। सत्त्वानां सर्वतीर्थ्यायतनविनिवर्तनाय कुशलः सत्त्वान्सत्येषु प्रतिष्ठापयितुं। [13]यत्किं चित्कर्मारभते दानेन वा प्रियवद्यतया वा [14]ऽर्थक्रियया वा समानार्थतया वा तत्सर्वमविरहितं बुद्धमनसिकारैर्धर्ममनसिकारैः संघमनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्यामनसिकारैः पारमितामनसिकारैर्भूमिमनसिकारैर्बलमनसिकारैर्वैशारद्यमनसिकारैरावेणिकबुद्धधर्ममनसिकारैर्यावत्सर्वाकारवरोपेतसर्वज्ञज्ञानमनसिकारैः। किमिति सर्वसत्त्वानामग्र्यो भवेयं श्रेष्ठो ज्येष्ठो वरः प्रवर उत्तमो ऽनुत्तमो[15] नायको विनायकः[16] परिनायको[17] यावत्सर्वज्ञज्ञानप्रतिशरणो भवेयं[18]। आकांक्षंश्च तथारूपं वीर्यमारभते यथारूपेण वीर्यारंभेण एकक्षणलवमुहूर्तेन समाधिकोटीशतसहस्रं[19] च प्रतिलभते समापद्यते[20]। बुद्धकोटीशत[21]सहस्रं च पश्यति। तेषां चाधिष्ठानं संजानीते। लोकधातुकोटीसहस्रं च[22] कम्पयति। क्षेत्रकोटीसहस्रं चाक्रमति। लोकधातुकोटीसहस्रं चावभासयति[23]। सत्त्वकोटीसहस्रं च परिपा-

1 ततमानि T. 2 ग्रहण MS.K. 3 लीअसं T. 4 र्या+च T. 5 तअसा 6 क T. 7 भ्यो MS.K.K'. 8 ता ऽति T. 9 मो T. 10 वं MS. 11 त्त्वा T. 12 ज MS.T. 13 यच्च किं चित्क T. 14 अर्थ T. 15 मः T. 16 क MS. 17 णा T.K'. 18 यमिति। आ T. 19 स्त्राणि प्र MS.K.K'. 20 ते+च T. 21 शत–T. 22 चा MS. 23 श T.K.

चयति । कल्पकोटीसहस्रं च तिष्ठति । कल्पकोटीसहस्रं च पूर्वांतपरांततः प्रविशति । धर्ममुखकोटीसहस्रं च [1]प्रविचिनोति । कायकोटीसहस्रं[2] चादर्शयति । कायं कायं च बोधिसत्त्वकोटीसहस्रपरिवारं[3] चादर्शयति । तत उत्तरे प्र[4]णिधानबलिका बोधिसत्त्वाः प्रणिधानवैशेषिकतया विकुर्वंति । येषां न [5]सुकरा संख्या कर्तुं । कायस्य वा प्रभाया वा ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्याया वा व्यूहस्य वा अधिष्ठानस्य वा [6]ऽधिमुक्तेर्वा [7]ऽभिसंस्काराणां वा । यावदेतावद्[8]भिरपि कल्पकोटीनियुतशतसहस्रैरिति ॥

अथ खलु वज्रगर्भो बोधिसत्त्व[9] इममेव भूम्यर्थं प्ररूपयमानस्तस्यां वेलायामिमा गाथा अभाषत ॥

[10]एवं [11]विशोधित चतुर्षु [12]जिनाचरीषु
बु[13]द्धेष्वा [14]त्रियध्वसमतां अनुचिन्तयंति ।
शीलं च चित्तप्रतिपत्ति[15] तु मार्गशुद्धि[16]ः
कां[17]क्षाविनीत[18]विदु [19]पंचमि आक्रमंति[20] ॥ १ ॥
स्मृतिचाप [21]इं[22]द्रियि[23]इषू[24] अनिवर्तिताश्च
सम्यक्प्र[25]हाणहय वाहन[26]ऋद्धिपादाः ।
पंचा[27]बलाः कवच[28] सर्व[29]रिपू अभेद्याः[30]

1 प्रतिविनोति T. 2 स्त्रं वा MS. स्रा चा T. 3 रमाद् T. 4 णिधिब MS.K.K'. 5 सू K'. 6,7 अ T. 8 द्धिः कल्प T. 9 त्वमहासत्त्वामिम T. 10 Metre : वसंततिलका 11 शोधिते T.L. 12 नि MS. K.K'. or ने ? 13 द्धय RS. 14 or त्रयध्व ?, अतीतबुद्धधर्मविशुद्धचाशयसमतया, अनागतबुद्धधर्म°, प्रत्युत्पन्नबुद्धधर्म°, शील°, चित्त°, दृष्टिकांक्षाविमतिविलेखापनयन°, मार्गामार्गज्ञान°, प्रतिपत्प्रहाणज्ञान°, सर्वबोधिपक्षधर्मोत्तरोत्तरविभावन°, सर्वसत्त्वपरिपाचन° Prose. 15 (त्तितु) RS. 16 द्धि K. 17 क्षवि MS.K. क्षावी T. 18 ते K. 19 (पंचम) RS. त्रिया RS. पंच MS.K.K'. 20 ति+स्म MS. 21 इंद्री T.L. 22 (येषु) RS. 23 षु MS.K.K'.T. 24 त All MSS. 25 (धा) RS. 26 न—MS.K.K'.T. 27 च All MSS. 28 चु T.K'. चू L. 29 काद्यू MS. कायु K.K'. ऋपु T. 30 द्यं MS.K.K'. द्यां T.L.

शूरानि[1]वर्तिविदु पंचमिं[2] आ[3]क्रमंति ॥ २ ॥
ह्र्यपत्राप्यवस्त्रं[4] विदुरां[5] शु[6]चिशीलगंधां[7]
बोध्यंगमाल्य वर[8]ध्यानविलेपनं च ।
प्रज्ञाविचारणविभूषणु[9]पायश्रेष्ठ-
मुद्यानधारणि[10] त पंचमिमाक्रमंति ॥ ३ ॥
चतुऋद्धिपा[11]दचरणाः[12] स्मृतिशुद्धिग्रीवाः
कृप[13]मैत्र[14]श्रेष्ठनयना वरप्रज्ञदं[15]ष्ट्रा ।
[16]नैरात्म्य[17]नाद रिपुक्ले[18]शप्रधर्षमाणा
नरसिंहसा[19]म्यविदु पंचमिमाक्रमंति ॥ ४ ॥
ते [20]पंचमीमु[21]पगता वरभूमिश्रेष्ठं
परिशुद्धमार्गशुभमुत्तरि [22]भावयंति ।
शुद्धाशया[23] विदु जिने[24]त्वनुप्रापणार्थी
कृपमैत्र खेदविगता[25] अनुचिंतयंति ॥ ५ ॥
संभारपु[26]ण्युपचया तथं[27] ज्ञानश्रेष्ठं
[28]नैका उपाय अभिलो[29]चनं[30] भूम्यभासां[31] ।
बुद्धाधिष्ठान स्मृतिमां [32]मतिबुद्धिप्राप्ता

1 णि All MSS. 2 म K. 3 अ MS.K′.L. 4 स्त T.L. 5 ना MS. नां T.L.K.K′. 6 सुविलब्ध MS.K.K′. 7 धो MS.K.K′. 8 ल T. 9 ण T. 10 (णीत) RS. 11 वा MS. 12 णा MS. K.K′. (णी) RS. 13 ष L. 14 त्वे T.L. 15 द्र All MSS. 16 ने K. 17 त्मा T. त्म्या L. 18 क्के T. 19 स All MSS. 20 षां T. 21 अप MS. 22 भावन्ति T.L. 23 (यो) RS. 24 न तु प्रा T.L. 25 (त) RS. 26 पूर्वप T.L. 27 था All MSS. 28 種々方便力欲得上明觀 Kj. 種々方便力上地明觀法 Bb. 精勤方便觀上地 Śn. Śdh. 29 रो RS. 30 or ना? 31 सान् MS.K.K′. or वं? 32 ग MS.K.K′.

चत्वारि[1]सत्यनिखिलाननुचिंतयंति ॥ ६ ॥

परमार्थसत्य[2]मपि संवृति[3]लक्ष[4]णं च

सत्याविभागमर्थ[5] सत्यनि[6]तीरणं च ।

तथ[7] वस्तु साश्रवक्षयं अपि मार्गसत्यं

यावन्त नावरणसत्य समो[8]सरंति ॥ ७ ॥

एवं च सत्य परिमार्गति सू[9]क्ष्मबुद्धि-

र्न च ताव[10] नावरण प्राप्तु[11] विमोक्षश्रेष्ठं ।

[12]ज्ञानाधिमुक्तिविपुलात्तु गुणाक[13]राणां[14]-

[15]मभिभोंति सर्व जगतो[16]त्तरणाप्रियाणां ॥ ८ ॥

[17]सो एवं[18] सत्यअभिनिर्हृततत्वबुद्धि-

र्जानाति [19]संस्कृत मृषाप्रकृतीअसारं ।

[20]कृपमैत्र[21]आभं[22] लभते सुगतानं[23] भूयः

सत्त्वार्थिकः सुगतज्ञान[24]गवेषमाणः[25] ॥ ९ ॥

पूर्वा[26]परे विदु [27]निरीक्षतु[28] [29]संस्कृतस्य

मोहान्धकारतमसावृतदुःखलग्नान् ।

अभ्यु[30]द्ध[31]रोति जगतो दुः[32]खस्कंधबद्धां[33]

1 शुद्धनिखि MS. सत्त्वनिपि T. सत्त्वनिखि K'.L. सत्त्वानिखि K. 2 त्वनपि MS. 3 द्धि MS.K. 4 ण चा K. 5 ति MS. 6 निस्तीरण Prose. 7 था T.L. 8 र K. 9 शू T.L. 10 वद् नाव MS. K.K'.T.L. 11 मु T.L. 12 智慧脫門錄•不惱無陰蓋•已修功德本•行慧甚廣遠•超度衆因緣•濟一切群黎 Dhr. 以能有智慧•及與信力故•得勝於一切•世間諸智慧 Bb. Kj. 以此能生大功德•是故超過世智慧 Śn.…世間慧 Śdh. 13 का MS. 14 or णां अति? 15 मति MS.K.K'. 16 तो अर्हप्रत्ययानाम् RS. तोत्त=भर्तु T.L. 17 सो—MS.K. 18 वं MS.K.K'.T. 19 सत्कृत्त MS.K. संस्कृत्तु T.L. 20 कृत L. 慈愍無所得 (लंभ) Dhr. 慈悲光明分 Kj. Bb. Śn. Śdh. 21 लं All MSS. 22 भं T. 23 नु T.L. 24 नु T.L. 25 णाः MS. 26 वर MS.K. 27 नि T. 28 त MS.K.T. 29 सत्कृ MS.K'. 30 or त्यु? 31 द्ध MS. or द्ध=द्ध? 32 or दु? 33 बुद्ध MS. वृद्धाः L. वुद्धाः T.K.K'. वृद्धान् (वृक्षान्) RS.

नैरात्म्यजीव[1]रहिता[2]स्तृणकाष्टतुल्या[3] ॥ १० ॥

क्लेशाद्वयेन युगपत्पुन[4]र्भासि त्यध्वं

[5]छेदो [6]दुखस्य न च अन्त समोस[7]रंत[8]ः ।

[9]हन्ता प्रणष्ट जनतेति [10]हि वेक्षयंति

संसार[11]श्रोत न [12]निवर्तति निःस्वभावं ॥ ११ ॥

स्कंधा[13]लयाउरगधातुकुदृष्टिशल्या[14]

संतप्तअग्निहृदयावृ[15]तं अंधकारे[16] ।

[17]तृश्णार्णवप्रपतिता [18]अविलोकनत्वात्

जिनसार्थवाहविक[19]ल[20]ा [21]दुःख[22]अर्णवस्था[23]ः ॥ १२ ॥

एवं विदि[24]त्व पुनरार[25]भते [26]प्रमत्तः

तच्चैव आरभति सर्वजगद्विमोक्षी ।

स्मृतिमन्तु[27] भोन्ति मतिमान्गतिमां [28]धृतिं च

ह्रीमांश्च भोति[29] तथ बुद्धिन प्रज्ञ[30]वांश्[31]च ॥ १३ ॥

अवितृप्[32]तु पुण्युपचये तथ ज्ञान[33]श्रेष्ठं

नो [34]खेदवान्नशिथिलो बलमेपमाणः ।

क्षेत्रं [35]विधाय जिनलक्षण बुद्धघोषं[36]

1 ल T.L. 2 तां तृ T.L. तांस्तृ K.K'. 3 ल्यान् T.K.L. ल्पां K'. 4 र्भा K. 5 च्छेदो T.L. छेन्दो MS. 6 दुःख MS. दुप T.L. 7 श T. or त? 8 तो ह MS. तो । ह T.K. 9 हन्तो प्रणष्टजनते तिदया-भिजाता RS. हंभो प्र॰ L. 此等可愍我應度 Sn. Śdh. 於此生愍傷・我當度脫之 Bb. Kj. 嗚呼亡 (忘) 失已・衆人可愍傷・愚癡之所燋 Dhr. 10 ह्यपे K.K'. 11 स्रो T.K.L. 12 विवर्तिति MS. 13 र T.L. 14 ल्यं MS. K.K'. 15 ते अंधकारे L. 16 णे K'. 17 ष्णा 18 अव RS. 19 रहा RS. 20 रा L. 21 or दु? 22 आ MS. 23 स्थ MS. 24 दीत्व K. 25 रभत MS. रभते ऽप्र K. 26 प्रसादं K'. प्रमोदं MS. 無放逸 Dhr. 勤精進 Kj. Bb. Śn. Śdh. प्रमादं L. 27 न्ति T.L. or न्त? 28 बुद्धिमां MS.K.K'. वृद्धिं T.L. धृतीं च RS. 29 न्ति RS. 30 ज्ञा T.L. 31 च T. 32 तृप्ति MS. तृप्ण T.L. 33 श्रि K. 34 पे T.L. 35 द्विधीय MS.K.K'. द्विधाय T.L. 36 ष MS. षे K.K'.L.

अवितृप्तु सर्वक्रिय सत्त्वहितार्थयुक्तः ॥ १४ ॥

परिपा[1]चनाय जगतो विदु शिल्पस्थानां[2]

लिपिमुद्रसंख्य[3]गण[4]धातुचिकित्सतंत्रान् ।

भूतग्र[5]हाविषमरो[6]गनिवर्तनार्थं

[7]स्थापेन्ति शा[8]स्त्ररुचिरान्कृपमैत्रबु[9]द्धी ॥ १५ ॥

वरकाव्यना[10]टक[11]मतिं विविधप्रहर्षा-

[12]न्नद्यूदियानफलपुष्पनिषद्यस्था[13]नान् ।

[14]स्थापेन्ति [15]नैकक्रिय सत्त्वसुखाप[16]नार्थं

रत्नाक[17]रांश्च उपदर्शयि[18] नैकरूपान् ॥ १६ ॥

[19]भूमीचलं[20]श्च ग्रहज्योतिषचन्द्रसूर्यां[21]

सर्वांगलक्षणविचारणराज्यस्था[22]नां ।

[23]आरूप्यध्यान तथ [24]भिज्ञ अथाप्रमाणा[25]

अभिनिर्हरंति हितसौख्यजगार्थकामाः ॥ १७ ॥

[26]इह दुर्जयामुपगतो[27] वरप्रज्ञचारी

[28]पूजेंति बुद्धनयुतां [29]शृणुवन्ति धर्मं ।

तेषां शुभं पुनरुतप्यति आशयश्च

1 प MS.T. 2 नान् MS. नात् K'. 3 प्य T. 4 णं K. 5 ह MS 6 ना MS. रा K'. 7 स्थाप्यन्ति T. 8 सास्त T. 9 द्धि T.L. 10 न MS.K. 11 का T.L. 12 न्नद्योघाफल MS. न्नद्योद्यानफल T.L. 13 नां T.K. 14 स्थाप्येन्ति K. स्थापेति T.L. 15 ने RS. 16 य T. 17 का All MSS. 18 यी T.L. 19 भूमि T.L. 20 च K'. 21 र्यो T. 22 नं MS.K.K'. 23 四無色四禪四無量 24 वि MS. 25 णा (नाः) RS. 26 इमु दुर्जया MS.K.K'. इमु सुदुर्जया T.L. or सूदुर्जया? 27 तां MS.K.K'. तो RS 28 पूजंति MS. पूजयंति T.L. 29 श्रुणेन्ति MS. शृनोन्ति T. शृणन्ति K. शृण्वन्ति L.

[1]स्वर्णं यथा मु[2]सरगल्[3]वसमाधिमा[4]ष्टं ॥ १८ ॥
रत्नामयाग्[5]र[6]हविमान वहंति वाता
[7]ते [8]येहि तेहि तु वहंति अ[9]सं[10]हिताश्च ।
[11]तथ लोकधर्मि[12] चरमा[13]णं जगार्थचान्य-
संहार्य भोंति य[14]थ पद्म जले[15] अलिप्तं ॥ १९ ॥
अत्रास्थिता तुषितईश्वर ते कृतावी
नाशेंति ती[16]र्थ्यचरणान्पृथु[17]दृष्टिस्थानान् ।
यच्चाचरंति कुशलं जिनज्ञानहेतोः
सत्त्वान त्रात भ[18]वमो दशभि[19]र्बलाढ्याः ॥ २० ॥
ते वीर्यमुत्तरि[20] समारभि[21] अप्रमत्ताः
कोटीसहस्रसुगतां[22]नभि[23]पूजयंति ।
ल[24]ब्धा समाधि विदु कंपयि क्षेत्रकोटी[25]ः
प्रणि[26]धीवि[27]षेपु अ[28]नुभूय गुणाकराणां[29] ॥ २१ ॥
[30]इत्येषा[31] पंचमी भूमिर्वि[32]चित्रोपायकोटीभिः ।
निर्दिष्टा सत्त्वसारा[33]णामुत्तमा सुगतात्मजाः ॥ २२ ॥

1 猶紫金車菓磨治平明好 Dhr. 猶如研鍊寶瑩磨於眞金 Kj. Bb. 2 सा All MSS. 3 ल्वमधिमाष्टां MS. ल्वसविमाष्टं T.L. ल्वमधिमाष्टं K.K'. ल्वयसंविमृष्टं RS. 4 or सृष्टं? 5 य RS. 6 गृ MS. 7 風力所持無損動 Sn. 非為風輪所映奪 Sdh. 8 य MS. 9 सु All MS. 10 हृ RS. 11 तथा T.L. 12 र्मी T. 13 न T.K.L. 14 था T.L. 15 ल MS.K.K'. लं T.L. 16 र्थ MS.K.K'. र्थ्ये T. 17 दुष्टि T.L. 18 वे K.K'. 19 लाढ्यैः (लैभिः) RS. लाद्याः T. 20 री T. 21 भति अप्र MS.K'. भते अप्र K. भि प्र T. भि अप्र L. 22 तो MS. 23 हि K. 24 ब्ध्वा RS. 25 टी K.L. 26 धि MS. 27 विप-येषु MS.,=विशेषु 28 णु L. 29 णं T. 30 Metre: श्लोक 31 षां T.L. 32 विभिष्टो T.L. 33 णां नुत्तमाः MS.K.K'. णांमुत्तमा T.L.

सुदुर्जया नाम पंचमी बोधिसत्त्वभूमिः ॥ ५ ॥

[1]चरणं[2] वर श्रुणित्वा भूमिश्रेष्ठं विदूनां
गगनि सुगतपुत्रा हर्षिताः पुष्पवर्षी ।
मणिरतन[3] उदारां[4] अभिमुक्ता[5] विशुद्धां[6]
अभिकिर सुगतस्या[7] साध्विति व्याहरंतः ॥ १ ॥
मरुतशतसहस्रा[8] हर्षिता अंतरीक्षे[9]
दिव्यरुचिरचित्रा[10] रत्नचूर्णा[11] उदाराः ।
अभिकिरि[12] सुगतस्या[13] गंधमाल्यानुलेपा-
न्छत्रध्वजपताकाहारचंद्रार्धहारान्[14] ॥ २ ॥
[15]मरुपतिवशवर्ती[16] सर्वदेवा[17]गणेन
उपरि खगपथातो[18] मेघरत्ना[19]मयानि ।
अभिकिरि[20] सुप्रसन्नः पूजना[21]र्थं[22] जिनस्य
साधु सुगतपुत्रा व्याहरी[23] हृष्टचित्तः ॥ ३ ॥
अमरवधु[24]सहस्राण्यन्तरीक्षे[25] स्थितानि
गीतरुतमनोज्ञां[26] वाद्यसंगीतियुक्तान्[27] ।
सर्वरुतस्वरेभ्यो एवशब्दारवंते[28]

1 षष्ठी भूमिः, Metre: मालिनी 2 णं MS. णि K.K'. 3 रत्न MS.T. 4 राः MS. 5 अभिमुक्ता MS.K.K'. आभयुक्ता RS. 放淨光明 Sn. Sdh. 放清淨光明 Kj. Bb. 光明清淨 Dhr. 6 द्धाः MS.K'. 7 तेभ्य T.L. 8 सा All MSS. 9 क्ष MS.K. 10 विय RS. 11 डा All MSS. 12 र T.L. 13 तेभ्यः T.L. तेभ्यो RS. 14 त् T.L. 15 मरुत्पति L.T. 16 र्ति MS. 17 व All MSS. 18 थित्वा RS. 19 त्न RS. 20 रि-पु प्र RS. 21 जा T. 22 र्थं T.K.L. 23 रिह्य (or ज्य) T.L. 24 धू MS. 25 क्ष MS. 26 ज्ञा K. 27 क्ता RS. 28 रभंते MS.

जिनकृतु[1]सुमनोज्ञैः क्लेशतापस्य हन्ता ॥ ४ ॥
शू[2]न्यप्रकृति[3]शांता सर्वधर्मानिमित्ताः
खगपथसमतुल्या निर्विकल्पा विशुद्धाः ।
गतिस्थितिविनिवृत्तां[4] निष्प्रपंचा [5]अशेषाः[6]
तथतसम तथ[7]त्वाद्धर्मता निर्विकल्पा ॥ ५ ॥
यैः पुनरनुबुद्धाः सर्वधर्मेव तेषां
भावि[8] तथ अभावे [9]इंजना नास्ति का चित् ।
कृप[10]करुण जगे चा[11] मोचनार्थं[12] प्रयुक्ता-
स्ते[13] हि सुगतपुत्रा[14] [15]औरसा धर्मजाताः ॥६ ॥
दानचरि चरंते सर्व[16] हित्वा निमित्तं
शीलसु[17]धृतचित्ता आदिशान्ता प्रशांताः ।
जगति कृत क्षमन्ते अक्षयाधर्मज्ञानी
वीर्यबलउपेताः सर्वधर्माविविक्ताः ॥ ७ ॥
ध्याननयप्रविष्टा [18]जीर्णक्लेशा विशुद्धाः
सर्वविदितवस्तू आदिशून्याधिमुक्ताः ।
ज्ञानक्रियबला[19]ढ्या नित्ययुक्ता जगा[20]र्थं
ते हि सुगतपुत्राः शान्तपापा महात्मा[21]ः ॥ ८ ॥

1 त्व T.L. 2 सू T. 3 त T.L. 4 त्ता+निवृत्ता K. 5 वि MS. 6 पास्तथ K'. 7 त्वाय ध T.L. 8 वितः अभा MS. 9 इञ्ज T.K.K'. 10 पा MS. 11 च K.K'.L. 12 र्थं T.K. 13 स्तैाति सु MS. (तेभि सु) RS. 14 त्रां MS. 15 जिनस्य MS.K.K'. (जिनोरसा) RS. 16 र्वं MS.K.K'.T. 17 धन MS. धृत K. 18 जि T. 19 ढ्या T.K'.L. 20 र्थे T.L. 21 त्मा K'.

[1]ईदृशा[2] रुतसहस्र[3] भणित्वा खे स्थिता[4]ः सुमधुरा[5] सुरकन्याः ।
तूष्णिंभूत[6] जिनमीक्षि प्रसन्ना[7] धर्मगौ[8]रवरता मरुकन्याः ॥ ९ ॥
[9]मुक्तिचंद्रो[10] ब्रवीद्धी[11]रो वज्रगर्भं विशारदं ।
कीदृशाकारनिष्पत्तिः पंचमायामनन्तरम्[12] ॥ १० ॥

वज्रगर्भो बोधिसत्त्व आह ॥

यो ऽयं भवन्तो जिनपुत्रा बोधिसत्त्वः पंचम्यां बोधिसत्त्वभूमौ सुपरिपूर्णमार्गः[13] षष्ठीं [14]बोधिसत्त्वभूमिमवतरति । स दशभिर्धर्मसमताभिरवतरति । कतमाभिर्दशभिर्यदुत । सर्वधर्मानिमित्तसमतया च । सर्वधर्मानुत्पादसमतया च । सर्वधर्मालक्षणसमतया च । सर्वधर्माजातसमतया च । सर्वधर्म[15]विविक्तसमतया च । सर्वधर्मादिविशुद्धिसमतया च । सर्वधर्मनिःप्रपंचसमतया च । सर्वधर्मा[16]यूहानिर्यूहसमतया च । सर्वधर्ममायास्वप्नप्रतिभासप्र[17]तिश्रुत्कोदकचंद्रप्रतिबिंबनिर्माणसमतया च । सर्वधर्मभावाभावाद्वयसमतया च । आभिर्दशभिर्धर्मसमताभिरवतरति । स एवं स्वभावात्स[18]र्वधर्मा[19]न्प्रत्यवेक्ष[20]माणो[21] ऽनुमार्ग[22]यन्ननुलोमयन्नविलोमयन्[23] षष्ठीमभिमुखीं[24] बोधिसत्त्वभूमि[25]मनुप्राप्नोति । तीक्ष्णयानुलोमिक्या[26] क्षांत्या न च तावदनुत्पत्तिकधर्मक्षांतिमुखमनुप्राप्नोति । स एवं स्वभावान्सर्वधर्माननुगच्छन्भूयस्यामात्रया महाकरुणापूर्वंगमत्वेन महाकरुणाधिपतेयतया च महाकरुणापरिपूरणार्थं लोकस्य संभवं च विभवं च व्यवलोकयति[27] । तस्य लोकस्य संभवं च विभवं च व्यवलोकयत एवं भवति । याव[28]न्त्यो [29]लोकोपचारो[30]पपत्तयः । सर्वास्ता आत्माभिनिवेशतो भव[31]न्ति । आत्माभि-

1 Metre: स्वागता 2 शा+कीदृशा MS. 3 श्रु MS. 4 त्वाः K. स्राः MS. 5 सुरवधुरा T.L. 6 ष्णीं T.K.K'.L. श्री MS. 7 न्नाः MS. 8 गो T.K. 9 विमुक्ति MS. Metre: श्लोक 10 द्र अब्र RS. 11 धि MS. 12 रमिति All MSS. 13 भूमिमार्गः T. 14 बोधिसत्त्व—MS.K.K'. 15 र्मा T. 16 र्मानाव्यूहानिर्व्यूह R. 17 श T. 18 न्स K.K'. 19 र्मप्र MS. 20 क्ष्य K.K'. 21 णो ऽनुसृजन्ननुलो R. णः । अनु॰ T. 22 र्ज T. 23 न्+श्रद्दधन्नभियन् प्रतियन्नविकल्पयन्ननुसरन् व्यवलोकयन् प्रतिपद्यमानः R. 24 खी T. 25 मी MS.K.K'. 26 का MS.K. 27 ते R. 28 व T.K.K'. 29 लोकसमुदाचा T 30 लोप K. 31 व MS.

निवेशविगमं[1]तो न भवंति लोकसमुदाचारोपपत्तये[2]ति । तस्यैवं भवति । ते[3] खलु पुनरिमे बालबु[4]द्धय आत्माभिनिविष्टा अज्ञानतिमिरावृता[5] भावाभावाभिला[6]षिणो[7] ऽयोनि[8]शो मनसिकारप्र[9]सृता[10] विपथप्रयाता[11] मिथ्यानुचारिणः पुण्यापुण्य[12]नें[13]ज्यान्संस्कारानुपचिन्वन्ति । तेषां तैः संस्कारैः[14] परिभावितम[15]वरोपितं चित्तवीजं सास्रवं सोपादानमायत्यां जाति[16]जरामरणपुनर्भवाभिनि[17]र्वृत्तिसंभवोपगतं भवति । कर्मक्षे[18]त्रालयमविद्यांधकारन् तृष्णा[19]स्नेहम[20]स्मिमानपरि[21]ष्यन्दितं दृष्टिकृतजालप्रवृ[22]द्ध्या नामरूपांकुरः[23] प्रादुर्भवति । प्रा[24]दुर्भूतो[25] विवर्धते विवृद्धे[26] नामरूपे[27] पंचानामिंद्रियाणां[28] प्रवृत्तिर्भवति । प्रवृत्तानामिंद्रियाणामन्योन्य[29]संनिपातः स्पर्शः । स्पर्श[30]संनिपाततो वेदना [31]भवति । वेदनायास्तत उत्तरे ऽभिनंदना[32] । ततस्तृ[33]ष्णोपादानं विव[34]र्धति । उपादाने विवृद्धे भवः संभ[35]वति । भवे संभूते स्कंधपंचक[36]मुन्मज्जति । उन्मग्नं स्कंधपंचकं ग[37]तिपंचके [38]ऽनुपूर्वं ग्लापयति । ग्लानं विगच्छति । ग्लान[39]विगमाज्ज्व[40]रपरिदा[41]हः । ज्व[42]रपरिदा[43]हनिदाना[44]ः सर्वशोकपरिदेवदुःखदौर्मनस्योपायासाः समुदागच्छंति । न[45] चैषां कश्चित्समुदाने[46]ता । स्वभावानाभोगाभ्यां च विगच्छन्ति[47] । न चैषां कश्चिद्विगमयिता ।

एवं हि[48] बोधिसत्त्वो ऽनुलोमाकारं प्र[49]तीत्यसमुत्पादं प्रत्यवेक्षते । तस्यैवं भवति । सत्येष्व[50]ज्ञानं परमार्थतो ऽविद्या । अविद्याप्रकृतस्य कर्मणो विपाकः संस्कारः[51] । संस्कारनिश्रि[52]तं प्रथमं चि[53]त्तं विज्ञानं । विज्ञानसहजा[54]ः चत्वार उपादानस्कंधा नामरूपं । नामरूपविवृद्धिः

1 म—MS.K.K'. 2 य इति T. यः। इति K'. 3 तेन R. 4 वृ T. 5 तो MS. 6 लाखि K. 7 णः। अ T. नो K. 8 णि T. 9 प्र—K'. 10 ताः All MSS. 11 ताः। T. 12 नै K'. मे K. 13 ज्यानभिसं T. 14 रैरवरोपितं T. 15 वलोदि MS. 16 तिं K'. 17 वृं T. 18 क्षत्व MS. 19 श्वा MS.K.K'. 20 स्मिं T. 21 ध्यन्दितं T. प्पदिनं MS. प्यन्दनतः R. 22 द्धा T. द्धया च R. 23 ल T. 24 प्र MS. 25 ता MS. 26 द्ध MS. 27 पा T. 28 नां 29 स MS. 30 र्शस्य सं R. 31 प्रादुर्भवति T. 32 ना भवति। तृष्णाभिनन्दनत उपादानं R. 33 श्नो MS. 34 र्धयति All MSS. 35 वः। MS.K.K'. 36 के उन्म T. 37 म MS.K.K'. 38 अनु T. 39 नं T.K. नि MS. 40 जो T. 41 घः T. ह MS. 42 जो T. 43 घ T. 44 or नं? 45 तेषां न T. 46 न MS.K. 47 ति MS. 48 हि—T. 49 ति T. 50 प्वनभिज्ञानं R. 51 राः T.K.K'. 52 स्रि T. 53 त्त T. 54 जाश्च T.

षडायतनं । इंद्रियविषयविज्ञानत्रयसमवधानं सास्र[1]वं[2] स्पर्शः । स्पर्शसहजा वेदना । वेदनाध्यवसानं तृष्णा । तृष्णा[3]विवृद्धिरुपादानं । उपादान[4]प्रसृतं सास्रवं कर्म भवः । कर्मनिष्यन्दो जातिः स्कंधोन्मज्जनं । स्कंधपरिपाको जरा । जीर्णस्य स्कंधभेदो मरणं । [5]मृयमाण[6]स्य विगच्छतः संमू[7]ढस्याभि[8]ष्वंगस्य हृदयसंतापः शोकः । शोकसमु[9]त्थितो वाक्प्रला[10]पः परिदेवः । पंचेन्द्रियनिपातो दुःखं[11] । मनोदृष्टिनिपातो दौर्मनस्यं[12] । दुःखदौर्मनस्यबहु[13]लत्वसं[14]भवतो[15] उपा[16]यासाः । एवमयं केवलो[17] दुःखस्कंधो दुःखवृक्षो[18] ऽभिनिवर्तते[19] कारकवेदक[20]रहित इति । तस्यैवं भवति । कारकाभिनिवेशतः क्रिया[21]ः प्रज्ञायंते । यत्र कारको नास्ति क्रिया [22]अपि तत्र परमार्थतो नोपलभ्यते । तस्यैवं भवति । [23]चित्तमात्रमिदं [24]यदिदं त्रैधातुकं । यान्यपीमानि द्वादशभवांगानि तथागतेन प्रभेदशो व्याख्यातानि [25]तान्यपि स[26]र्वाण्येकचित्तसमाश्रितानि । [27]तत्कस्य हेतोः । यस्मिं वस्तुनि[28] रागसंयुक्तं[29] चित्तमुत्पद्यते तद्विज्ञानं । [30]वस्तु संस्कारः । [31]यः संस्का[32]रः संमोहः [33]साविद्या । अविद्याचित्तसहजं नामरूपं । नामरूपवि[34]रूढिः ष[35]डायतनं[36] । षडायतनभागीयः[37] स्पर्शः[38] । स्पर्शसहजा वेदना । वेदनायमानस्यातृप्तिस्तृष्णा । तृष्णात्तस्य संग्रहो ऽपरित्यागो[39] उपादानं । एषां भ[40]वांगानां संभवो भवः । भवोन्मज्जनं जातिः । जातिपरिपाको जरा । जरापगमो[41] मरणमिति । तत्रा-

1 स्र K'. 2 व MS. वः T.K. 3 श्ना MS. 4 नं T. 5 म्रि T. 6 णो MS. न T. 7 धस्या T. 8 ष्टं MS. 9 ष्टि T. स्थिता R. 10 पाः R. 11 ख T.K. 12 स्यो T. 13 ल—MS.K.K'. 14 भूता उपा T. 15 ता K'. MS. 16 यां MS. 17 ला MS. 18 क्षा T. 19 तो MS. 20 विरहित R. 21 या MS. 22 ऽ T. 23 所言三界此唯是心 Śdh. 三界所有唯是一心 Śn. 三界虚妄但是一心作 Br. 三界虚妄但是心作 (或一心作) Kj. Bb. 其三界者心之所作 Dhr. cf. 愚癡無聞凡夫•於色見是我•若見我者•是名爲行•彼行何因何集何生何轉•無明觸生愛•緣愛起彼行•彼愛何因何集何生何轉•何愛受因受集受生受轉•彼受何因何集何生何轉•彼受觸因觸集觸生觸轉•何觸何因何集何生何轉•謂彼觸六入處因•六入處集•六入處生•六入處轉•彼六入處•無常有爲心緣起法•彼觸受行受•亦無常有爲心緣起法, 雜阿含第二 Taishō vol. II, 14, 1. 24 यदिदं—T. 25 अपि सर्वं T. 26 ण्येव K'. 27 तत्कस्माद्धेतोः K.K'. 28 विरा T. हि रा R. 29 क्त MS. 30 वस्तु संस्कारः ।—All MSS. 31 यः=वस्तु T. 32 रास्संमोहो T. रे ऽस्मिन्मोहो R. रासं MS. or रसं ? 33 सा—T.R. सो ऽवि K. सो वि K'. 34 रुढिः MS. वृद्धिः T. 35 ढा K. 36 न T. 37 य T. 38 र्शे MS.K. 39 गः T. 40 वाङ्गा T. 41 तो T.

विद्या द्विविधकार्यप्रत्युपस्थाना भवति[1] । आलंबनं[2]तः सत्त्वान्संमोहयति । हेतुं च ददाति संस्काराभिनि[3]र्वृत्तये । संस्कारा अपि द्विविधकार्यप्रत्युपस्थाना भवंति । अनागतविपाकाभिनिर्वृ[4]त्तं [5]चा[6]दर्शयति । हेतुं च ददाति विज्ञानाभिनिर्वृत्तये । विज्ञानमपि द्विविधकार्यप्रत्युपस्थानं भवति । भवप्रतिसंधिं च करोति । हेतुं च ददाति नामरूपाभिनिर्वृत्तये । नामरूपमपि द्विविधकार्यप्रत्युपस्थानं भवति । अन्योन्योपस्तंभनं च करोति । हेतुं च ददाति षडायतनाभि[7]निर्वृत्तये । षडायतनमपि द्विविधकार्यप्रत्युपस्था[8]नं भवति । स्वविषयविभ[9]क्तिताश्चादर्शयति । हेतुं च ददाति स्पर्शाभि[10]निर्वृत्तये । स्पर्शो ऽपि द्विविधकार्यप्रत्युपस्था[11]नो भवति । आलंबनस्पर्शश्च[12] भवति । हेतुं च ददाति वेदनाभि[13]निर्वृत्तये । वेदनापि द्विविधका[14]र्यप्रत्युपस्थाना[15] भवति । इष्टानिष्टोभय[16]विपरीतयुक्तानुभवनं च करोति । हेतुं च ददाति तृष्णा[17]भिनिर्वृत्तये । तृष्णा[18]पि द्विविधकार्यप्रत्युपस्थाना भवति । [19]संरंजनीयवस्तुसं[20]रागं च करोति । हेतुं च ददाति उपादानाभिनिर्वृत्तये । उपादानमपि द्विविधकार्यप्रत्युपस्थानं [21]करोति । संक्लेशबन्धनं च करोति । हेतुं च ददाति भवाभिनिर्वृत्तये । भवो ऽ[22]पि द्विविधकार्यप्रत्युपस्थानो भवति । अन्य[23]भवगतिप्रत्युपस्था[24]नं च[25] करोति । हेतुं च ददाति जात्यभिनिर्वृत्तये । जातिरपि द्विविधकार्यप्रत्युपस्थाना भवति । [26]स्कंधोन्मज्जनं च करोति । हेतुं च ददाति जराभिनिर्वृत्तये । जरापि द्विविधकार्यप्रत्युपस्थाना भवति । इंद्रियपरिणामं च करोति । हेतुं च ददाति मरणसमवधानाभिनिर्वृत्तये । मरणमपि द्विविधकार्यप्रत्युपस्थानं भवति । संस्का[27]रविध्वंसनं च करोति । अपरिज्ञा[28]नोप[29]च्छेदं च[30] करोति । तत्राविद्याप्रत्यया[31]ः

1 न्ति K. 2 न—MS. 3 वृ MS.K.K'. 4 त्तिं T.K. 5 च MS. 6 कुर्वन्ति T. 7 वृ MS.K.K'. 8 ष्टा T. 9 क्तिश्चा MS. क्तिं चा K'. 10 वृ MS.K.K'. 11 ने MS. 12 नं च करोति T. 13 वृ MS.K.K'. 14 र्ये MS. 15 नो K. 16 विमुक्तानु T. विपरीतामुक्तानु MS. 17, 18 श्चा MS. 19 स MS. 20 सरागं MS. सुरागं K.K'. 21 भवति R. 22 ऽपि—T. 23 न्ये T.K. 24 न K. 25 च—MS.K. 26 स्कन्दो T. 27 रा MS. 28 नुप T. नानुप R. 29 छंदं K'. छेद K. 30 चेति। तत्रा T. 31 या MS.

संस्कारा इति। अविद्याप्रत्ययता संस्काराणा[1]मनुपच्छेद[2] उपस्तंभश्च। संस्कारप्रत्ययं विज्ञानमिति। संस्कारप्रत्ययता विज्ञाना[3]नुपच्छेद उपस्तंभश्च। विज्ञानप्रत्ययं नामरूपमिति। विज्ञानप्रत्ययता नामरूपानुपच्छेद उपस्तंभश्च। नामरूपप्रत्ययं षडायतनमिति। नामरूपप्रत्ययता षडायतनानुपच्छेद उपस्तंभश्च। षडायतनप्रत्ययः स्पर्श इति। षडायतनप्रत्यय[4]ता स्पर्शानुपच्छेद उपस्तंभश्च। स्पर्शप्रत्यया वेदनेति। स्पर्शप्रत्ययता वेदनानुपच्छेद उपस्तंभश्च। वेदनाप्रत्यया तृष्णेति। वेदनाप्रत्ययता तृष्णानुपच्छेद उपस्तंभश्च। तृष्णाप्रत्ययमुपादानमिति। तृष्णाप्रत्ययता उपादानानुपच्छेद उपस्तंभश्च। उपादानप्रत्ययो भव इति। उपादानप्रत्ययता भवानुपच्छेद उपस्तंभश्च। भवप्रत्यया जातिरिति। भवप्रत्ययता जात्यनुपच्छेद उपस्तंभश्च। जातिप्रत्ययं जरामरणमिति। जातिप्रत्ययता जरामरणा[5]नुपच्छेद उपस्तंभश्च। अविद्यानिरोधात्संस्कारनिरोध इति। अविद्याप्रत्ययताभावात्संस्काराणां[6] व्युपशमो ऽनुपस्तंभश्च। संस्कारनिरोधाद्विज्ञाननिरोध इति। संस्कारप्रत्ययताभावाद्विज्ञानस्य व्युपशमो[7] ऽनुपस्तंभश्च। विज्ञाननिरोधान्नामरूपनिरोध इति। विज्ञानप्रत्ययताभावान्नामरूपस्य व्युपशमो ऽनुपस्तंभश्च। नामरूपनिरोधात् षडायतननिरोध इति। नामरूपप्रत्ययताभावात् षडायतनस्य व्युपशमो ऽनुपस्तंभश्च। षडायतननिरोधात्स्पर्शनिरोध इति। षडायतनप्रत्ययताभावात्स्पर्शस्य व्युपशमो ऽनुपस्तंभश्च। स्पर्शनिरोधाद्वेदनानिरोध इति। स्पर्शप्रत्ययताभावाद्वेदनाया व्युपशमो ऽनुपस्तंभश्च। वेदनानिरोधात्तृ[8]ष्णानिरोध इति। वेदनाप्रत्ययताभावात्तृष्णाया व्युपशमो ऽनुपस्तंभश्च। तृष्णानिरोधादुपादाननिरोध इति। तृष्णाप्रत्ययताभावादुपादानस्य व्युपशमो ऽनुपस्तंभश्च। उपादाननिरोधाद्भवनिरोध इति। उपादानप्रत्ययताभावाद्भवस्य व्युपशमो ऽनुपस्तंभश्च। भवनि-

1 णा—T. 2 दः। T. 3 नुछेद MS. नानुछेद K.K'. नानामनुछेदः। T. 4 यो स्प T. 5 णस्यानु R.
6 रोपशमो नु T. 7 समौ T. 8 श्चा MS.

रोधाज्जातिनिरोध इति । भवप्रत्ययताभावाज्जातेर्व्युपशमो ऽनुपस्तंभश्च । जातिनिरोधाज्जरामरणनिरोध इति । जातिप्रत्ययताभावाज्जरामरणस्य व्युपशमो ऽनुपस्तंभश्च । तत्राविद्या तृ[1]ष्णोपादानं[2] च क्लेशवर्त्मनो ऽव्यवच्[3]छेदः । संस्कारो[4] भवश्च[5] कर्मवर्त्मनो ऽव्यवच्छेदः । परिशेषं दुः[6]खवर्त्मनो ऽव्यवच्छेदः । [7]प्रविभागतः पूर्वान्तापरान्तनिरोधो वर्त्म[8]व्यवच्छेदः । एवमेव त्रिवर्त्म निरात्मकमात्मीयरहितं । संभवति [9]विभवति[10] स्वभावतो नडकलापसदृशं । अपि च[11] खलु पुनर्यदुच्यते । अविद्याप्रत्ययाः संस्कारा इति । एषा पू[12]र्वांतिकी अपेक्षा । विज्ञानं यावद्वेदनेत्येषा प्रत्युत्पन्ना अपेक्षा । तृष्णा यावद्भव इ[13]त्येषा अपरान्तिकी अपेक्षा । अत ऊ[14]र्ध्वमस्याः प्रवृत्तिरिति । अविद्यानिरोधात्संस्कारनिरोध इति । अपेक्षाव्यवच्छेद एष[15] एवं[16] शेषाणां । अपि तु खलु पुनः त्रिदुःखता द्वादशभवाङ्गान्युपादाय । तत्राविद्या संस्कारा यावत् षडायतनमित्येषा संस्कारदुःखता । स्पर्शो[17] वेदना [18]चैषा दुःखदुःखता । परिशेषाणि भवांगान्[19]येषा [20]विपरिणामदुःखता । अविद्यानिरोधात्संस्कारनिरोध इति । त्रिदुःखताव्यवच्छेद एष एवं शेषाणां । अविद्याप्रत्ययाः संस्कारा[21] इति । हेतुप्रत्ययं[22] प्रभवत्वं । संस्काराणामेवं [23]शेषाणाम् । अविद्यानिरोधात्संस्कारनिरोध इति । अभावः संस्काराणामेवं [24]शेषाणां । अविद्या[25]प्रत्ययाः संस्कारा इति । उत्पादविनिबंध एष[26] एवं [27]शेषाणां । अविद्यानिरोधात्संस्कारनिरोध इति । व्ययविनिबन्ध एष[28] एवं [29]शेषाणां । अविद्याप्रत्यया[30]ः संस्कारा इति । भवानुलोम[31]परीक्षा एवं [32]शेषाणां । अविद्यानिरोधात्संस्कारनिरोध इति । क्षयव्ययानुलोम[33]परीक्षा एवं [34]शेषाणां । स एवं दशाकारं प्रतीत्यसमुत्पादं प्रत्यवेक्षते[35] ऽनुलोमप्रति-

1 श्णो MS. 2 नश्च (or ञ्च ?) T. 3 छे MS. 4 र MS. रा R. 5 वं T. 6 खो R. खं T. 7 प्रतिभासतः MS. 8 र्त्माव्य MS. र्त्मनो व्य R. 9 वि 14 शं=च असम्भवयोगेन । विभवति च अविभवयोगेन स्वभावतो नडकलापसदृशम् ॥ R. 10 ति+च T. 11 तु R. 12 पौर्वन्ति T. 13 इत्यैषां T. 14 र्द्धं MS. 15 षः ॥ T. 16 एवं शेषाणां ।—T. 17 र्शा MS. 18 एषा T. 19 नि एषा T. 20 वि—T. 21 र MS. 22 य R. 23,24 परि+शे R. 25 द्या: MS. 26 षः । T. 27 परि+शे T.K.K′. 28 षः । T. 29 परि+शे T.K.K′. 30 या MS. 31 परि T. 32 परि+शे T. 33 परि T. 34 परि+शे T. 35 ते । अनु T.

लोमं । यदुत । भवाङ्गानुसंधितश्च । एकचित्तसमव[1]सरणतश्च । स्वक[2]र्मसंभेदतश्च । [3]अविनि[4]र्भागतश्च । त्रिवर्त्मानुप्रवर्तनतश्च । पूर्वान्तप्रत्युत्पन्नापरान्ता[5]वेक्षणतश्च । त्रिदुःखता[6]समुदयतश्च । हेतु[7]प्रत्यय[8][9]प्रभवतश्च । उत्पादव्ययविनिबंधतश्च । [10]भावक्षयताप्रत्यवेक्षणतश्च । तस्यैवं [11]दशाकारं प्रतीत्यसमुत्पादं प्रत्यवेक्षमा[12]नस्य । निरात्मतो[13] निःसत्त्वतो नि[14]र्जीवतो निः[15]पुंगलतः [16]स्वभावशून्यतः कारकवेदकरहितत[17]श्च । प्रत्यवेक्षमाणस्य शून्यताविमोक्षमुखमाजातं भवति । [18]तस्यैषां[19] [20]भवांगानां स्वभावनिरो[21]धातात्यन्तविमोक्षप्रत्युपस्थानतो । न किं चिद्धर्मनिमित्तमुत्पद्यते । अतो ऽस्यानिमित्तविमोक्षमुखमाजातं भवति । तस्यैवं शून्यतानिमित्तमवतीर्णस्य न कश्चिदभिलाप उत्पद्यते । अन्यत्र महाकरुणा[22]पूर्वंगमात् । सत्त्वपरिपा[23]कादेवमस्याप्रणि[24]हितविमोक्षमुखमाजातं भवति । [25]स इमानि [26]त्रीणि विमोक्षमुखानि भावयन्नात्मपरसंज्ञाप[27]गतः कार[28]कवेदकसंज्ञाप[29]गतो भावाभावसंज्ञापगतो । भूयस्या मात्रया महाकरुणा[30]पुरस्कृतः प्रयुज्यते । अपरिनिष्पन्ना[31]नां [32]बोध्यंगानां परिनिष्पत्तये । तस्यैवं भवति । संयोगा[33]त्संस्कृतं प्रवर्तते विसंयोगान्न प्रवर्तते । सामग्र्याः संस्कृतं प्रवर्तते[34] विसामग्र्या न प्रवर्तते[35] । हन्त [36]वयमेवं[37] बहुदोषदुष्टं[38] संस्[39]कृतं विदि[40]त्वास्य [41]संयोगस्या[42]स्याश्च सामाग्र्या व्यवच्छेदं[43] [44]कारयिष्यामो न चात्यन्तोपशमं [45]संस्काराणाम[46]धिगमिष्याम[47]ः सत्त्वपरिपाचना[48]यै । एवमस्य भवंतो जिनपुत्राः संस्कारगतं बहुदोषदुष्टं[49] स्वभावरहि[50]तमनुत्पन्नानि[51]रुद्धं प्रकृत्या प्रत्यवेक्ष[52]माणस्य

1 श K'. 2 र्मा T. 3 अभि MS.K'. 4 र्भो MS. 5 पे T. 6 तो T. 7 तुं MS. 8 यं MS. 9 प्रभव–T.K'. 10 अभावा T. 觀有盡故 Sdh. 無所有盡觀故 Sn. 無所有盡觀 Bb. 11 द्वा+द MS.K.K'. 12 ण T.K'. 13 जो MS. 14 जी T.K.K'. 15 पुद्ग R. 16 स्व 4 तः–T. 17 श्च+अस्वामिकतो हेतुप्रत्ययाधी(धि K.)नतः स्वभावशून्यतो विविक्ततो अस्वभावतश्च प्रकृत्या T.K.,+觀緣起故 Sdh. 無主屬衆因緣 Bb. 無主屬衆因緣無所有 Kj. 18 त 35 ते=तस्यैव शून्यतानिमित्तमवतीर्णस्य न कश्चिदभिलाप उत्पद्यते। T. 19 वं R. 20 भा K. 21 धता MS. 22 पूर्वकां। सत्त्व T. 23 चनादे T. 24 तं T. 25 य R. 26 त्रि T. 27 तं MS. 28 कं वे T. 29 प–MS. 30 णां T. 31 नं MS. 32 बो 8 ये=परिनिष्ठायोः K. 33 त्सं K. 34, 35 त MS. 36 व्यमे MS. 37 व K. 38 ष्ट MS. 39 स्कृ MS. 40 त्वा ऽस्य K. 41 यो–MS. 42 स्य सा T. स्याः सा R. 43 द K. 44 करिष्य T. 45 सर्व+सं R. 46 विरागयिष्य T. 47 म। MS. 48 नतायै R. 49 ष्ट MS. 50 तंम MS. 51 रु MS. 52 मा–MS.

महाकरुणाभिनिर्हारतश्च सत्त्वकाया[1]नुत्सर्गतश्च । असंगज्ञानाभिमुखो नाम प्रज्ञापारमिताविहार आमुखीभवत्यवभासयोगेन । स[2] एवं ज्ञानसमन्वागतः प्रज्ञापारमिताविहारावभासितो बोध्यंगाहारकांश्च प्रत्ययानु[3]पचिनोत्युपसंहरति । न च संस्कृतसंवासेन संवसति । स्वभावोपशमं च संस्काराणां प्रत्यवेक्षते । न च तत्राव[4]तिष्ठते बोध्यंगापरिपूरि[5]त्वा[6]त् । तस्यास्यामभिमुख्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्यावतारशून्यता[7] च नाम समाधिराजायते । स्वभावशून्यता च । परमार्थशून्यता च । परमशून्यता च । महाशून्यता च । संप्रयोगशून्यता च । अभि[8]निर्हारशून्यता च । यथावदविकल्पशून्यता च । सापेक्षशून्यता च । [9]विनिर्भा[10]गाविनिर्भा[11]ग[12]शून्यता च नाम समाधिराजायते । तस्यैवंप्रमुखानि दशशून्यतासमाधिमुखशतसहस्राण्यामुखीभवंति । एव[13]मनिमित्तसमाधिमुखश[14]तसहस्राणि । अप्रणिहितसमाधिमुखशतसहस्राण्यामुखीभवंति । तस्य भूयस्या मात्रया [15]ऽस्यामभिमुख्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्याभे[16]द्याशयता च परिपूर्यते । नियताशयता च कल्याणाशयता च । गंभीराशयता च अप्रत्युदावर्त्याशयता च । अप्रतिप्रस्रब्धाशयता च विमलाशयता च । अनन्ताशयता च ज्ञानाभिलाषाशयता च । उपायप्रज्ञासंप्रयोगाशयता च परिपूर्यते । तस्यैते दशबोधिसत्त्वाशया[17]ः स्वनुगता भवंति तथागतबोधौ । अप्रत्युदावर्तनीय[18]वीर्यश्च भवति सर्वपरप्रवादिभिः । समवसृतश्च भवति ज्ञानभूमौ[19] । विनिवृ[20]त्तश्च भवति श्रावकप्रत्येक[21]बुद्धभूमिभ्यः[22] । एकांतिकश्च भवति बुद्धज्ञानाभिमुखतायां । असंहार्यश्च भवति [23]सर्वमारक्लेशसमुदाचारैः । सुप्रतिष्ठितश्च भवति बोधिसत्त्वज्ञानालोकतायां । सुपरिभावितश्च भवति शून्यतानिमित्ताप्रणिहितधर्मसमुदाचारैः[24] । संप्रयु[25]क्तश्च भव[26]त्युपायप्रज्ञाविचारैः ।

1 यों ऽनु T. 2 श T. 3 नुपसंहरति T. 4 व–T. 5 त्यक्तत्वात् R. 6 त+त्वा T. 7 नां T. 8 भि–T. 9 विनिर्भागा–T. 10 र्भो K. 11 र्भो T. 12 गि K. 13 मा All MSS. 14 शत–All MSS. 15 अभिमुख्यां T. 16 दा T. 17 या सानु MS. 18 वीर्य–K. 19 मि T. 20 वृं K.K′. 21 बुद्ध–MS. 22 भ्यां T. 23 सर्व–MS K′. 24 रै T. 25 युजश्च T. 26 ति उपा T.

व्यवकीर्णश्च भवति बोधिपाक्षिकधर्माभिनिर्हारैः । तस्यास्यामभिमुख्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्य प्रज्ञापारमिताविहारो ऽ[1]तिरिक्ततर आजातो भवति । तीक्ष्णा चानुलोमिकी तृतीयां[2] क्षांतिरेषां[3] धर्माणां । यथावदनुलोमतयानविलोमतया । तस्यास्यामभिमुख्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्य बहवो बुद्धा [4]आभासमागच्छंत्यौदारिकदर्शनेन प्रणिधानबलेन च । बहूनि बुद्धशतानि बहूनि बुद्धसहस्राणि । बहूनि बुद्धशतसहस्राणि । बहूनि बुद्धनियुतशतसहस्राणि । बह्वो बुद्धकोट्यः । बहूनि बुद्धकोटीशतानि । बहूनि बुद्धकोटीसहस्राणि । बहूनि बुद्धकोटीशतसहस्राणि । बहूनि बुद्धकोटीनियुतशतसहस्राणि । आभासमागच्छंत्यौदारिकदर्शनेन प्रणिधानबलेन च । स तांस्तथागतानर्हतः सम्यक्संबुद्धान्दृ[5]ष्ट्वोदाराध्याशयतया च । सत्करोति गुरुकरोति मानयति पूजयति चीवरपिण्डपातशयनाशनग्लानप्रत्ययभैषज्यपरि[6]ष्कारैश्च प्रतिपादयति । बोधिसत्त्वसुखोपधानं चोपसंहरति । [7]संघगणसंमाननां च करोति । तानि च कुशलमूलान्यनुत्तरायां सम्यक्संबोधौ परिणामयति । तां[8]श्च तथागतानर्हतः सम्यक्संबुद्धान् पर्युपास्ते । तेषां च सकाशाद्गौरवचित्रीकारेण सत्कृत्य धर्मदेशनां शृणोति । उद्गृह्णाति [9]धारयति । श्रुत्वा च यथावत्समापत्तिप्रज्ञा[10]ज्ञानालोकतया प्रयुज्यते । प्रतिपत्तितश्चाधारयति । स भूयस्या मात्रया तथागतधर्मकोशप्राप्तो भवति । तस्यास्यामभिमुख्यां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्व[11]स्यानेकान्कल्पांस्तानि कुशलमूलानि भूयस्या मात्रयोत्तप्तप्रभास्वरत[12]राणि भवंति । अनेकानि कल्पशतान्यनेकानि कल्पसहस्राण्यनेकानि कल्पशतसहस्राण्यनेकानि कल्पनियुतशतसहस्राणि । अनेकाः कल्पकोट्यो अनेकानि कल्पकोटीशतानि । अनेकानि कल्पकोटीसहस्राणि । अनेकानि कल्पकोटीश-

1 अ T. 2 यां T. 3 षा T.K'. 4 आ–T. 5 ष्ट्वा उ T. ष्ट्यो MS. 6 स्का MS. 7 सन्माननं T. 8 नाश्च K. 9 धारयति–MS. 10 ज्ञा–MS.K.K'. 11 स्य अनेकानि कल्पशतानि T. 12 मा MS.

तसहस्राणि । अनेकानि कल्पकोटीनियुतशतसहस्राणि । तानि कुशलमूलानि भूयस्या मात्र-[1]योत्तप्तप्रभास्वर[2]तराणि भवंति । तद्यथापि नाम भवंतो जिनपुत्रास्तदेव जातरूपं वैडूर्यपरि[3]सृष्टं भूयस्या मात्रयोत्तप्तप्रभास्वरतरं भवं[4]ति । एवमेव भवंतो जिनपुत्रा बोधिसत्त्वस्यास्यामभिमुख्यां बोधिसत्त्वभूमौ स्थितस्य तानि कुशलमूलानि । उपायप्रज्ञा[5]विचा[6]रितानि भूयस्या मात्रयोत्तप्तप्रभास्वरतराणि भवंति । भूयो भूयश्च प्रशमासंहार्यतां गच्छन्ति[7] । तद्यथापि नाम भवंतो जिनपुत्राश्चंद्राभा सत्त्वाश्र[8]यांश्च प्रह्लादयति । असंहार्याश्च भवति चतसृभिर्वातमण्डलीभिः । एवमेव भवन्तो जिनपुत्रा बोधिसत्त्वस्यास्यामभिमुख्यां बोधिसत्त्वभूमौ [9]स्थितस्य तानि कुशलमूलानि । अनेकेषां [10]सत्त्वकोटीनियुतशतसहस्राणां क्लेशज्वालाः प्रशमयन्ति प्रह्लादयन्ति । असंहार्याणि चतुर्भिर्मारा[11]वचरैः । तस्य दशभ्यः पारमिताभ्यः प्रज्ञापारमितातिरिक्ततमा[12] भवति । न च परिशेषासु न समुदागच्छति । यथाबलं यथाभजमानम् । इयं भवंतो जिनपुत्रा बोधिसत्त्वस्याभिमुखी नाम षष्ठी बोधिसत्त्वभूमिः समासनिर्देशतः । यस्यां प्रतिष्ठितो बोधिसत्त्वो भूयस्त्वेन सुनिर्मितो भवति देवराजः । कृती प्रभुः सत्त्वानामभिमानप्रतिप्रस्रब्धये । कुशलः सत्त्वांस्तेभ्यो ऽभिमानिकधर्मेभ्यो विनिवर्तयितुं । असंहार्यश्च भवति सर्वश्रावकपरिपृच्छायां । कुशलः सत्त्वां [13]प्रतीत्यसमुत्पादे[14] ऽवतारयितुं । यच्च किं चित्कर्मारभते दानेन वा प्रियवद्यतया [15]वार्थक्रियया वा समानार्थतया वा तत्सर्वमविरहितं बुद्धमनसिकारैर्धर्ममनसिकारैः संघमनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्यामनसिकारैः पारमितामनसिकारैर्भूमिमनसिकारैर्बलमनसिकारैर्वैशारद्यमनसिकारैः आवेणिकबुद्धधर्ममनसिकारैर्यावत्सर्वाकारवरोपेतसर्वज्ञज्ञानमनसिकारैः । किमिति सर्वसत्त्वानामग्र्यो भवेयं । श्रेष्ठो[16]

1 यौ T. 2 रत—T. 3 पृ MS. or मृ ? 4 वं MS. 5 ज्ञाज्ञान MS.K.K'. 6 हा MS.K.K'. 7 ति MS. 8 मा K. 9 ष्ठि T. 10 बोधि+स MS.K.T. 11 रपथावतारैः T. 12 मो K'. 13 ति T. 14 द म(अ ?)वतरितुं निमित्तं T. 15 वा अर्थ T. 16 ष्ठो+भवेयं MS.

ज्येष्ठो वरः प्रवर[1] उत्तमो[2] ऽनुत्तमो नायको विनायकः परिना[3]यको[4] यावत्सर्वज्ञज्ञानप्रतिशरणो भवेयमिति । आकांक्षंश्च तथारूपं वीर्यमारभते । यथारूपेण वीर्यारंभेणैकक्षणलवमुहूर्तेन ससाधिको[5]टीशतसहस्रं च प्रतिलभते समापद्यते च । बुद्धकोटीशतसहस्रं च पश्यति । तेषां चाधिष्ठानं संजानीते । लोकधातुकोटीशतसहस्रं च कंपयति । क्षेत्रकोटीशतसहस्रं चा[6]क्रमति । लोकधातुकोटीशतसहस्रं चावभासयति । सत्त्वकोटीशतसहस्रं च परिपाचयति । कल्पकोटीशतसहस्रं च तिष्ठति । कल्पकोटीशतसहस्रं च पूर्वान्तापरान्ततः प्रविशति । धर्ममुखकोटीशतसहस्रं च प्रविचिनोति । कायकोटीशतसहस्रं चादर्शयति । कायं कायं च बोधिसत्त्वकोटीशतसहस्रपरिवारमादर्शयति । तत उत्तरे प्रणिधानबलिका बोधिसत्त्वाः प्रणिधानवैशेषिकतया विकुर्वंति । येषां न सुकरा संख्या कर्तुं । कायस्य वा प्रभाया वा ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्याया वा व्यूहस्य वाधिष्ठानस्य वाधिमुक्तेर्वाभिसंस्काराणां वा यावदेव तावद्भिरपि कल्पकोटीनियुतशतसहस्रैरिति ॥

अथ खलु वज्रगर्भो बोधिसत्त्वो महासत्त्व एतमेव भूम्यर्थं प्र[7]रूपयमानस्तस्यां वेलायामिमा[8] गाथा अभाषत ॥

[9]परिपूर्णमार्ग[10]चरणा [11]विदु पंचमायां
धर्मानिमित्तत अल[12]क्षणता[13] अजाता[14] ।
अनुत्पादआदिपरिशुद्ध[15]यभि[16]निः[17]प्रपंचां
[18]भाव[19]त्व ज्ञानमति षष्ठि समाक्रमंति ॥ १ ॥

1 रः T. 2 म अनु T. 3 णा T.K'. 4 कः T. 5 टी+नियुत MS. 6 क्रा T 7 पूरय K'. 8 मां गाथाम (अ?) भापतः MS. 9 Metre: वसंततिलका 10 र्णु L. 11 रविंदु MS. 12 र T. 13 तो L. 14 तां K.K'. 15 ति All MSS. 16 निष्प्र RS. 17 चान् MS. 18 亦無取捨如幻等•有無不二離分別•隨順法性如是觀•由此智入第六地 Śdh. 體相寂滅如幻等•有無不二離分別•隨順法性如是觀•此智得成入六地 Śn. 諸法常離相•不取亦不捨•性空猶如幻•離二無分別•隨順如是行•得入第六地 Bb. 諸法常離相•不取亦不捨•性空猶如幻•離二無分別•若能順如是•微妙之理趣•心無有違逆•得入第六地 Kj. 諸法爲寂寞•靜然無想念•自然猶幻化•解脱於生死•以致柔順忍•法目無所亂•其慧轉殊勝•則勤修六住 Dhr. 19 वेत्व K.K'. वेत्त T.L.

धर्मा विविक्त अनियूह[1] च[2] निर्विकल्पा[3]
मायास्वभाव द्वयभावतु[4] विप्रयुक्ता[5] ।
अनुलोमयन्तु[6] अविरोधन्तु[7] धर्मनेत्री
ज्ञानान्विताः[8] प्रवरषष्ठिं[9] समाक्रमन्ति ॥ २ ॥
तीक्ष्णानुलोमस्थित ज्ञानबलो[10]पु[11]पेताः[12]
समुदागमं विभवं[13] प्रेक्षिषु सर्वलोके ।
मोहांधकारप्रभवं जगसंभवात्मा
तस्यैव मोहविगमेन प्रवृत्ति नास्ति ॥ ३ ॥
विचिनंति प्रत्ययकृतिं परमार्थशून्यां[14]
क्रियं[15]हेतुप्रत्ययसमज्ञक्रियाविरोधौ ।
याथावतः[16] करकपेतक्रियां विदित्वा
विचिनंति[17] संस्कृतं[18] घनाभ्र[19]समं[20] निरीहं ॥ ४ ॥
सत्येषु ज्ञानं[21] परमार्थतु सा अविद्या
कर्मा[22] च[23] चेतन च[24] तेन विभागप्राप्तं ।
चित्तं[25] निश्रय[26]सहजं पुन नामरूपं

1 अप्रतिग्रह (अवियूह) RS. आभिपृह T. 2 च—All MSS. 3 ल्पां T.K.K'. 4 or वय? 5 क्तां T.K.K'. 6 न्त L. 7 लोमन्त RS. or रोधतु? 8 न्धि T. 9 ष्ठीं L. 10 व All MSS. 11 प MS. 12 ता MS. 13 वु K'.L. 14 न्य MS. 15 या MS.K. 16 यथा T. याथ K. योथा MS. 17 रं T. 18 स्त्व MS. स्त्वा T.L. 19 णा T. 20 मन्नि T.L. 21 नु T.L. 22 अविद्याप्रकृतस्य कर्मणो विपाकः संस्कारः। संस्कारनिश्रितं प्रथमं चित्तं विज्ञानं; यस्मिं वस्तुनि रागसंयुक्तचित्तमुत्पद्यते तद्विज्ञानं। यः संस्कारः संमोहः साविद्या। (अविद्याचित्तसहजं नामरूपं) Prose, 癡所造業果名行・生時初心名爲識 Śdh. 所作思業愚癡果・識起…Sn. 從是(事)則生思・身口業行果・從行故有識 Bb. 從是則生思・身口業得報・從行故有識 Kj. 思想緣罪福・得報以癡果・從思想已故 Dhr. 23 च—All MSS. 24 च तेन=चरेन MS. 25 त्तं+च MS. 26 श्रित्य RS. or श्राय?

[1]एवं [2]पु संभवति याव [3]दुखस्य स्कंधः ॥ ५ ॥
ते चित्तमात्र [4]ति [5]त्रैधातुकमोतरंति
अपि चा भवांग इति [6]द्वादश एकचित्ते ।
संरागुजातु अपि [7]चित्तुप्रभावितस्तु
[8]व्ययु संभवक्षयं[9] [10]पुनरपि चित्तभागम् ॥ ६ ॥
[11]कार्यं अविद्य द्वय कुर्वति मोहभावं[12]
मोहेति[13] [14]हेतु ददती पुन [15]चेतनायाः ।
एवं च याव [16]जरध्वंसन स्कंधभेदं
[17]अतु सर्वदुःखप्रभवं[18] [19]क्षयतः अभावः ॥ ७ ॥
उच्छेदु[20] [21]नो भवति प्रत्ययतामविद्या
नोच्छेद्यतापि [22]करं [23]प्रहाय सन्निरोधं ।
मोहो[24] [25]च [26]तृष्ण [27]च [28]उपादन [29]क्लेशवर्त्म[30]
कर्मा भवश्च[31] अपि [32]चेतन शेष दुःखा[33] ॥ ८ ॥
मोहं तु आयतन [34]संस्कृतदुःख तेषां
स्पर्शश्च वेदन[35]वृद्धि [36]दुखतायदुःखा ।

1 卽此增長名六處•三和謂觸俱生受•於受名愛愛增取•有漏業有緣起生•緣熟名老緣壞死+ए Sdh. 2 खु K.K′. मुखं संभवति T.L. मुखा° RS. 3 दुः MS. दुः RS. 4 ति—All MSS. 5 or ति? 6 or वा? 7 न्नु MS.K.K′. 8 एवं च RS. 9 यं MS. 10 न चित्ततभागं MS. न चित्तभागम् RS. 11 तत्राविद्या द्विविधकार्यप्रत्युपस्थाना भवति। आलंबनतः सत्त्वान्संमोहयति हेतुं च ददाति संस्काराभिनिर्वृत्तये । Prose. 12 वे RS. 13 भि MS.K′. हि RS. 14 दहते L. वहति RS. 15 नाः MS. or नाय? 16 ज्व All MSS. 17 नु L. 18 स MS. 19 द्व L. 20 (दनो) RS. 21 ना K. 22 ल T. 23 or प्राहय? 24 ह T. 25 च—MS.K.K′.T.L. 26 तेपु RS.. 27 च—K′. 28 दानं T. 29 行有是業 Sn. 行及有是業 Bb. तत्राविद्यातृष्णोपादानं च क्लेशवर्त्मनो ऽव्यवछेदः। संस्कारभवश्च कर्मवर्त्मनो ऽव्यवछेदः। परिशेषं दुःखवर्त्मनो ऽव्यवछेदः प्रविभागतः। Prose. 30 र्त्म संभवः। कर्मा T. र्त्म च संभवः। कर्मा K′. 31 श्च T. 32 चेतन=(संस्कार) RS. also in prose. 33 खाः T.K.K′.L. 34 (संस्कार) RS. also in prose. 35 सुखा T.K′.L. 36 दुः MS.

शे[1]षानमं[2]गन[3] परिणामदुःखवृद्धि-
व्युच्छेद तस्य [4]दुखता न हि आत्म [5]अस्ति ॥ ९ ॥
[6]आवेषु पूर्व तमचेतन संस्कृतश्च[7]
विज्ञान[8]वेदन विवर्तति प्रत्युत्पन्नं ।
अपरान्तु ते[9]षु प्रभवो दुख संभवेयं
[10]आवेषछेदु प्र[11]सरं च निरीक्षयंतः ॥ १० ॥
मोहस्य प्रत्ययतु संभवते [12]विबन्धो
विनिबंधन व्ययक्षये[13] सति प्रत्ययानां ।
हेतु[14]श्च [15]फलप्रभवं न तु हेतुभेदं
व्युपरीक्ष[16]ते च जिन[17]ज्ञा[18]नस्वभावशून्यं ॥ ११ ॥
अनुलोम मोहप्रभवं च प्रभावतश्च
प्रतिलोम हेतुक्षयतो[19] भवसर्वछेद्यं ।
गंभीरप्रत्यय तमस्य सतो[20] सतश्च
व्युपरीक्षते दशविधं अनिकेतबुद्धिः ॥ १२ ॥
[21]सन्धीभवांगतु तथापि[22] च कर्मस्थानं[23]

1 पात्मान MS. K.K'.T. 2 सं MS. 3 म् MS. K.K'.T. 4 दुः All MSS. 5 म K.K'. 6 अध्वेषु RS. 7 स्य All MSS. 8 वेदचित्त वर्तति MS. 9 (तेष=तृष्णा) RS.,=तेषां 10 आवछेदुः MS. आवेधच्छेदु T.K. L. अपेक्षच्छेदु RS. 觀待斷是苦邊際 Sdh. 觀待若斷邊際盡 Śn. 無明若滅者•是則無有苦 Kj. 又(有)所消滅者•觀之所永盡 Dhr. 11 शर T. 12 विवर्त्तो MS. विवर्त्वो K. °त्वा L. °र्त्वा T. विबन्धा (विबृध्द्वा) RS. 13 य MS. 14 तुंश्च MS. तोश्च RS. 15 मूल All MSS. फल Kj. Bb. Śn. 16 क्षः MS. 17 न+स्व MS. 18 or जा? 19 ता MS. तां T.K.K'. 20 ता MS. 21 प्रधी MS. अन्धी T.K.K'. 1 भवाङ्गानुसंधितश्च, 2 एकचित्तसमवसरणतश्च, 3 स्वकर्मसंभेदतश्च, 4 अविनिर्भागतश्च, 5 त्रिवर्त्मानुप्रवर्तनतश्च, 6 पूर्वान्तप्रत्युत्पन्नापरान्तापेक्षणतश्च, 7 त्रिदुःखतासमुदयतश्च, 8 हेतुप्रत्ययतश्च, 9 उत्पादव्ययविनिबंधतश्च, 10 अभावाक्षयताप्रत्यवेक्षणतश्च Prose, 有支相續一心攝•自業不離及三流•三際三苦因緣生•連縛起滅順無盡 Sdh. 有支相續一心攝•自業不離及三道•三際三苦因緣生•繫縛起滅順無盡 Śn. 作不捨一心•分別有三道•三種苦差別•生滅於縛法•無所有及盡 Bb. 不離一心中•分別有三道•從三種苦觀•及以生滅法•無所有而盡 Kj. 其財業三品•從本來展轉•剖判三苦行•起滅之處所•無所有除盡 Dhr. 22 or हि? 23 न MS.

अविभागत[1]स्त्रिविधु [2]वर्त्मनि पूर्वतश्च ।

त्रिय[3]दुःखहेतुविभवा उदयव्ययं च

[4]आभावतो [5]क्षयत प्रत्यय[6]आनुलोमं ॥ १३ ॥

एवं प्रतीत्यसमुत्पाद [7]समोतरंति

मायो[8]पमं वितथ वेद[9]क[10]मा[11]पनीतं ।

स्वप्नोपमं [12]च तथताप्रति[13]भा[14]स चैव

बा[15]लान मोह[16]न [17]मरीचिसमस्वभावं ॥ १४ ॥

या एव भावन स शून्यत पण्डितानां

[18]रति प्रत्ययान भवते इदमानिमित्तं ।

जानित्व जा[19]गु वितथं प्रणिधा[20]नु नास्ति

अन्यत्र सत्त्व कृप[21]यो उपपद्ययंति ॥ १५ ॥

एवं विमोक्षमुख [22]भा[23]वयि ते महात्मा

कृपबुद्धि भूय त[24]थ [25]बुद्धगुणाभिला[26]षी ।

संयोग संस्[27]कृत इति व्यु[28]परीक्षमाणो[29]

[30]विगतं भुयो भवति नै[31]क[32]गुणोपुपे[33]तः ॥ १६ ॥

1 ता MS. 2 वर्त्तति MS.K.K'.T.L. 3 हेतुदुःख MS.K.K'.T.L. 4 अ All MSS. 5 अक्षयत MS. 6 अतु MS.K'. 7 शमो भवंति MS. 8 मे K. 9 दु K. 10 मा RS. or रा? 11 यनेकं MS. यनतं K'. यनेतं K. 12 (श्च) RS. 13 हासश्चैव MS. 14 य L. 15 लो MS. 16 न—MS. 17 रि T. 18 चरति MS. 諸緣爲恍惚・奉此無堅相 Dhr. 無緣則無相 Kj. 事滅不相續・入於無相行 Bb. 知緣性離入無相 Sdh. 知緣性離得無相 Sn. तस्यैषां भवांगानां स्वभावनिरोधातात्यन्तविमोक्षप्रत्युपस्थानो न किं चिद्धर्मनिमित्तमुत्पद्यते Prose. 19 तु T.K.K'. 20 न MS. न् T. 21 यो K. 22 भ MS. 23 यिते RS. 24 (था) RS. 25 भूयगुणा MS. बुद्धगुणा RS. Bb. Kj. Dhr. 26 पं MS. 27 स्कृतिव्यु MS.K.K'. स्कृतीव्यु T.L. स्कृति-कृतव्यु RS. 28 रि T. 29 णः K'. 30 नियताशयो भवति RS. 無諸情慼患・逮無量功勳 Dhr. 志樂決定勤行道 Sn. 志樂決定勤精進 Sdh. 31 व K. 32 गणा T. 33 त MS.

पूर्णा सहस्रदश शून्यतये[1] समाधी[2]
त्त्वचर्याबलं समुदागच्छ[1]त्यविचाल्ययोगेन । तद्यथापि नाम भो[2] जिनपुत्र[3] महासमुद्रगामी[4] पोतः । अप्राप्तो महासमुद्रं साभोगवाहनो भवति । [5]समनंतरमनुप्राप्तो महासमुद्र[6]मनाभोगवाहनो वातमण्डलीप्रणीतः । [7]यदेकदिवसेन महासमुद्रे [8]क्रमते [9]तत्पूर्वं साभोगवाहनतया न शक्यं वर्षशतेनापि तावदप्रमेयमनुप्राप्तुं । एवमेव भो[10] जिनपुत्र[11] बोधिसत्त्वः सुसंभृत[12]कुशलमू[13]लसंभारः । महायानसमुदागमा[14]भिरूढो[15] [16]महाबोधिसत्त्वचर्यासागरमनुप्राप्तो यदेकमुहूर्तेन ज्ञाना[17]नाभोगतया सर्वज्ञज्ञानमाक्रा[18]मति तन्न शक्यं पूर्वके[19]न साभोगकर्मणा कल्पशतसहस्रे[20]णापि तावदप्रमेयमनुप्राप्तुं । तत्र भो[21] जिनपुत्र[22] बोधिसत्त्वो [23]ऽष्टमीं[24] बोधिसत्त्वभूमिमनुप्राप्तो मह[25]त्योपायकौशल्यज्ञानाभिनिर्हारा[26]नाभोगप्रसृत[27]तया बोधिसत्त्व[28]बुद्ध्या सर्वज्ञज्ञानं[29] विचारयं[30] लोकधातुसंभवं च विचारयति । लोकधातुविभवं च विचारयति । [31]यथा च लोकः संव[32]र्तयते तं च प्रजानाति । यथा च लोको विवर्तते तं च प्रजानाति । येन च कर्मोपचयेन लोकः संवर्तते तं च प्रजानाति । येन च [33]कर्मक्षयेण लोको विवर्तते तं च प्रजानाति । यावत्कालं[34] च लोकः[35] [36]संवर्तते तं च प्रजानाति । यावत्कालं च लोको[37] विवर्तते तं च प्रजानाति । यावत्कालं च लोकः[38] संवृत्तस्तिष्ठति तं च प्रजानाति । यावत्कालं च लोको विवृत्तस्तिष्ठति तं च प्रजानाति । सर्वत्र चानवशेषतः स पृथिवीधातुपरीत्ततां च प्रजानाति । महद्गततां चाप्रमाणतां च विभक्तितां च प्रजानाति । सो ऽब्धातुपरित्ततां च प्रजानाति महद्गततां चाप्रमाणतां च विभक्तितां च प्रजानाति । स तेजोधातुपरीत्ततां च प्रजानाति महद्गततां चाप्रमाणतां च विभक्तितां च प्रजानाति । स वायुधातुप[39]रीत्ततां

1 च्छं MS. 2 भवन्तो T. 3 त्राः T. 4 मिनी MS. 5 स एव+स T. 6 द्रताभो MS. 7 य एक T. 8 क K. 9 तत्सर्वंसा R 10 भवन्तो T. 11 त्रा T. 12 तः महाकु T 13 मूल—K. 14 मो MS.K. 15 ढौ T. 16 महा—T. 17 ना—MS.T.K'. 18 क्र K'. 19 ण T. 20 ना T. 21 भवन्तो T. 22 त्रा T. 23 ऽ—K'. 24 मी MS.K. 25 त्यौ K'. 26 णा R. 27 त—MS. 28 बुद्धया—MS. 29 न MS. 30 येन T. 31 स+य T. 32 र्तते MS.K. 33 ध MS.T. 34 रं T. 35 को विवर्तते तं च K. 36 र्ततिष्ठत तं MS. 37 कः संवर्तते MS. कः संवृतत तं K. 38 को विवृत्त MS.K. 39 रि T.

च प्रजानाति महद्गततां चाप्रमाणतां च विभक्तितां च प्रजानाति। स परमाणुरजःसू[1]क्ष्मतां च प्रजानाति। महद्गततां चाप्रमाणतां च विभक्तितां च प्रजानाति। अप्रमाणपरमाणुरजोविभक्तिकौशल्यं[2] च प्रजानाति। अस्यां च लोकधातौ यावन्ति पृथिवीधातो[3]ः परमाणुरजांसि तानि प्रजानाति। यावंत्यब्धातोः परमाणुरजांसि तानि प्रजानाति। यावंति तेजोधातोः परमाणुरजांसि तानि प्रजानाति। यावंति वायुधातोः परमाणुरजांसि तानि प्रजानाति। यावंत्यो रत्नविभक्तयो यावंति च रत्नपरमाणुरजांसि यावंति च सत्त्वकायपरमाणुरजांसि तानि प्रजानाति। यावंति च क्षेत्रकायपरमाणुरजांसि तानि स[4]र्वाणि प्रजानाति। स सत्त्वानां कायौदारिकतां च [5]प्रजानाति। कायसूक्ष्मतां च कायविभक्तितां च प्रजानाति। यावंति च परमाणुरजांसि संभूतानि नैरयिककायाश्रयतस्[6]तानि प्रजानाति। यावंति[7] तीर्यग्योनिकायाश्रयतः[8]। यावंति[9] यमलोककायाश्रयतः[10]। यावंत्य[11]सुरलोककायाश्रयतः। यावंति देवलोककायाश्रयतः। यावंति मनुष्यकायाश्रयतस्[12]तानि प्रजानाति। स एवं परमाणुरजःप्रभेदज्ञानावतीर्णः कामधातुसंवर्तं[13] च [14]यथाभूतं प्रजानाति। रूपधातुसंवर्तं[15] [16]चारूप्यधातुसंवर्तं[17] च [18]कामधातुविवर्तं च यथाभूतं प्रजानाति। रूपधातुविवर्तं[19] चा[20]रूप्यधातुविवर्तं च [21]यथाभूतं प्रजानाति कामधातुपरीत्ततां च[22] महद्गततां चाप्रमाणतां च विभक्तितां च [23]यथाभूतं प्रजानाति। रूपधात्वरूप्यधातुपरीत्ततां च महद्गततां चाप्रमाणतां च विभक्तितां च यथाभूतं प्रजानाति। [24]त्रैधातुकं[25] च प्रजानाति। त्रैधातुकविचारज्ञानानुगमे [26]खलु पुनः स्वभिनि[27]र्हृतज्ञानालोकः [28]सत्त्वकायप्रभे[29]दज्ञानकुशलः [30]सत्त्वकायविभागज्ञा-

1 शू K'. 2 ल्यं MS.K. 3 तौः MS. 4 सर्वाणि–T. 5 प्रजानाति–T. 6 तः तांश्च परमाणुं प्रजानाति T. 7 तास्तिर्य T. 8 तस्तांश्च प्रजानाति। याव T. 9 तो T. ति+च K'. 10 तस्तांश्च प्रजानाति। याव T. 11 तो ऽसु T. 12 तस्तांश्च प्रजानाति T. 13 र्तुं T. 14 यथाभूतं–T. 15 र्तंश्चा T. 16 च प्रजानाति आरूप्य T. 17 र्तंश्च K. 18 का 6 च–K. 19 र्तंश्चा K.K'. 20 च प्रजानाति आरूप्य T. चा 4 र्तं–K'. 21 यथाभूतं–T. 22 च+प्रजानाति T. 23 यथाभूतं–T. 24 त्रै 7 ति–T. 25 कां K. 26 खलु पुनः–R. 27 हृ MS K'. 28 सत्त्वानां काय T. 29 दः T. 30 स 10 लः–R.

नकुशलः [1]क्षेत्रकायविभागकुशलश्च सत्त्वोपपत्त्यायतनाभिनिर्हारे[2] बुद्धिं चारयति । स यादृशी सत्त्वानामुपपत्तिश्च कामसमुदागमश्च तादृशमेव [3]स्वकाय[4]मधितिष्ठति सत्त्वपरिपाचनाय । स एकमपि त्रिसाहस्रमहासाहस्रं लोकधातुं [5]स्फुरित्वा [6]सत्त्वानां स्वकायं विभक्त्यधिमुक्तिषु तथत्वायोपपत्त[7]ये ऽभिनिर्हरति प्रतिभासज्ञानानुगमनतया स[8] यथा सत्त्वाः[9] परिपाकं गच्छ[10]त्यनुत्त[11]रसम्यक्संबोधिविमुक्तये । एवं द्वौ[12] वा [13]त्रीन्वा [14]चतुरो वा पंच [15]वा दश वा विंशतिं[16] वा त्रिंशतं[17] वा चत्वारिंशतं[18] वा पंचाशतं[19] वा यावदनभिलाप्या[20]नपि त्रिसाहस्रमहासाहस्रां[21]ल्लोकधातू[22]न्स्फुरित्वा सत्त्वानां [23]स्वकायं विभक्त्यधिमुक्तिषु तथत्वायोपपत्त[24]ये ऽभिनिर्हरति प्रतिभासज्ञानानुगमनतया । स एवं ज्ञानसमन्वागतो[25] ऽस्यां भूमौ [26]सुप्रतिष्ठित एकबुद्धक्षेत्राच्च न च[27]लति । अनभिलाप्येषु[28] बुद्धक्षेत्रेषु तथागतपर्षन्मण्डलेषु च [29]प्रतिभासप्राप्तो भवति । [30]स यादृशी सत्त्वानां [31]कायविभक्तिश्[32]च [33]वर्णलिंगसंस्थानारोहपरिणाहाधिमुक्त्[34]यध्याशयश्च तेषु तेषु बुद्धक्षेत्रे[35]षु पर्षन्मण्डलेषु तत्र तत्र तथा तथा [36]कायमादर्शयति । स श्रमणपर्षन्मण्डलेषु[37] श्रमण[38]वर्णरूपमादर्शयति । ब्राह्मणपर्षन्मण्डलेषु ब्राह्मणवर्णरूपमादर्शयति । [39]क्षत्रियपर्षन्मण्डलेषु [40]क्षत्रियवर्णरूपमादर्शयति । वैश्यपर्षन्मण्डलेषु वैश्यवर्णरूपमादर्शयति । शूद्रपर्षन्मण्डलेषु शूद्रवर्णरूपमादर्शयति । गृहपतिपर्षन्मण्डलेषु गृहपतिवर्णरूपमादर्शयति । चतुर्महाराजिकपर्षन्मण्डलेषु [41]चतुर्महाराजिकवर्णरूपमादर्शयति । [42]त्रयस्त्रिंशत्पर्षन्मण्डलेषु त्रयस्त्रिंशद्वर्णरूपमादर्शयति । एवं यामपर्षन्मण्डलेषु तुषितपर्षन्म-

1 क्षे 9 श्च–T. 2 रेषु T. 3 स्व–T. 4 ये अधि T. 5 स्फ K. 6 बोधि+स MS.K.K'. सत्त्वस्वकायं K. 7 त्तीरभि T. 8 स 24 वं–T. स–K. 9 त्त्वा MS. or त्त्व? 10 च्छंत्य K. 11 राया MS. 12 द्वे T. 13 तिस्रो T. 14 चतस्रो T. 15 मा MS. 16 त् T. 17 ति वा MS. द्वा K'. 18 द्वा T.K. 19 द्वा R. 20 न–T 21 स्त्रलो T. स्त्रा लो R. 22 तूः स्फ R. 23 स्व–T. 24 त्तीरभि T. त्तय भि K. 25 तः अस्यां T. 26 सु–T. 27 र MS. 28 षु+च K. 29 प्र 55 षु–K. 30 स–T. 31 स्व+का T. 32 श्चा T. 33 व 11 हा–T. 34 क्ति अध्य T. 35 षु+तेषु च T. 36 स्त्र+का R. 37 पु+ति T. 38 वर्ण–T.K'. 39,40 क्षे T. 41 चा T. 42 त्ता MS.

ण्डलेषु निर्माणरतिपर्षन्मण्डलेषु परनिर्मितवशवर्तिपर्षन्मण्डलेषु मारपर्षन्मण्डलेषु । ब्रह्मपर्षन्मण्डलेषु ब्रह्मवर्णरूपमादर्शयति । [1]यावदकनिष्टपर्षन्मण्डलेषु अकनिष्टवर्णरूपमादर्शयति । स[2] श्रावकवै[3]नेयिकानां [4]सत्त्वानां श्रावककायवर्णरूपमादर्शयति । प्रत्येकबुद्धवै[5]नेयिकानां सत्त्वानां प्रत्येकबुद्धकायवर्णरूपमादर्शयति । बोधिसत्त्ववै[6]नेयिकानां सत्त्वानां बोधिसत्त्वकायवर्णमादर्शयति । तथागतवै[7]नेयिकानां सत्त्वानां तथागतकाय[8]वर्णरूपमादर्शयति । इति हि [9]भो जिनपुत्र[10] यावन्तो ऽनभिलाप्येषु बुद्धक्षेत्र[11]प्रसरेषु सत्त्वानामुपपत्त्यायतनाधिमुक्तिप्रस[12]रास्तेषु [13]तथा तथा स्वकायविभक्तिमादर्शयति । स[14] सर्वकायविकल्पविग[15]तः कायसमताप्राप्तस्तच्चास्य कायसंदर्शनमक्षू[16]ण[17]म[18]वंध्यं[19] च सत्त्वपरिपाकविनयाय[20] । स सत्त्वका[21]यं च प्रजानाति । क्षेत्रकायं च कर्मविपाककायं च श्रावककायं च प्रत्येकबुद्धकायं च बोधिसत्त्वकायं च तथागतकायं च ज्ञानकायं च[22] धर्मकायं चाकाशकायं च प्रजानाति । स सत्त्वानां चित्ताशयाभिनिर्हारमाज्ञाय यथाकालपरिपाकविनय[23]मतिक्र[24]मादाकांक्षं सत्त्वकायं[25] स्वकायमधितिष्ठति । एवं क्षेत्रकायं कर्मविपाककायं श्रावककायं प्रत्येकबुद्धकायं बोधिसत्त्वकायं तथागतकायं ज्ञानकायं धर्मकायं आकाशकायमात्मकायमधितिष्ठति । स[26] सत्त्वानां चित्ताशयाभिनिर्हारमाज्ञाय आकांक्षं स्वकायं सत्त्वकायमधितिष्ठति । एवं क्षेत्रकायं धर्मविपाककायं कर्मविपाककायं श्रावककायं प्रत्येकबुद्धकायं बोधिसत्त्वकायं तथागतकायं ज्ञानकायं धर्मकायमाकाशकायं सत्त्वकायमधितिष्ठति । स सत्त्वानां चित्ताशयाभिनिर्हारमाज्ञाय यम्यमेव कायं यस्मिन्यस्मिन्काये आकांक्षति तं तमेव कायं तस्मिन्तस्मि-

1 या 23 ति–T. 2 स–MS. 3 न T. 4 सत्त्वानां–T. 5,6,7 न T. 8 वर्ण–T. 9 भवन्तो T. 10 त्रा T. 11 त्रेषु सत्त्वानामु T. 12 श T. 13 त 3 स्त्र=तथत्वाय T. 14 स–MS. 15 त MS. 16 क्षु MS. 17 न T. 18 व T. 19 ध्य MS. 20 या K. 21 कां च T. 22 च धर्मकायं–K'. च आकाशकायं T. 23 याननि R. यमननि T. 24 क्रामन् (त) । आकांक्षं T. 25 यमधि T. 26 स–MS.

न्कायें[1] स्वकायमधिं[2]तिष्ठति । स सत्त्वका[3]यानां कर्मका[4]यतां च प्रजानाति । विपाककायतां च क्लेश[5]कायतां च रूपका[6]यतां [7]चारूप्यकायतां च प्रजानाति । क्षेत्रका[8]यतां च परीत्ततां च प्रजानाति । महद्[9]गततां चाप्रमाणतां च संक्लि[10]ष्टतां [11]च विशुद्धि[12]तां च व्यत्यस्ततां च । [13]अधोमूर्धतां च समत[14]लतां च समवसरणतां च दि[15]क्कालविभागतां च प्रजानाति । कर्मविपाककायानां विभक्तिसंकेतं प्रजानाति । एवं श्रावककायानां प्रत्येकबुद्धकायानां बोधिसत्त्वकाया[16]नामभिनिर्हारविभक्तिसंकेतं प्रजानाति । तथागतकायानामभिसंबोधिकायतां च प्रजानाति । प्रणिधानकायतां च निर्माणकायतां चाधिष्ठानकायतां च रूपलक्षणानुव्यंजनविचित्रालंकारकायतां च [17]प्रभाकायतां च मनोमयकायतां च पुण्यकायतां च धर्मकायतां च ज्ञानकायतां च प्रजानाति । [18]ज्ञानकायानां सुविचारिततां च प्रजानाति । यथावन्निस्तीरणतां [19]च फलप्रयोग[20]संगृहीतततां च [21]लौकिकलोकोत्तरविभागतां च [22]त्रियानव्यव[23]स्थापनतां च साधार[24]णासाधारणतां च नै[25]र्याणि[26]कानैर्याणिकतां च शै[27]क्षाशैक्षतां च [28]प्रजानाति । धर्मका[29]यानां समतां च प्रजानाति । [30]अविकोपनतां च अवस्थानसंकेतसंवृतिव्यवस्थानतां च सत्त्वासत्त्वधर्मव्यव[31]स्थानतां च बुद्धधर्मार्यसंघ[32]धर्मव्यवस्थानतां च प्रजानाति । आकाशकायानामप्रमाणतां च प्रजानाति । सर्वत्रानुगततां च अशरीरतां चावितथानंततां च रूपकायाभिव्यक्तितां च प्रजानाति । स एवं कायज्ञानाभिनिर्हारप्राप्तो वशवर्ती भवति । सर्वसत्त्वे[33]षु आयुर्वशितां च प्रतिलभते । अनभिलाप्यानभिलाप्यकल्पायुःप्रमाणाधिष्ठानतया । चेतोवशितां च प्रतिलभते । अप्रमाणासंख्येयसमाधिनिध्यप्तिज्ञानप्रवेशतया ।

1 ये ऽधितिष्ठति । T. यमधितिष्ठति K'. 2 धिगच्छति MS. 3 यं कर्म T. 4 यं च MS. 5 यं च T. 6 यं चा K. 7 च आरूप्य T. 8 यानां च T. 9 तृग T. 10 क्लि T. 11 चा T. 12 द्ध R. 13 व T. 14 र T. 15 ग्जाल T. Śn. Br. 16 नां विभक्तिसंकेतं T. 17 प्र 4 च—T. 18 ज्ञा 14 ति—MS. K. K'. 19 च+धर्मकायानां समतां च प्रजानाति K. 20 संहिततां MS. 21 लौकिक—MS. K. K'. 22 त्रिकायानुव्यव MS. K. K'. 23 प—T. 24 ण्या MS. ण्य T. 25 नि T. 26 कानैर्याणि—T. 27 शैक्षा—K. 28 प्रजानाति—T. 29 यां स धर्मतां च प्रजानाति T. 30 अवे K'. 31 ष्ठा T. 32 धर्म—K. 33 पु+स T.

परिष्कार[1]वशितां च प्रतिलभते । सर्वलोकधात्व[2]नेकव्यूहालंकार[3]प्रतिमंडिताधिष्ठानसंदर्शनतया । कर्मवशितां च प्रतिलभते । यथाकालं कर्मविपाकाधिष्ठानसंदर्शनतया । उपपत्तिवशितां च प्रतिलभते । सर्वलोकधातूपपत्तिसंदर्शनतया । अधिमुक्तिवशितां च प्रतिलभते । सर्वलोकधातुबुद्धप्रतिपूर्णसंदर्शनतया । प्रणिधानवशितां च प्रतिलभते । यथेष्टबुद्धक्षेत्रकालाभिसंबोधिसं[4]दर्शनतया । ऋद्धिवशितां च प्रतिलभते । सर्वबुद्धक्षेत्रर्द्धि[5]विकुर्वणसंदर्शनतया । धर्मवशितां च प्रतिलभते । अनन्तम[6]ध्यधर्ममुखालोकसंदर्शनतया । ज्ञानवशितां च प्रतिलभते । तथागतबलवैशारद्यावेणिकबुद्धधर्मलक्षणानुव्यंजनाभिसंबोधिसंदर्शनतया । स आसां[7] द[8]शानां बोधिसत्त्ववशितानां सह प्रतिलंभेनाचिंत्यज्ञानी च भवति । अतुल्यज्ञानी चाप्रमेयज्ञानी च विपुलज्ञानी चासंहार्यज्ञानी च भवति । तस्यैवं भूम्यनुग[9]तस्यैवं ज्ञानसमन्वागतस्या[10]त्यंतानवद्यः कायकर्मसमुदाचारः प्रवर्तते । अत्यंतानवद्यो[11] वाक्कर्मसमुदाचा[12]रः प्रवर्तते । अत्यंतानवद्यो[13] मनस्[14]कर्मसमुदाचारः प्रवर्तते । ज्ञानपूर्वंगमो ज्ञानानुपरिवर्ती प्रज्ञापारमिताधिपतेयः । महाकरुणापूर्वक[15] उपायकौश[16]ल्यसुविभक्तः । प्रणिधानस्वभिनिर्हृतस्तथागताधिष्ठानस्वधिष्ठि[17]तः । अप्रतिप्रस्रब्धसत्त्वार्थ[18]ज्ञानप्रयोगः । अपर्यन्तलोकधा[19]तुविभक्तिगतः । समासतो भो जिनपु[20]त्र बोधिसत्त्व[21]स्येमां अचलां[22] बोधिसत्त्वभूमिमनुप्राप्तस्य सर्वबुद्धधर्मसमुदानयनाय । कायवाङ्मनस्कर्मसमुदाचारः प्रवर्तते । स एवमिमामचलां बोधिसत्त्वभूमिमनुप्राप्तः सुप्रतिष्ठिताशयबलश्च भवति । सर्वक्लेशसमुदाचा[23]रापगतत्वात् । सुप्रतिष्ठिताध्याशयबलश्च भवति । मार्गाविप्रवासितत्वात् । महाकरुणाबलसुप्रतिष्ठितश्च भवति । सत्त्वार्थानुत्सर्गत्वात् । महामैत्रीबलसुप्रतिष्ठितश्च भवति । सर्व-

1 स्का MS.K. 2 त्वे T. 3 रे T. 4 सं—K'. 5 र्द्धि—T. 6 मध्य=मुख T. 7 शानां MS. 8 दशानां—MS. 9 तीत्वेवं K. 10 स्य अत्यं T. 11 द्यः T. 12 रा MS. 13 द्यः T. 14 स्क K'. 15 कर्म उपाय T. 16 ल MS.K 17 ष्ठित T. 18 ज्ञान—R. Sdh. 19 तुगतः समाग (स) तो T 20 त्रा T. 21 स्याचला T. 22 लायां MS. 23 रो MS.

जगत्परित्राणत्वात् । धार[1]णीबलसुप्रतिष्ठितश्च भवति । असंप्रमोषधर्मत्वात् । प्रतिभानबलसुप्रतिष्ठितश्च भवति । सर्वबुद्धधर्मप्रविचयविभा[2]गकुशलत्वात् । अभिज्ञाबलसुप्रतिष्ठितश्च भवति । अपर्यन्तलोकधातुचर्याविभा[3]गकुशलत्वात् । प्रणिधानबलसुप्रतिष्ठित[4]श्च भवति । सर्वबोधिसत्त्वक्रियानुत्सर्गत्वात् । पारमिता[5]बलसुप्रतिष्ठितश्च भवति । सर्वबुद्धधर्मसमुदानयनत्वात् । तथागताधिष्ठानबलसुप्रतिष्ठितश्च भवति । सर्वाकारसर्वज्ञज्ञाना[6]भिमुखत्वात् । स एवं [7]ज्ञानबलाधानप्राप्तः सर्वक्रि[8]यांश्च संदर्शयति । सर्वक्रियासु चानवद्यो भवति अनुपलिप्तश्च । इयं भो[9] जिनपु[10]त्र बोधिसत्त्वस्याष्टमी[11]ज्ञानभूमिरचलेत्युच्यते ऽसंहार्यत्वात् । अविवर्त्यभूमिरित्युच्यते ज्ञानाविवर्त्यत्वात् । दुरासदभूमिरित्युच्यते सर्वजग[12]द्दुर्ज्ञेयत्वात् । कुमारभूमिरित्युच्यते ऽनवद्यत्वात् । जन्मभूमिरित्युच्यते यथाभिप्रायवश[13]वर्तित्वात् । [14]परिनिष्पन्नभूमिरित्युच्यते ऽपुनःकार्यत्वात् । [15]सुपरिनिष्ठितभूमिरित्युच्यते सुकृतज्ञानविचयत्वात् । निर्[16]वाण[17]भूमिरित्युच्यते [18]स्वभिनिर्हृतप्रणिधानत्वात् । [19]स्वधिष्ठानभूमिरित्युच्यते पराविकोपनत्वात् । अनाभोगभूमिरित्युच्यते पूर्वा[20]न्तस्वभिनिर्हृतत्वात् । एवं ज्ञानस्वभिनिर्हृ[21]तः खलु पुनर्भो[22] जिनपु[23]त्र बोधिसत्त्वो बुद्ध[24]गोत्रा[25]नुगतो[26] बुद्धगुण[27]प्र[28]भावभासि[29]तः । तथागतेर्यापथ[30]चर्याचारित्रानुगतो [31]बुद्धविषयाभिमुखः । सततसमितं स्वधिष्ठिततथागताधिष्ठानश्च भवति । शक्रब्रह्मलोकपालप्रत्युद्गतश्च [32]भवति । वज्रपाणिसततानुबद्धश्च । समाधिबलानुत्सृष्टश्च । अप्रमाणकायविभक्त्यभिनिर्हृतश्च । सर्वकार्य[33]च[34]र्याबलो[35]पगतश्च । महाभिज्ञाविपाकप-

1 णि T. 2 ग+बल T. 3 ग+बल T. 4 तो T. 5 बल–T. 6 भिसंबोधाभिमुखत्वात् MS.K.K′. 7 ज्ञान–R. 8 यां T.K.K′. 9 हि MS. भवन्तो T. 10 त्रा T. 11 ज्ञान–K′. 12 दुर्ज्ञान T. 13 वर्ती T. 14 स्वाधिष्ठानभूमि MS.K. 15 सु–R. 16 र्मा R. 17 धातु+भू T. 18 पूर्वान्त+स्व T. 19 अधि T. 20 न्ताभि T. 21 तत्वाः T. 22 भवन्तो T. 23 त्रा T. 24 種 Dhr. 境界 Kj. Bb. Śn. 種姓 Śdh. 25 नुसंगतो (नुसर्गतो ?) K′. 26 तौ T. 27 णेष्ववभासितस्तथागते T. 28 भाव–K. 29 षित MS. 30 चर्या–MS. 31 बुद्धकविषया K. 32 भवति–T. 33 ये MS. 34 र्योपग MS. 35 पेतगत K′.

रिनिष्पन्नश्च । अनन्तसमाधिवशवर्ती[1] च । अप्रमाणव्याकरणप्रत्येषकश्च[2] । यथापरिपा[3]-कजगदभिसंबोधिनिदर्शकश्च भवति । स एवं भूमि[4]ज्ञानानुगतो महायानमण्डलानुप्रवि[5]-ष्टः । सुविचारितमहाप्रज्ञाभिज्ञः[6] । सततसमितं प्रमुक्त[7]प्रज्ञालोकरश्मिः[8] । असंगधर्मधातु-पथावतीर्णो [9]ऽनेकलोकधातुपथविभक्तिकोविदः । सर्वाकारगुणसंदर्शकः । स्वचित्तोत्पा-दवशवर्ती । पूर्वान्तापरान्तसुविचित्त[10]ज्ञानः । सर्वमारपथावर्तनज्ञानानुगतः । सर्वतथागत-विषयगोचरानुप्रविष्टः[11] । अपर्यन्त[12]लोकधातुप्रसरेषु बोधिसत्त्वचर्यां[13] चर[14]त्यप्रत्युदावर्त्य[15]यो-गेन तत उच्यते बोधिसत्त्वो ऽचलां बोधिसत्त्वभूमिमनुप्राप्त[16] इति । तत्र भो[17] जिनपुत्रा[18]-चलां बोधिसत्त्वभूमि[19]मनुप्राप्तो बोधिसत्त्वः सततसमितमपर्य[20]न्ततथागतदर्शनाविरहितो भ-वति । समाधिबलस्वभिनिर्हृतत्वात् । औदारिकं[21]बुद्धदर्शन[22]पूजोपस्थानं च[23] नोत्सृजति । स एकै[24]कस्मिन्कल्प एकैकस्मिल्लोकधातुप्रसरे[25] ऽनेकान्बुद्धा[26]ननेकानि बुद्धशतान्यनेकानि बुद्धस-हस्राण्य[27]नेकानि बुद्धशतसहस्राण्यनेकानि बुद्धनियुत[28]शतसहस्राणि । अनेका[29] बुद्धकोटीरने-कानि बुद्धकोटीशतानि । अनेकानि बुद्धकोटीसहस्राण्यनेकानि बुद्धकोटीशतसहस्रा-णि । अनेकानि बुद्धकोटीनियुत[30]शतसहस्राणि सत्करोति गुरुकरोति मानयति पूजयति सर्वाकारपूजाभिनिर्हारं चोपसंहरति । तांश्च तथागतान्पर्युपास्ते लोकधातुविभक्तिपूर्वकं च धर्मालोकोपसंहारं प्रतीच्छति । स भूयस्या मात्रया तथागतधर्मकोशप्राप्तः । असंहार्यो भवति लोकधातुपरिपृच्छानिर्देशेषु । तानि चास्य कुशलमूलान्यनेकां कल्पानुत्तप्यन्ते परिशुध्यन्ति प्रभास्वरतराणि च भवन्ति । अनेकानि कल्पशतान्यनेकानि कल्पसहस्रा-

1 र्तीश्च T. 2 भा MS. 3 पक्क T.K. 4 ज्ञानभूम्यनु R. 5 न् MS. 6 ज्ञानाभि T. 7 क्तं T.K. 8 श्मि T. 9 ऽनेक—T.ACHT. 10 त्त K'. त T. 11 ष्टाः T. 12 न्ता T. न्तो MS. 13 र्या T.K. 14 रं T. 15 वृत्य MS. 16 प्तः । तत्र T. 17 भवन्तो T. 18 त्रा अच MS. 19 भिं अनु T. 20 र्यं T. 21 कं R. 22 नं T. 23 च—T. 24 कै—MS. 25 शरे अनेकां T.K. 26 द्धां अने T. 27 णि अनेकानि T. 28 नयुत K.K'. 29 अनेकबुद्धकोट्यः अनेकानि T. 30 नयुत K.K'.

णि । अनेकानि कल्पशतसहस्राण्यनेकानि कल्प[1]नियुतशतसहस्राणि । अनेकाः कल्पको-[2]टीरनेकानि कल्पकोटीशतानि । अनेकानि कल्पकोटीसहस्राण्यनेकानि कल्पकोटीशतसहस्राणि । अनेकानि कल्पकोटी[3]नियुतशतसहस्राणि तानि चास्य[4] कुशलमूलानि भूयस्या मात्रयोत्तप्यन्ते परिशुध्यंति प्रभास्वरतराणि च भवन्ति । तद्यथापि नाम [5]भो जिनपुत्र[6] तदेव जातरूपं सुपरिनिष्ठितं कुशलेन कर्मारेण सुपरिकर्मकृतं जंबूद्वीपस्वामि[7]नः कण्ठे शिरसि वा आबद्धमसंहार्यं[8] भवति । सर्वजंबूद्वीपकानां [9]सर्वसत्त्वानामाभरणविकृतैः । एवमेव [10]भो जिनपुत्रा[11]स्यामचलायां बोधिसत्त्वभूमौ स्थितस्य बोधिसत्त्वस्य तानि कुशलमूलान्यसंहार्याणि भवंति । सर्वश्रावकप्रत्येकबुद्धैर्यावत्सप्त[12]मीभूमिस्थितैश्च बोधिसत्त्वैः । इमां च भूमिमनुगतस्य बोधिसत्त्वस्य महती प्रज्ञाज्ञानप्रभा सत्त्वानां क्लेशतमांसि प्रशमयति सुविभक्तज्ञानमुखाभिनिर्हारतया । तद्यथापि नाम [13]भो जिनपुत्र[14] साहस्रिको महाब्रह्मा साहस्र[15]लोकधातुं मैत्र्या [16]स्फुरित्वा प्रभयावभासयति । एवमेव [17]भो जिनपुत्र[18] बोधिसत्त्वोऽस्यामचलायां बोधिसत्त्वभूमौ स्थि[19]तो यावद्दशबुद्धक्षेत्रशतसहस्रपरमाणुरजःसमाल्लोकधातून्महता मैत्र्या[20]वभासेन [21]स्फुरित्वा सत्त्वा[22]नां क्लेशपरिदाहाननुपूर्वेण प्रशमयत्याश्रयांश्च प्रह्लादयति । तस्य दशभ्यः पारमिताभ्यः प्रणिधानपारमिता[23]तिरिक्ततमा भवति । न च परिशेषासु न समुदागच्छति । यथाबलं यथाभजमानमियं भवंतो जिनपुत्रा बोधिसत्त्व[24]स्याचला नाम अष्टमी बोधिसत्त्वभूमिः समासनिर्देशतः । विस्तरश[25]ः पुनरपर्यन्तकल्पनिर्देशा[26]धिष्ठानतो ऽनुगंतव्या । यस्यां प्रतिष्ठितो बोधिसत्त्वो भूयस्त्वेन महाब्रह्मा भवति साहस्राधिप-

1 न T.K.K'. 2 त्यः । अनेकानि 3 न K'. 4 स्य+सर्वाणि T. 5 भवन्तो T. 6 त्रा T. 7 न T. 8 न्ति T. 9 सर्व–T. 10 भवन्तो T. 11 त्रा अस्या T. 12 मी+बोधिसत्त्व T. 13 भवन्तो T. 14 त्रा T. 15 स्रं MS. 16 स्फ T.K. 17 भवन्तो T. 18 त्रा T. 19 ष्ठि T. 20 वभासेन–MS. 21 स्फारयित्वा MS. 22 त्त्वां क्लेश T. 23 ता ऽति T. 24 त्त्व ऽस्या K. 25 णः T. 26 शनिष्ठातो T.

तिः । अभिभूरनभिभूतो ऽन्वर्थदर्शी वशिप्राप्तः । कृती प्रभुः सत्त्वानां [1]सर्वश्रावकप्रत्येकबुद्धबोधिसत्त्वपारमितोपदे[2]शोपसंहारेषु । असंहार्यो [3]लोकधातुविभक्तिपरिपृच्छानिर्देशेषु । यच्च किं चित् कर्मारभते दानेन वा प्रियवद्यतया वार्थक्रियया वा समानार्थतया वा तत्सर्वमविरहितं बुद्धमनसिकारैर्धर्ममनसिकारैः संघमनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्यामनसिकारैः पारमितामनसिकारैर्भूमिमनसिकारैर्बलमनसिकारैर्वैशारद्यमनसिकारैरावेणिकबुद्धधर्ममनसिकारैर्यावत्सर्वाकारवरोपेतसर्वज्ञज्ञानमनसिकारैः । किमिति सर्वसत्त्वानामग्र्[4]यो भवेयं श्रेष्ठो ज्येष्ठो वरः प्रवर उत्तमो ऽनुत्तमो नायको विनायकः परिना[5]यको यावत्सर्वज्ञज्ञानप्रतिशरणो भवेयमा[6]कांक्षंश्च तथारूपं वीर्यमारभते । यथारूपेण वीर्यारंभेणै[7]कक्षणलवमुहूर्तेन [8]दशत्रिसाहस्रपरमाणुरजःसमां समाधीं समापद्यते । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमान्बुद्धां पश्यति । तेषां चाधिष्ठानं संजानीते । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमां क्षेत्रां कंपयति । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमां लोकधातूनवभासयति । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमान्सत्त्वान्परिपाचयति । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमान्कल्पांस्तिष्ठति । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमान्कल्पान्पूर्वान्तापरान्ततः प्रविशति । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमानि धर्ममु[9]खानि प्रतिविनोति । दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमान्कायानादर्शयति । काये काये च दशत्रिसाहस्रशतसाहस्रपरमाणुरजःसमान्बोधिसत्त्वपरिवारामादर्शयति । तत उत्तरे प्रणिधानबलिका बोधिसत्त्वाः प्रणिधानवैशेषिकतया विकुर्वंति । येषां न सुकरा[10] संख्या[11] कर्तुं कायस्य वा प्रभाया वा ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्याया वा व्यूहस्य वाधिष्ठानस्य वाधिमुक्तेर्वाभिसंस्काराणां वा । यावदेतावद्भिरपि कल्पकोटी-

1 सर्व–T. 2 शौ T. 3 भे दानेन T.K.K'. 4 ग्रचौ T. or ग्रो? 5 णा T.K. 6 मिति। आकांक्षं T. 7 ण एक T. 8 परिपूर्ण+द T. 9 पा T. 10 रां T. 11 ख्यां MS.

[1]नियुतशतसहस्रैरिति ॥

अथ खलु वज्रगर्भो बोधिसत्त्व एवमेव भूम्यर्थप्ररूपयमाण[2]स्तस्यां वेला[3]यामिमा गाथा अभाषत ॥

[4]ते भूम्यसप्तसु विशोधितप्र[5]ज्ञुपाया
मार्गा सुसंभृतमहाप्रणिधान[6]बद्धाः ।
सुप्रतिष्ठिता[7] नरवराः कुशलोपुपेता[8]
ज्ञानाभिलाषि[9]विदु अष्टमिमाक्रमं[10]ति ॥ १ ॥
ते पुण्यज्ञानुप[11]गताः कृपमैत्रयुक्ता[12]
[13]ज्ञानाप्रमाणपथगाः खग[14]बुद्धिकल्पाः ।
[15][16]श्रुतधर्मनिश्चित[17]बलोपगता महर्षी
क्षांतिं लभंति अनुत्पाद[18]प्रशांतिसूक्ष्माम् ॥ २ ॥
[19]आदावजातअनुत्पादअलक्षणं च
[20]असं[21]भूत[22]त्वअविन[23]ष्टत चाप्रवृत्त[24]ं ।
भावस्वभावविगता[25]ः तथताविकल्पा
मनचित्तचारविगताः खगतुल्यकल्पाः ॥ ३ ॥
[26]ते एव क्षांतिसमन्वागतनिष्प्रपंचा
गंभीरचाल्यविदु शान्तविचारप्राप्ताः ।

1 न K. 2 न T. 3 यां इमां T. 4 Metre : वसंततिलका 5 ज्ञा MS. 6 नः MS. न तत्र T. न तत्राथ K. 所繫 Bb. Kj. 結 Dhr. 7 त T.L. तो K. 8 ताः MS. 9 षित (न?) विदु K. 10 म T. 11 प—T. 12 क्ताः MS.K.K'.T. 13 智慧廣大等虛空 Śn. Śdh. 離諸有量心・心同如虛空 Kj. Bb. 其心無限量意念猶虛空 Dhr. 14 म T. 15 聞法能生決定力 Śn. 16 ते T.L. 17 वे MS. 18 दि T. 19 अवजात T.L. 20 or आ? 21 भू All MSS. 22 तं MS.K'. त K. तमवि RS. 23 ष्टं च MS. ष्टत च K.T.L. 24 त्तम् RS. 25 तां MS. ता T.K.L. 26 तत्र एव MS. एवं T.L.

दुर्ज्ञेय सर्वजगतारहप्रत्ययैश्च[1]

चित्तंनिमित्तं[2]ग्रहसंज्ञविभावितत्वात् ॥ ४ ॥

एवं स्थितान मनुचित्तविकल्प नास्ति

भिक्षुर्निरोधुपगतो चं[3] अकल्पप्राप्तः ।

स्वप्नौघप्राप्त प्रतिबुद्ध तथा[4]विकल्पो

ब्रह्मापुरे[5] [6]रतिसं[7]गा[8]रहितो तथैव ॥ ५ ॥

पूर्वाधिष्ठान सुगता पुन चोदयंति

एषां[9] स[10] क्षांति परमा सुगताभिषेके ।

अस्माकु[11] ज्ञानविपुलं[12] व[13]रबुद्धधर्मा

ते तुभ्य नास्ति तं[14] हि [15]वीर्यु[16] समारभस्व ॥ ६ ॥

[17]किं चापि शांत तव सर्वकिलेशज्वला-

ज्वलितं निशाम्य पुन क्लेशगति[18]अ[19]लोकः ।

प्रणिधानपूर्व स्मर सत्त्वहितं विचार्य[20]

ज्ञानार्थिप्रार्थितक्रिया जगमोक्ष[21]हेतोः ॥ ७ ॥

सद एष धर्मतं[22] स्थिता तथताविकल्पा

सर्वेषु बुद्धजिन[23]सावकप्रत्ययानं ।

नं[24] हि एति[25] तं[26] दशबलान प्रभावु लोके

1 यश्च T.L. 2 त्तं T. 3 ऽवप्रकल्प T.K. च अवकल्प L. पप्रकल्प RS. 4 विकलपापगतो भवति Prose, 無念想分別 Kj. 寤已坦然無遽務 Sdh. 5 र K. 6 चे MS. च T.K. 7 ग All MSS. 8 रहो MS. 9 पां T. 10 or सा? 11 क MS. 12 ले MS. 13 ल T.L. 14 ते All MSS. or तं? 15 वि MS. 16 र्यमारभस्व Prose, °भायम् RS. °भाग्रं? T.K.MS. 17 汝雖得除滅・一切煩惱火・當觀諸世間・煩惱常熾燃 Bb. Kj. 18 or तीक्ष? 19 त्य All MSS. 20 र्यं T. 21 क्षु MS.K. 22 ता MS.K'. 23 (शा) RS. श्रा All MSS. 24 एहि MS. 25 एतिना RS. 26 ता All MSS.

[1]नोन्यत्र ज्ञानविपुलं [2]त्रिभिअध्वसंगं ॥ ८ ॥
एवं तमप्रतिसमा नरदेवपूज्या
[3]उपसंहरंति बहुज्ञानमु[4]खां विचा[5]रान् ।
जिनधर्मनिष्प[6]त्तिप्रवेशमनन्तपारं
[7]यस्या कला[8] न भवते पुन बोधिचर्या ॥ ९ ॥
[9]एताभिप्राप्त[10]विषभी वरज्ञानभूमिम्
एकक्षणेन स्फरते[11] दिश[12]ताः समन्[13]तात् ।
ज्ञानप्रवे[14]शुपगता वरभिज्ञप्राप्ता[15]
यथ[16] सागरे वहनु मारुतयानप्राप्त[17] ॥ १० ॥
[18]सांभोगचित्तविगताः स्थित ज्ञानकर्म[19]
विचिनंति क्षेत्रप्रभवं विभवस्थितं च ।
[20]धातुश्चत्वारिविनिभागगता[21]नंतश्च
सूक्ष्मं महद्गतविभक्ति समोसरंति ॥ ११ ॥
त्रि[22]साहस्रिसर्वपरमाणुरजो[23]तरन्ति
[24]चत्वारिधातु जगकायि[25] विभक्तितश्च ।
रत्नाविभक्तिपरमा[26]णु [27]सुखगतीषु

1 ता T.L. 2 अर्थसंज्ञ MS. अध्व संगं Dhr. 3 開是衆智門・令入諸佛法 Kj. 開是起智門・令入諸佛法 Bb. 4 पा L. खा MS. 5 रां T. 6 त्त RS. ति=त्ति 7 स्य All MSS. 8 लो MS. 9 एतानि 10 वृषभी T.K.L. 11 तै T.L. 12 ता K. 13 न्तां T. 14 सु T. शू K. 15 सा: MS. (स:) RS. 16 था MS. 17 स: MS. स K. 18 सो T.L. 19 र्मं T.K.L. 20 諸界種々各殊異 Śn. Śdh. 能知四大一・亦知種々異 Kj. 能知四大一・亦知諸別異 Bb. 21 न तांश्च RS. 22 or स? 23 (भवति) RS. 24 亦知衆生身・四大微塵数 Bb. Kj. 25 य MS.K.K'. 26 नु T. 27 सुवर्गतीषु T. 天身 Kj Bb. 慈樂 Dhr.

विदित्व[1] ज्ञानविषयेन गणेन्त्यशेषं[2] ॥ १२ ॥
ज्ञाने विभागितमना[3,4] विदु सर्वकायान्[5]
स्वे[6] कायि तत्र उपनेन्ति[7] जगार्थहेतोः ।
त्रिसहस्रसर्व[8] च स्फरित्व[9] विचित्ररूपान्
दर्शेन्ति कायविविधान्तथ[10] नन्तलोके ॥ १३ ॥
सूर्य[11] शशिं च वहि मारुत अन्तरीक्षे
स्वकमण्डलस्य उदके प्रतिभासप्राप्तं[12] ।
ज्ञानोत्तमे स्थित[13] तथाचलधर्मतायां
जगशुद्धआशयविदू[14,15] प्रतिभासप्राप्ताः[16] ॥ १४ ॥
यथ[17] आशयं[18] जगतु[19] कायविभक्तितां च
दर्शेन्ति सर्वपरिशे भुवि सर्वलोके ।
वशिप्रत्ययाश्रयजिनात्मनआश्रयांश्च[20]
दर्शेन्ति ते सुगतकायविभूषितांगान् ॥ १५ ॥
सत्त्वांश्च क्षेत्र तथ कर्मविपाककायान्[21]
आर्याश्रयां[22] विविधधर्मतज्ञानकायान् ।
आकाशकायवृषभी समतानुपेन्ति[23]
दर्शेन्ति ऋद्धिविविधान्[24] जगतोपणार्थं ॥ १६ ॥

1 भि K. भिन्दित्व RS. 2 ण MS.K'. 3 भि T. 4 सि T.L. वि RS. 5 यां T. 6 स्व MS. 7 ति T. 8 सा T. 9 स्फा All MSS. 10 यं MS.K'. 11 यं T. 12 सा All MSS. 13 ष्ठि T. स्ति K. 14 जगत् MS. 15 दु MS.K.K'. 16 सां T.K. 17 त MS. 18 य जगंग MS.K. 19 त T.L. 20 नार्थयन्ति MS. मार्थ° T.K.L. न श्रावकानां RS. 21 यां T. 22 आर्याश्रियान्विविध MS. 23 तां उपेन्ति MS. 24 धां T.

वशितादर्शे[1] विमलज्ञानविचारप्राप्तां[2]
[3]अनुप्राप्तज्ञानकृत मैत्रकृपानुकूलाः ।
यावच्च सर्वजिनधर्ममुत्पादकर्माः
त्रिसम्वरैः सुस्थित[4]मैकअचल्यकल्पाः ॥ १७ ॥

ये चा[5] बलां जिनसुतान दशः[6] अक्षोभ्यां[7]
[8]ते ही उपेन्ति[9] अविवन्धिय सर्वमारैः ।
बुद्धैरधिष्ठित नमस्कृत शक्रब्रह्मै-
स्तथ वज्रपाणिवलदैः[10] सततानुवद्धाः ॥ १८ ॥

इह[11]भूमिदेशु[12]पगतान गुणान नंतो
नो शक्यते क्षयितु कल्पसहस्रकोट्यैः ।
ते भूय बुद्धनियुतान्समुपाशयन्ते[13]
भोन्तो उतप्त यथ भूपणु[14] राजमूर्ध्नि[15] ॥ १९ ॥

[16]इहभूमिदेशुपगता विदु बोधिसत्त्वा
महब्रह्म भोन्ति सहस्राधिपती गुणाढ्याः[17] ।
त्रययानदेशन अक्षोभ्यसंहारप्राप्ता
मैत्रायना[18]शुभप्रभा जगक्लेशघाती[19] ॥ २० ॥

एकक्षणेन[20] दशक्षेत्र[21]शता[22]सहस्रा-

1 शो T.K.L. 2 प्ताः MS.K.K′. 3 所作隨智行•順於慈悲心 Kj. Bb. 4 तम् अैक RS. 5 चाचला MS. चा परा T. 6 श T.K.L. 7 भ्यो T.L. 8 तेही RS. 9 ते MS. त K. 10 देः T. कैः K. 11 म RS. 12 शू K. 13 स RS. 14 नु T. 15 मूर्द्धि MS. मुध्नि T. सुमुर्ध्नि K. 16 म RS. 17 (ढ्यः) RS. 18 यना=(शयः) RS. Bb. Kj. Dhr. यनः L. 19 टी RS. 20 न—T.L. 21 क्षत्र T. 22 तः T.L.K.

[1]रजधातु[2]तत्त्वकसमाधि उपेन्ति [3]धीराः ।
पश्यन्ति[4] तत्त्व[5]क दश[6]दिशि सत्त्वसारान्
भूयो अ[7]तः प्रणिधि[8]श्रेष्ठ[9]वियूहनेकाः ॥ २१ ॥
[10]संक्षेप एष निर्दिष्टो अष्टमाया जिनात्मजाः ।
विस्तर कल्पको[11]टिभिर्न शक्यः सर्व भाषितुं ॥ २२ ॥

अचला नामाष्टमी बोधिसत्त्वभूमिः ॥ ८ ॥

---

[12]इमां भूमि[13] प्रभाषि[14]ता कम्पिताः क्षेत्रकोटयः ।
अधिष्ठाना[15] नरेन्द्रस्य अप्रमेया अचिंतियाः ॥ १ ॥
आभासरुचिरा मुक्ताः काय[16]तः सर्वदर्शि[17]नः ।
तयावभासि[18]ताः क्षेत्राः सत्त्वाश्च सुखितास्त[19]या ॥ २ ॥
बोधिसत्त्वसहस्राणि अन्तरीक्षे स्थितानि च ।
दिव्यातिक्रान्तपू[20]जया पूजेन्ति वदतां वरं ॥ ३ ॥
महेश्वरा देवपुत्रा व[21]शवर्ती प्रहर्षिताः ।
नानाप्रकारपूजाभिः [22]पूजेन्ति [23]गुणसागरं ॥ ४ ॥
ततो ऽप्सरसहस्राणि हर्षि[24]ताः प्रीणितेंद्रियाः ।
दिव्याः[25] सु[26]युक्ता[27]ः संगीताः शास्तु[28] पूजां [29]महेजयं ॥ ५ ॥

1 यावा+र T.L.RS. रजो MS. 2 त्तु L. 3 धीराः–RS. 4 ति K. 5 त्तु MS.K.L. 6 द्दि K.L. 7 त T.L. 8 श्रे T. 9 व्यूह RS. 10 Metre: श्लोक 11 टी T.K. 12 नवमी भूमिः 13 मिं All MSS. 14 सता RS. 15 न MS.K. 16 तस्सर्व T.L. 17 नो RS. ना MS.T.K.K′. 18 ता MS. 19 (था) RS. 20 जोन्ति वदतां MS. जाय पूज्येन्ति T.K. जाय पूज्यंति K′. 21 स MS. 22 पूज्य MS. पूज्ये T.K′. 23 大海功德佛 Kj. Bb. 24 ता MS. 25 व्या RS. 26 पु K. 27 त्ता RS. 28 स्त्व MS. 29 महेजश्रय T.K. °श्रयं L. अजग्रयम् RS.

तेभ्यश्च [1]तूर्यनादेभ्य अनुभावान्महर्षिणः ।
ईदृशा रुतसहस्रा रवन्ती मधुरस्वराः ॥ ६ ॥

[2]इमि [3]सर्वि जिनसुत[4]ं खिलम[5]लविगत[6]ा
[7]उपगत भुवि वरसुरुचिर[8]चरणाः ।
[9]जगहित विच[10]रति दशदि[11]शि वृषभी
[12]दर्शयि जिनचरि खगसममनसा ॥ ७ ॥

नरपुरि म[13]रुपुरि भुजगपतिविषये
[14]व्यूह दशदिशि [15]पुण्यवरमुद्रिताः ।
तत[16]ं भुयु जिनसुत [17]दर्शयि अतुल[18]ां
[19]जिनसुत[20]प्रभवज्ञानपथनि[21]रताः ॥ ८ ॥

एक[22]क्षेत्रि अचलि[23]त सर्वक्षेत्रि[24] [25][26]विरजा
अनुगतजग हि[27]मशशिरि[28]वि प्रति[29]भा ।
सर्वघोप[30]यानचि[31]त्तप्रशमितमनसा
[32]व्याहरि कृतशतश्रु[33]तं [34]यथ गिरिभिः ॥ ९ ॥

[35]यत सत्त्वहीनचित्त [36]दीनमा[37]ननिरता-

1 सूर्यु K. तूर्यु T.MS. तूर्य्य K'. 2 Metre : शशिकला, इम K. 3 सर्वे MS. 4 ता All MSS. 5 र T. 6 तो K. 7 隨所入地善修習 Śn. Śdh. 各在於其地·善修菩薩行 Bb. Kj. 8 ध All MSS. 9 利益世間故·遍遊於十方·示衆以佛道 Bb. Kj. 用衆生故·遊到十方·大通所願·現最上行 Dhr. 10 रंत All MSS. 11 or शि? 12 दशयि (दरिशयि) RS. 13 धु T.K'.L. 14 वियुह RS. 15 पुण्यजल MS. पुण्यबलमुदिरिताः RS. 以從如來功德生 Śdh. 福德所致 Bb. Kj. 16 त्त T.K'. त+तु RS. 17 दशयि RS. 18 ली MS. ल्यं T. लीं K'. 19 佛子樂智者·以此示佛力 Kj. Bb. 20 प्रभवं ज्ञानु MS. प्रभं ज्ञानु T. or प्रवरज्ञान? प्रभवजिननु (प्रभवज्ञानु) RS. 21 ता MS.K.K'. 22 क्ष MS.K.K'. 23 ली T. 24 त्व All MSS. 25 無有塵垢 Dhr. 26 क्षा K. 27 त RS. 28 वं K. 29 भा+वृपभी K. 30 हान RS. जान T.L.K'. 31 त्तं MS.K.K'.T. 32 वियहरि RS. 所言暢音·辭百千種·若有開教 Dhr. 說法猶如響 Bb. Kj. 譬猶 (如 Śdh.) 谷響無不應 Śn. Śdh. 33 ति T.L. 34 प RS. 35 Metre : रजरजस cf. तूनक (रजरजर) 36 其心厭沒者 Bb. Kj. 37 नसा तल All MSS.

स्तत्र विदु श्रा[1]वकाचारी दे[2]शेन्ति[3] वृषभी ।

यत्र सत्त्वं[4] तीक्ष्ण[5]चित्त प्रत्ये[6]यान निरता-

स्तत्र ज्ञानं[7] प्रत्ययान दर्शयन्ति विरजाः ॥ १० ॥

ये[8] तु सन्ति सत्त्वहितमैत्र[9]मान[10]निरता-

स्तत्र [11]त्यं जिनपुत्रान दर्शयन्ति चरणं ।

ये तु सत्त्व अग्रश्रेष्ठमतिमाननिरता-

स्तत्र अमी बुद्धकाय दर्शयन्ति अतुलं ॥ ११ ॥

माय[12] याथ[13] मायका[14]रो दर्शे[15]न्ति जगहिते

कायकोटि[16]नैकविधां स[17]र्वभावविगता ।

एव विदु[18] बुद्धसुता[19] ज्ञानमायनिरता

दर्शयंति[20] सर्वचरि[21] सर्वभावविगता ॥ १२ ॥

एतादृशा श्रुतसहस्रान् भणि[22]त्व मधुरं-

स्तदा मरुकन्यका जिनं दृष्ट्वा तूष्णी[23]म्भूताः ।

पर्षद्विप्रसन्नेयमवोचत् सुगतात्मजा

अष्टमाया भ[24]णं ऊर्ध्वं[25] चरिं सद्धर्म[26]राजि[27]तां ॥ १३ ॥

वज्रगर्भो बोधिसत्त्व आह ॥

यो ऽयं भवंतो जिनपुत्रा बोधिसत्त्व एवमप्रमाणज्ञेयविचारितं[28]या बुद्ध्या भूयश्चोत्त-

1 शा T. 2 देशयन्ति MS.K.K'. 3 ति L. 4 त्वा MS. 5 क्ष्ल T. क्ष्रू K. 6 त्ये T. 7 नाभि-प्रत्यय MS. नभिप्रत्यय K'. नहि प्रत्यय K. 8 ये 2 न्ति=येन्द्रि T.K.K'.L. 9 म RS. 10 निरता तत्र=सा तत्र T.K'. स तत्र MS. अभिरतास्तत्र L. 11 तत्र जिन MS.K.K'. (त्वं) जिन RS. 12 या All MSS. 13 यथ MS. यथा RS. 14 कारा MS. or कार? 15 दर्शयन्ति All MSS. 16 टी T.K. 17 तत्र MS. सत्त्व RS. 18 दू RS. 19 तानु MS. तान T.K.L. 20 (ती) RS. 21 री RS. 22 नि MS. 23 श्ची MS. 24 न RS. 25 र्ध्वं RS. 26 क MS. 27 नाम् RS. 28 or ततया?

[1]रशान्तान्विमोक्षानध्यव[2]स्यन्नध्या[3]लंबमानः । [4]भूयोत्तरं[5] तथागतज्ञानं[6] सुसमाप्तं[7] विचारयन् । तथागतगुह्यानुप्रवेशं[8] चावतरन् । अचिंत्यज्ञानमहात्म्यं च प्रविचिन्वन् । धारणीसमाधिं प्रविचयं च परिशोधयन् । अभिज्ञावैपुल्यं चाभिनिर्हरन् । लोकधातुविभक्तिं चानुगच्छन् । तथागतबलवैशारद्यावेणिकबुद्धधर्मासंहार्य[9]तां च परिकर्मयन् । तथागतधर्मचक्रप्रवर्तनवृष[10]भितां चानुक्र[11]ममा[12]नः । महाकरुणाधिष्ठानप्रतिलंभं चानुत्सृजन्[13] । नवमीं बोधिसत्त्वभू[14]मिमाक्रमति । [15]सो ऽस्यां साधुमत्यां बोधिसत्त्वभूमौ स्थितः कुशलाकुशलाव्याकृतधर्माभिसंस्कारं च यथा[16]भूतं प्रजानाति । सा[17]स्रवाना[18]स्रवधर्माभिसंस्कारं च[19] । लौकिकलोकोत्तरधर्माभिसंस्कारं च[20] । चिंत्याचिंत्यधर्माभिसंस्कारं च । नियतानियतधर्माभिसंस्कारं[21] च । श्रावकप्रत्येकबुद्धधर्माभिसंस्कारं च । बोधिसत्त्वचर्याधर्माभिसंस्कारं च । तथागतभूमिधर्माभिसंस्कारं च । संस्कृत[22]धर्माभिसंस्कारं च । असंस्कृतधर्माभिसंस्कारं च यथाभूतं प्रजानाति । स एवं ज्ञानानुगतया बुद्ध्या [23]सर्व[24]सत्त्वचित्तगहनोपचारं च यथाभूतं प्रजानाति । क्लेशगहनोपचारं च । कर्मगहनोपचारं च । इंद्रियगहनोपचारं च । अधिमुक्तिगहनोपचारं च । धातुगहनोपचारं च । आशयानु[25]शयगहनोपचारं च । उपपत्तिगहनोपचारं च । वा[26]सनानु[27]संधिगहनोपचारं च । त्रिराशिव्यव[28]स्थानगहनोपचारं च यथाभूतं प्रजानाति । स सत्त्वानां चित्त[29]मात्रतां च यथाभूतं प्रजानाति । चित्तविचि[30]त्रतां च[31] । चित्तक्ष[32]णलघुपरिवर्तभंगाभंगतां च । चित्ताशरीरतां च । चित्ताने[33]न्त्यसर्वतःप्रभूततां च । चित्तप्रभास्वरतां च । चित्तसंक्लेशनिःक्लेशतां च चित्तबं[34]धविमोक्षतां च । चित्तमायाविथपनतां

1 रां छांता T. 2 य T. 3 लब्धमानः T. 4 भूयश्चोत्त MS. 5 र T. 6 नमसमाप्तं T. 7 सिं MS. 8 श T. 9 यँ All MSS. 10 भतां R. 11 क्रामन् T. 12 णः R. 13 त्रवमीं T. 14 मिं समा T. 15 यो MS. 16 रूपं MS. 17, 18 श्र K′. 19 वा T. 20 च+प्रजानाति T. 21 रतां MS.K.K′. 22 त+भूमि MS.K.K′. 23 सर्व–MS.K. 24 सत्त्व Sdh. बोधि Kj. Bb. 25 शय–T. 26 श T. 27 वं MS. वां K. 28 ष्ठा T. 29 वैमात्यतां T. वैमात्रतां R. 30 मात्रतां T 31 च+यथाभूतं प्रजानाति । T. 32 क्षण–T. 33 नित्य T. न्यत्य K. 34 ष T.

च । चित्तयथागतिप्रत्युपस्थान[1]तां च । यावदनेकानि चित्तनानात्वशतसहस्राणि यथाभूतं प्रजानाति । स संक्लेशानां दूरानु[2]गततां च यथाभूतं प्रजानाति । प्रयोगानन्ततां च । सहजाविनि[3]र्भागतां च । अनुशयपर्यु[4]त्थानैकार्थतां च । चित्तसंप्रयोगासंप्रयोगतां च । उपपत्तिसंधियथागतिप्रत्युपस्थानतां च । त्रैधातु[5]कविभ[6]क्तितां च । तृ[7]ष्णाविद्यादृष्टिशल्यमा[8]नमहा[9]सावद्यतां च । त्रिविधकर्मनि[10]दानानुपच्छे[11]दतां च । समासतो यावच्चतुरशीतिक्लेशचरितनानात्वसहस्रानुप्रवेशतां च यथाभूतं प्रजानाति । स कर्मणां कुशलाकुशलाव्याकृततां च यथाभूतं प्रजानाति । विज्ञप्त्यविज्ञप्तितां च । चित्तसहजाविनि[12]र्भागतां च । स्वरस[13]क्षणक्षीण[14]भंगोपचयाविप्रणाशफलानुसंधितां च । [15]विपाकाविपाकतां च । कृष्णशु[16]क्लानेकदे[17]शकर्मसमादान[18]विनि[19]र्भागविमात्रतां च । कर्मक्षेत्राप्रमाणतां च । आर्यलौकिकप्रविभ[20]क्ततां च । [21]दृष्टधर्मोपपद्या[22]परपर्यायवेदनीयतां च । यानायाननियतानियततां च । समासतो यावच्चतुरशीतिकर्म[23]नानात्वसहस्र[24]विभक्तविचयकौशल्यं च यथाभूतं प्रजानाति । स इंद्रियाणां मृदुमध्याधिमात्रतां च यथाभूतं प्रजानाति । पूर्वान्तापरान्तसंभेदा[25]संभेदतां च । उदारमध्यनिकृष्टतां च । क्लेशसहजाविनि[26]र्भागतां च । यानायाननियतानियततां च । [27]यथापरिपक्वापरिपक्ववै[28]नयिकतां च । इंद्रियजालानुपरिवर्तनलघु[29]भंगनिमित्त[30]ग्रहणतां च । इंद्रियाधिपत्यानवमर्दनीयतां च । विवर्त्याविवर्त्येन्द्रियप्रविभागतां च[31] । दूरानुगतसहजाविनि[32]र्भागनानात्व[33]विमात्रतां च । समासतो यावदनेकानींद्रियनानात्वसहस्राणि य-

1 पनतां K. 2 नुगततां T. 3 र्भो MS. 4 र्यवष्ठानैकष्ठानतां T. 5 क–T. 6 क्तिनानात्वं च T. 7 श्ना MS. 8 मान–T. 9 स MS. 10 णि R. 11 दं च T. 12 र्भो T.K. 13 क्षण–MS.K. 14 सैगो MS.K. 15 स+वि T. 16 श्न MS. 17 दर्श MS. 18 विनिर्भाग–T. 19 र्भो MS.K. 20 क्ति T. 21 लोकोत्तरधर्मव्यवष्ठानतां च+दृ T. (सोपादानानुपादानतां च । संस्कृतासंस्कृततां च)+दृ R. 22 त्स्या T. 23 णा T. 24 प्रविभक्ति R. 25 दासंभे–T. 26 र्भा T.K. 27 य 13 तां=प्रजानाति परिपाचननियतानियततां T. 28 ने R. 29 भङ्ग MS. 30 ग MS. 31 च+यथाभूतं प्रजानाति K. 32 र्भो MS. 33 धिमात्र T.

थाभूतं प्रजानाति । सो[1]ऽधिमुक्तीनां मृदुमध्याधिमात्रतां च यथाभूतं प्रजानाति । पूर्वान्तपरान्तसंभेदासंभेदतां च यथाभूतं प्रजानाति । उदारमध्यनिकृष्टतां च क्लेशसहजाविनिर्भागतां च यानायाननियतानियतां च परिपाकनियतानियतां च आशयजालानुपरिवर्तलघुभंगनिमित्तग्रहनतां च । आशयाधिपतेयानवद्यतां च विवर्त्याशयतां च प्रविभक्ततां च दूरानुगतसहजवैमात्रतां च समासतो यावच्चतुरशीत्याशयनानात्वसहस्रप्रविभक्तिं प्रजानाति यावदनेकान्यधिमुक्तिनानात्वसहस्राणि यथाभूतं प्रजानाति । स धातूनां मृदुमध्याधिमात्रतां च यथाभूतं प्रजानाति । पूर्वान्तपरान्तसंभेदासंभेदतां च यथाभूतं प्रजानाति । उदारमध्यनिकृष्टतां च क्लेशसहजाविनिर्भागतां च यानायाननियतानियतां च परिपाकनियतानियतां च आशयजालानुपरिवर्तलघुभंगनिमित्तग्रहनतां च । आशयाधिपतेयानवद्यतां च विवर्त्याशयतां च प्रविभक्ततां च दूरानुगतसहजवैमात्रतां च समासतो यावच्चतुरशीत्याशयनानात्वसहस्रप्रविभक्तिं प्रजानाति यावदनेकान्यपि धातुनानात्वसहस्राणि यथाभूतं प्रजानाति । स आशयानां[2] मृदुमध्याधिमात्रतां च यथाभूतं प्रजानाति । पूर्वान्तपरान्तसंभेदासंभेदतां च यथाभूतं प्रजानाति । उदारमध्यनिकृष्टतां च क्लेशसहजाविनिर्भागतां च यानायाननियतानियतां च परिपाकनियतानियतां च आशयजालानुपरिवर्तलघुभंगनिमित्तग्रहनतां च । आशयाधिपतेयानवद्यतां च विवर्त्याशयतां च प्रविभक्ततां च दूरानुगतसहजवैमात्रतां च समासतो यावच्चतुरशीत्याशयनानात्वसहस्रप्रविभक्तिं प्रजानाति यावदनेकानि आशयसहस्राणि यथाभूतं प्रजानाति । सो[3]ऽनुशयानामाशयसहजचित्तसहजतां च यथाभूतं प्रजानाति । [4]चित्त[5]संप्रयोगतां च । विप्रयोगविभागदूरानुगततां च । अनादिकालानुद्धटिततां च । सर्वध्यानविमोक्ष[6]समाधिसमाप-

1 सा MS.K.K'. 2 स T. 3 सानु T. 4 चित्ता T. 5 संप्रयोगतां च।–T. 6 समाधि–K.

त्यभिज्ञा[1]प्रसह्य[2]तां च । त्रैधातुकसंधिसु[3]निबद्धतां च । अनाधिकालचित्तनि[4]बंधसमुदाचारतां च । आयतनद्वारसमुद[5]यविज्ञप्तितां च । प्रतिपक्षलाभ[6]द्रव्य[7]भूततां च । भूम्यायतनसमवधानासमवधानतां च । [8]अनन्यार्य[9]मार्गसमुद्धटनतां च यथाभूतं प्रजानाति । स उपपत्तिनानात्वतां च यथाभूतं प्रजानाति । यथाकर्मोपपत्तितां च । निरयतिर्य[10]क्प्रेतासुरमनुष्यदेवव्यवस्थानतां च । रूपारू[11]प्योपपत्तितां च । संज्ञासंज्ञोपपत्तितां च । कर्मक्षेत्र[12]तृष्णा[13]स्ने[14]हाविद्यांधकारविज्ञानवीजपुनर्भवप्ररोह[15]णतां च । नामरूपसह[16]जा[17]विनिर्भागतां च । भवसंमोहतृष्णा[18]भिलाषसंधितां च । भोक्तुकामभवितुकामसत्त्व[19]रत्यनवराग्रतां च । त्रैधातुका[20]वग्रहणसंज्ञानि[21]ःकर्षण्य[22]तां च । यथाभूतं प्रजानाति । स वासनाना[23]मुपचारानु[24]पचारतां च यथाभूतं प्रजानाति । यथागतिसं[25]बंधवासनावासिततां च । यथासत्त्वचर्याचरणवासित[26]तां च । यथाकर्मक्लेशाभ्यासवासिततां च । कुशलाकुशलाव्याकृतधर्माभ्यासवासिततां च । पुनर्भवगमनाधिवासिततां च । अनुपूर्वाधिवासिततां च । दूरानुगतानु[27]पच्छेदक्ले[28]शोपकर्षण[29]विकारानुद्धरणवासित[30]तां च । द्रव्यभूताद्रव्य[31]भूताधिवासिततां च । श्रावकप्रत्येकबुद्धबोधिसत्त्वतथागतदर्शनश्रवण[32]संवासवासिततां च यथाभूतं प्रजानाति । स सत्त्वराशीनां स[33]म्यक्त्वनियततां च । मिथ्यात्वनियततां च । उभयत्वा[34]नियततां च यथाभूतं प्रजानाति । सम्यग्दृष्टिसम्यग्नियततां च । मिथ्यादृष्टिमिथ्यानियततां च । तदुभयविगमादनियततां च । पंचान[35]न्तर्यान्यतममिथ्यानियततां च । पंचेद्रियसम्यग्नियततां च । तदुभयविगमादनियततां च । अष्टमिथ्यात्वमिथ्यानियततां च । सम्यक्त्वसम्यग्नियततां च । अपु-

1 ज्ञ MS.K.K'. 2 ह्य T. 3 षु T. 4 विवध T. 5 या T. 無所知 Kj. 6 भा T. 7 भू—T. 8 अ 10 तां=अनतां च । आन्तार्यमार्गसमुद्धटनतां K. 9 र्गा MS. 10 ग्योनिप्रेता R. 11 पो T. 12 त्ला T. 13 श्ना MS. 14 हो T. 15 न T. 16 जो MS. 17 र्भो MS.K. 18 श्ना MS. 19 त्य T.K. 20 को MS. 21 निस्कर्प T. 22 ण T. ण्य—R.K'. 23 ना—T. 24 मु T. 25 बंध—T. 26 त—T. 27 प—T. 28 शा K. 29 वि 5 ण—T. 30 त—T. 31 भूतवासिततां T. 32 संवास—T. संवासिततां K. 33 कृत्व T. 34 त्वा—All MSS. 35 न—K.

नःकारिततां च । तदुभयविगमादनियततां च । मात्सर्येर्ष्याघृणोपचाराविनिवृत्त्यामिथ्यानियततां च । आर्यानुत्तरमार्गभावनोपसंहारसम्यक्त्वनियततां च । तदुभयविगमादनियतराश्युपदेशतां च यथाभूतं प्रजानाति । इति हि भो[1] जिनपुत्र[2] एवं ज्ञानानुगतो बोधिसत्त्वः साधुमत्यां बोधिसत्त्वभूमौ प्रतिष्ठित इत्युच्यते । सो ऽस्यां साधुमत्यां बोधिसत्त्वभूमौ स्थित एवं चर्याधिमात्रतां सत्त्वानामाज्ञाय तथैव मोक्षोपसंहारमुपसंहरति । स सत्त्वपरिपाकं च यथाभूतं प्रजानाति । सत्त्वविनयं च श्रावकयानदेशनां च । प्रत्येकबुद्धयानदेशनां च बोधिसत्त्वयानदेशनां च । तथागतभूमिदेशनां च यथाभूतं प्रजानाति । स एवं ज्ञात्वा तथत्वाय सत्त्वेभ्भो धर्मं देशयति । यथाशयविभक्तितः । यथानुशयविभक्तितः । यथेन्द्रियविभक्तितः । यथाधिमुक्तिविभक्तितः । यथागोचरविभागज्ञा[3]नोपचारतः । सर्वगोचरज्ञानानुगम[4]नतः । यथाधातुग[5]हनोपचारानुगमनतः । यथागत्युपपत्तिक्लेशकर्मवासनानुवर्तनतः । यथाराशिव्यवस्थानानुगमनतः । यथायानाधिमोक्षविमुक्तिप्राप्तितः । अनंतवर्णरूपकायसंदर्शनतः । सर्वलोकधातुमनोज्ञपुरविज्ञा[6]पनतः । सर्वरुतरवि[7]तपरिज्ञानतः । सर्वप्रतिसंवि[8]द्विनिश्चयकौशल्यतश्च धर्मं देशयति । सो ऽस्यां साधुमत्यां बोधिसत्त्वभूमौ [9]व्यवस्थितः [10]सन्बोधिसत्त्वो धर्मभान[11]कत्वं[12] कारयति । तथागतधर्मकोशं च रक्षति[13] । [14]स धर्मभाण[15]कगतिमुपगतो ऽप्रमाणा[16]नुगतेन [17]ज्ञानकौ[18]शल्येन च[19] । चतुः[20]प्रतिसंविदभिनिहृ[21]तया बोधिसत्त्ववाचा धर्मं देशयति । तस्य सततसमितमसंभिन्नाश्चतस्रो बोधिसत्त्वप्रतिसंविदो [22]ऽनुवर्तन्ते । कतमाश्चतस्रो[23] यदुत । [24]धर्मप्रतिसंविदर्थप्रतिसंविन्नि-

1 भवन्तो 2 त्ता T. 3 नोपसंहारतः T. 4 मा T. 5 मोहनो MS. 6 ज्ञे MS. ज्ञ K. 7 चित All MSS. 8 विद्धि MS. 9 व्यव—R. 10 संबोधि T. 11 ण K.K'. 12 त्वं+च T. 13 न्ति T. 14 स—T. 15 न T. 16 णज्ञानानुगतेन R. 17 ज्ञान—R. सर्वकौश T. 18 ले All MSS. 19 च—T. 20 तुप्रति T. 21 or ततया? 22 प्रवर्तंते T. 23 स्रा MS. 24 一曰分別法・二曰曉了義・三曰順次第・四曰解辯才 Dhr.

रुक्तिप्रतिसंवित्प्रतिभा[1]णकप्रतिसंवित् । स धर्मप्रतिसंविदा स्व[2]लक्षणं धर्माणां प्रजानाति । अर्थप्रतिसंविदा [3]विभक्तिं धर्माणां प्रजानाति । निरुक्तिप्रतिसंविदा [4]असंभेदद‍ेशनां धर्माणां [5]प्रजानाति । प्रतिभा[6]णप्रतिसंविदा[7]नुप्रबन्धानुपच्छेदतां[8] धर्माणां प्रजानाति । पुनरपरं धर्मप्रतिसंविदा अभावशरीरं धर्माणां प्रजानाति । अर्थप्रतिसंविदा उदयास्तंगमनं धर्माणां प्रजानाति । निरुक्तिप्रतिसंविदा [9]सर्वधर्मप्रज्ञ[10]प्त्यव्यवच्छेदेन धर्मं देशयति । प्रतिभा[11]णप्रतिसंविदा यथाप्रज्ञप्त्यविकोपनतयापर्यन्ततया धर्मं देशयति । पुनरपरं धर्मप्रतिसंविदा प्रत्युत्पन्नविभक्तिं धर्माणां प्रजानाति । अर्थप्रतिसंवि[12]दातीतानागतविभक्तिं धर्माणां प्रजानाति । निरुक्तिप्रतिसंवि[13]दातीतानागतप्रत्युत्पन्नासंभेदतो धर्मं देशयति । प्रतिभा[14]नप्रतिसंविदा एकैकमध्वानमा[15]रभ्यापर्यन्तधर्मालोकतया धर्मं देशयति । पुनरपरं धर्मप्रतिसंविदा धर्मप्रभेदं प्रजानाति । अर्थप्रतिसंवि[16]दा ऽर्थप्रभेदं प्रजानाति । निरुक्तिप्रतिसंविदा यथारु[17]तदेशनतया धर्मं देशयति । प्रतिभानप्रतिसंविदा य[18]थाशयज्ञानं धर्मं देशयति । पुनरपरं धर्मप्रतिसंविदा धर्मज्ञानविभक्त्यसंभेदकौशलं प्रजानाति । अर्थप्रतिसंवि[19]दान्वयज्ञानतथा[20]त्वव्यवस्थानं प्रजानाति । निरुक्तिप्रतिसंविदा संवृत्तिज्ञानसंदर्शनासंभे[21]दतया निर्दिशति । प्रतिभानप्रतिसंविदा परमार्थज्ञानकौशल्येन धर्मं देशयति । पुनरपरं धर्मप्रतिसंविदा एकनयाविकोपं [22]धर्माणां [23]प्रजानाति । अर्थप्रतिसंवि[24]दा स्कंधधात्वायतनसत्यप्रतीत्यसमुत्पादकौशल्[25]यानुगममवतरति । निरुक्तिप्रतिसंविदा[26]सर्वजगदभिगमनीयसुम[27]धुरगिरिनिर्घोषाक्षरैर्निर्दिशति । प्रतिभानप्रतिसंविदा भूयो भूयो ऽपर्यन्त[28]धर्मावभा[29]सतया निर्दिशति ।

1 न T. 2 र T. 3 उदयास्तंगमनं धर्भाणां MS. 4 सु MS. सत्त्व K'. 5 देशयति K'. 6 न T.
7 अर्थप्रपन्नानुप MS 8 नां MS. 9 स 16 ति=अभावसंभेददेशनां धर्माणां प्रजानाति K. 10 प्त्यं MS.
11 स T. 12, 13 दा अती T. 14 स K. 15 or ल? 16 ज्ञा MS. दा अर्थ T. 17 त+धर्म MS.K.K'.
18 थानुशय MS. 心樂 Sn. 意樂 Sdh. 所樂解 Bh. Kj. 19 दा अन्व T. 20 गतव्यव T. त्वप्रतिस्थानं K'.
21 दनतया MS. 22 धर्माणां—T. 23 देशयति MS. 24 धा MS. 25 ला T. 26 स+स MS.
27 नु MS. 28 ज्ञानावभा Sdh. 29 प MS.

पुनरपरं धर्मप्रतिसंविदा [1]एकयानसमव[2]सरणनानात्वं प्रजानाति । अर्थप्रतिसंविदा प्रविभक्तयानविमात्रतां प्रजानाति । निरुक्तिप्रतिसंविदा सर्वयानान्यसंभे[3]देन निर्दिशति । प्रतिभानप्रतिसंविदा एकैकं यानमपर्यन्तधर्मावभासेन देशयति । पुनरपरं धर्मप्रतिसंविदा सर्वबोधिसत्त्वचरिज्ञानचरिधर्मचरिज्ञानानुगममवत[4]रति । अर्थप्रतिसंवि[5]दा दशभूमिव्यवस्थाननिर्देशप्रविभक्तिमवतरति । निरुक्तिप्रतिसंविदा यथाभू[6]मिमार्गोपसंहारासंभेदेन निर्दिशति । प्रतिभानप्रतिसंविदा [7]एकैकां भू[8]मिमपर्यन्ताकारेण निर्दिशति । पुनरपरं धर्मप्रतिसंविदा सर्वतथागतै[9]कक्षणानुबोधमवतरति । अर्थप्रतिसंविदा नानाकालवस्तुलक्षणविभंगानुगमं प्रजानाति । निरुक्तिप्रतिसंविदा यथाभिसंबोधं[10] विभक्तिनिर्देशेन निर्दिशति । प्रतिभानप्रतिसंविदा एकैकं धर्मपदमपर्यन्तकल्पाव्यवच्छेदेन निर्दिशति । पुनरपरं धर्मप्रतिसंविदा सर्वतथागतवाग्बलवैशारद्यबुद्धधर्ममहाकरुणाप्रतिसंवित्प्रयोगधर्मचक्रानुप्रवर्तनसर्वज्ञज्ञानानुगमं प्रजानाति । अर्थप्रतिसंविदा चतुरशीतिसत्त्वचरितसहस्राणां यथाशयं यथेन्द्रियं यथाधिमुक्तिविभक्तितस्तथागतघोषं प्रजानाति । निरुक्तिप्रतिसंविदा सर्वसत्त्वचर्यासंभेदतस्तथागतघोषानुरवेण निर्दिशति । प्रतिभानप्रतिसंविदा तथागतज्ञान[11][12]प्रतिभासचर्यामण्डलाधिमुक्त्या धर्मं देशयति । [13]स एवं प्रतिसंविदां ज्ञानाभिनिर्हारकुशलो [14]भो जिनपु[15]त्रा बोधिसत्त्वो[16] नवमीं बोधिसत्त्वभूमिमनुप्राप्तस्तथागतधर्मकोशप्राप्तो महाधर्मभाणकत्वं[17] कुर्वाणः । अर्थवतीधारणीप्रतिलब्धश्च भवति । धर्मवतीधारणीप्रतिलब्धश्च भवति । ज्ञानाभिनिर्हारवतीधारणीप्रतिलब्धश्च भवति । अवभासवतीधारणीप्रतिलब्धश्च भवति ।

1 一乘平等性 Śn. 一乘入門差別 Śdh. 一乘究竟攝一切無差別 Bb. 諸法無有分別攝在一乘 Kj. Br. 2 श T.K. 3 दै T. 4 रं T. 5 धिहा MS. 6 मि+प्रति MS. मी T. 7 一切行無邊相 Bb. Kj. 一々地無邊行相 Śn. 一々地無量相 Br. 8 मिसर्वसत्त्वचर्यापर्यंता MS. 9 लक्षण MS. 刹那頃 Śdh. 10 धिं R. ध MS. 11 ना T. 12 प्रभाचर्या T. 13 स– T. 14 भवन्तो T. 15 त्र R. 16 त्त्वो+महासत्त्वो MS.K. 17 त्वकुर्वाणः T. त्वं च कुर्वाणाः MS.

[1]वसुमतीधारणी[2]सुमतीधारणीतेजोवतीधारण्यसंग[3]मुखधारण्यनन्तवतीधारणीविचित्रार्थकोशवतीधारणीप्रतिलब्धश्च भवति । स एवमादीनां धारणीप[4]दानां [5]परिपूर्णानि दशधारणीमुखासंख्येयशतसहस्राणि प्रतिलभते । [6]दशासंख्येयशतसहस्रानुग[7]तेनैव स्वरांगकौशल्ये[8]न । तावदप्रमाणानुग[9]तेनैव प्रतिभानवि[10]भक्तिमु[11]खेन धर्मं देशयति । स एवमप्रमाणैर्धारणीमुखासंख्येयशतसहस्रैर्दशसु दिक्ष्वप्रमेयाणां[12] बुद्धानां भगवतां शकाशाद्धर्मं शृणोति । [13]श्रुत्वा च न विस्मारयति । यथा श्रुतं चाप्रमाणविभक्तित एवं निर्दिशति । स एकस्य तथागतस्य सकाशाद्दशभिर्धारणीमुखासंख्येयशतसहस्रैर्धर्मान्पर्यवाप्नोति । यथा चैकस्य एवमपर्यन्तानां तथागतानां [14]प्रणिधानमात्रेण बहुतरं सम्यक्संबुद्धसकाशाद्ध[15]र्ममुखालोकं सं[16]प्रतीच्छति । न त्वेवं[17] महाबाहुश्रुत्य[18]प्राप्तः श्राव[19]कः श्रुतो[20]द्ग्र[21]हणधारणीप्रतिलब्धः कल्पशतसहस्रो[22]द्ग्रहणाधिष्ठानेन । स एवं धारणीप्राप्तश्च [23]प्रतिभानप्राप्तश्च धर्मसं[24]कथा[25]सन्नि[26]षण्णः । सर्वावर्ता[27] त्रिसाहस्रमहासाहस्रै[28]र्लोकधातुं [29]स्फुरित्वा यथाश[30]यविभक्तितः सत्त्वेभ्यो धर्मं देशयति । धर्मासने निषण्णो[31] धर्मासनं चास्य तथागता[32]नभिषेकभूमिप्रा[33]प्तांश्च बोधिसत्त्वां[34] स्थापयित्वा सर्वतो विशिष्टमप्रमाणावभासप्राप्तं[35] भवति । स धर्मासने निषण्णो[36] आकांक्षन्नेकघोषोदाहारेण सर्वपर्षदं नानाघोषरु[37]तविमात्रतया[38]ज्ञा[39]पयति । आकांक्षं[40] नानाघोषै[41]र्नानास्वरांगविभक्तिभिरा[42]ज्ञापयति । आकांक्षं रश्मिमुखोपसंहारै[43]र्धर्ममुखानि निश्चारयति । आकांक्षन्सर्वरोम-

1 व—T. 2 व+सु T. 3 सु MS. 4 रा MS. 5 प्रति T. 6 यथा MS. तथा K. 7 तेनैवं MS. तैनैक T. 8 लेन T. 9 तेनैवं MS. तैनैव T. 10 मु T. 11 खनैव T. 12 नां K'. 13 शृ K'. 14 स+प्र R. 15 र्मालोकमुखं K'. 16 ति MS. 17 व+प्राप्त T. 18 प्राप्त—T. 19 काः प्रतिलब्धश्रुतग्रहणीकाः कल्प T. 20 ग MS. 21 णे K. 22 तूग्र T. 23 प्रति 4 श्च—T.,=भवति भानभवप्राप्तश्च K. भवति+प्र R. 24 साकथ्यं T. सैकथा K. कथा K'. सांकथ्यं R. 25 संनि K. 26 र्ण्णः T.K. 27 ती MS.K. 28 स्रं T. 29 स्फ MS.T. 30 याधिमुक्ति MS.K.K'. 31 ण्णा MS. ण्णः R. 32 न—MS.K.K'. 33 प्तश्च तां MS.K.K'. 34 त्वा T.K. 35 प्तिं K. 36 ण्णः MS.K'. र्ण्ण T. 37 रुत—T. 38 या संज्ञा T. 39 ज्ञ K. 40 क्षन्ना T.K.K'. 41 षा T. 42 ज्ञ MS.K.K'. 43 रेण धर्म T.

कूपेभ्यो घोषा[1]न्निश्चारयति । आकांक्षन्यावत्त्रिसाहस्रमहासाहस्रं[2]लोकधातौ [3]रूपावभासास्ते-भ्यः सर्वरूपावभासेभ्यो[4] धर्मरुतानि निश्चारयति । आकांक्षन्नेकस्वररुतेन सर्वधर्मधातूं विज्ञा[5]-पयति । आकांक्षन्सर्वरुतनि[6]र्घोषेषु धर्मरुतमधितिष्ठति । आकांक्षन्सर्वलोकधातुपर्यापन्नेभ्यो [7]गीतवाद्यतूर्यशब्देभ्यो धर्मरुतं निश्चारयति । आकांक्षन्नेकाक्षररुतात्सर्वधर्मपद[8]प्रभेदरुतं नि-श्चारयति । आकांक्षन्ननभिलाप्यानभिलाप्यलोकधात्व[9]पर्यन्ततः पृथिव्या[10]पस्तेजोवायुधा[11]तु-स्कंधेभ्यः [12]शूक्ष्मपरमाणुरजःप्रभेदत[13] एकैकपरमाणुरजोऽनभिलाप्यानि धर्ममुखानि निश्चा-रयति । सचेत्त्रिसाहस्र[14]महासाहस्र[15][16]लोकधातुपर्यापन्ना[17]ः सर्वसत्त्वा[18] उपसंक्र[19]म्यैकक्षणलवमु-हूर्तेन प्र[20]श्नान्परिपृच्छेयुः । एकैकश्च ते[21]षामप्रमाणरु[22]तविमात्रतया परिपृच्छेत् । यं चैकः [23]सत्त्वः [24]परिपृच्छेन्न तं द्वितीयः । तं बोधिसत्त्वः सर्वसत्त्वरुतपदव्यंजनमुद्गृह्णीयात् । उद्गृह्य चैकरुताभिव्याहारेण तेषां सर्वसत्त्वानां चित्ताशयां परितोषयेत् । यावदनभिलाप्यलो-कधातुपर्यापन्ना वा सत्त्वा उपसंक्रम्यैकक्षणलवमुहूर्तेन प्रश्नान्परिपृच्छेयुः । एकैकश्च तेषा-मप्रमाणरुतविमात्रतया परिपृच्छेत् । यं चैक सत्त्वः परिपृच्छेन्न तं द्वितीयः तं बोधि-सत्त्व एकक्षणलवमुहूर्तेनैव सर्वमुद्गृह्यैकोदाहारेणैव सर्वानाज्ञापयेत् । [25]यावदनभिलाप्यानपि लोकधातून्स्फु[26]रित्वा यथाशयेन्द्रियाधिमुक्तितः सत्त्वेभ्यो धर्मं देशयति । धर्मसांक[27]थ्यं निषण्ण[28]श्च तथागताधिष्ठानसंप्रत्येषकः सकलेन बुद्धकार्येण सर्वसत्त्वानां प्रत्युपस्थितो भ-वति । स भूयस्या मात्रया एवं ज्ञानावभासप्रग्रहणमारभते । सचेदेकस्मिन्वालाग्रप्रस[29]रे या-

1 प T. 2 स्रायां T. 3 所現色像 Śdh. 色物 Br. 形無形物 Sn. 色無色物 Kj. Bb. 色無色之界 Dhr. 4 भ्यः MS. 5 ज्ञ T.MS.K.K'. 6 नि 6 त–MS. 7 簫笛鐘鼓及以歌詠一切音樂聲皆演法音 Sn. 歌詠樂音一切音聲皆出法音 Br. 歌詠樂聲皆演法音 Śdh. 8 र K.K'. 9 तूप K. 10 व्य MS.K.K'. 11 धातु–T.K.K'. 12 सू T. 13 तः MS.K.K'. 14, 15 स्रं MS. 16 लोकधातु–T. 17 न्ना T. 18 त्त्वा+पर्यापन्नाः सर्वसत्त्वा T. 19 म्य एकक्षणेन ल T. 20 ष्णा T. 21 षांम T. 22 रुत–MS. 23 सत्त्वः–K. 24 परि–T. 25 स+या T. 26 स्फारित्वा MS. स्फरित्वा T. 27 सा T. 28 णः च K. 29 श T.

वन्त्यनभिला[1]प्येषु लोकधातुषु परमाणुरजांसि तावन्तस्तथागतास्तावदप्रमाणप्राप्तेष्वेव पर्षन्मण्डलेषु धर्मं देशयेयुः । एकैकश्च तथागतस्तावदप्रमाण[2]प्राप्ते[3]भ्यः सर्वसत्त्वेभ्यो नानात्वतो धर्मं देशयेत् । एकैकस्मिंश्च सत्त्वाशयसन्ताने[4] तावदप्रमाणमेव धर्मोपसंहारमुपसंहरेत् । यथा चैक[5]स्तथागतः पर्षन्मण्डले तथा ते सर्वे[6] तथागताः । यथा चैकस्मिन्बालाग्रप्रस[7]रे तथा सर्वस्मिं धर्मधातौ । तत्नास्माभिस्तादृशं स्मृतिवैपुल्यमभिनिर्हर्तव्यं[8] । यथैकक्षणेन सर्वतथागतानां सकाशाद्धर्मावभासं प्रत्येषमह्यै[9]करुता[10]व्यतिरेकात् । यावंति च तानि यथापरि[11]कीर्तितानि पर्षन्मण्डलानि नानानिकायधर्म[12]प्रवणैकपरिपूर्णानि । तत्नास्मांभिस्तादृशं प्रज्ञावभा[13]सविनिश्चयप्रतिभानं[14] परिशोध्यं[15] यदेकक्षणेन सर्वसत्त्वान्परितोषये[16]त् । किं पुनरियत्सु लोकधातुषु सत्त्वानि । स इमां साधुमतीं[17] बोधिसत्त्वभूमिमनुप्राप्तो बोधिसत्त्वो[18] भूयस्या मात्रया रात्रिं[19] दिवमनन्यमनसिकारप्रयुक्तो भूत्वा बुद्धगोचरानुप्रविष्टस्तथागतसमवधानप्राप्तो गंभीरबोधिसत्त्वविमोक्षानुप्राप्तो भवति । स एवंज्ञानानुगतो बोधिसत्त्वः समाहितस्तथागतदर्शनं च न विजहा[20]ति । एकैकस्मिंश्च कल्पे ऽनेकान्बुद्धाननेकानि बुद्धशतान्यनेकानि बुद्धसहस्राण्यनेकानि बुद्धशतसहस्राण्यनेकानि बुद्धनियुतशतसहस्राण्यनेकाः [21]बुद्धकोटीरनेकानि बुद्धकोटीशतान्यनेकानि बुद्धकोटीसहस्राण्यनेकानि बुद्धकोटीशतसहस्राण्यनेकानि बुद्धकोटीनियु[22]तशतसहस्राणि दृष्ट्वा[23] च सत्करोति गुरुकरोति मानयति पूजयति । औदारिकेन बुद्धदर्शनेन पूजोपस्थानं नोत्सृजति । तांश्च तथागतान्प्रश्नां[24]न्परिपृ-

1 प्यासु T. 2 णे T. 3 प्तेः सर्व K. 4 नेन ता T. 5 कः त MS.K. 6 र्वे T. 7 श T. 8 व्यो MS. 9 ह्येक 96 नि—Śdh. Śn.,=不失一句何況所說一切世界中衆生 Br. 不失一句如上大會滿中衆生以決定法明演清淨法於一念中令爾所衆生皆得開解何況若干(千)世界中衆生 Bb. 不失一句(39字)何況若干(千)世界衆生 Kj. 斯皆一音恣其所樂順所稱歎諸衆生會充滿道場欲聽法者具足備悉吾等於彼(後)亦當復然智慧光明辯才通徹清淨之業一時須臾悅解衆生其身周旋若干世界所有衆生 Dhr. 10 त MS. 11 कि T. 12 or श्र? cf. Dhr. 13 सं MS. 14 वं MS.K.K'. 15 धें T. 16 येयुः T.K'. येय K. 17 ती K. 18 त्त्व MS.K'. 19 त्रि MS. 20 हं K'. 21 कोटीः अने MS.T. 22 नयुत K.K' 23 ष्ट्रा T. 24 स्ना T.

च्छति । स धर्मधारणी[1]निर्देशाभिनिर्जातो[2] भवति । तस्य भूयस्या मात्रया तानि कुशलमूलान्युत्तप्ततमान्यसंहार्याणि भवंति । तद्यथापि नाम भो जिनपुत्रास्तदेव जातरूपमाभरणीकृतं सुपरिनिष्ठितं कुशलेन कर्मारेण राज्ञश्चक्रवर्तिन उत्तमांगे कंटे[3] वाबद्धमसंहार्यं भवति । सर्वकोट्टराजानां चातुर्द्वी[4]पकानां च सत्त्वानामाभरणविकृतैः[5] । एवमेव भो जिनपुत्रा बोधिसत्त्वस्यास्यां साधुमत्यां बोधिसत्त्वभूमौ स्थितस्य तानि कुशलमूलानि[6] महाज्ञानालोकसुविभक्तान्युत्तप्यन्ते । असंहार्याणि भवंति सर्वश्रावकप्रत्येकबुद्धैरधरभूमिस्थितैश्च[7] बोधिसत्त्वैः । तस्य सा कुशलमूलाभा सत्त्वानां क्लेशचित्तगहनान्यवभास्य तत एव व्यावर्तते[8] । तद्यथापि नाम भो जिनपुत्रा द्विसाहस्रिको[9] महाब्रह्मा सर्वस्मिन् द्विसाहस्रिके[10] लोकधातौ[11] गहन[12]निम्नोपचारानवभासयति । एवमेव भो जिनपुत्रा बोधिसत्त्वस्यास्यां साधुमत्यां बोधिसत्त्वभूमौ स्थितस्य सा कुशलमूलाभा सत्त्वानां क्लेशचित्तगहनान्यवभास्य तत एव व्यावर्तते[13] । तस्य दशभ्यः पारमिताभ्यो बलपारमितातिरिक्ततमा[14] भवति । न च परिशेषासु न समुदाचरति यथाबलं यथाभजमानम् । इयं भवंतो जिनपुत्रा बोधिसत्त्वस्य साधुमती नाम नवमी बोधिसत्त्वभूमिः समासनिर्दिशतः । विस्तरशः[15] पुनरपर्यन्तकल्पनिर्देशनिष्ठातोऽनुगंतव्या । यस्यां प्रतिष्ठितो बोधिसत्त्वो भूयस्त्वेन महाब्रह्मा भवति । महाबलस्थामप्राप्तो[16] द्विसाहस्राधिपतिरभिभूरनभिभूतो [17]ऽर्थदर्शी वशिप्राप्तः । कृती प्रभुः सत्त्वानां सर्वश्रावकप्रत्येकबुद्धबोधिसत्त्वपारमितोपदेशेषु । असंहार्यः सत्त्वाशय[18]परिपृच्छानिर्देशैः[19] । यच्च किं चित्कर्मारभते दानेन वा प्रियवद्यतया वार्थक्रियया वा समानार्थतया वा तत्सर्वमविरहितं बुद्धमनसिकारैर्धर्ममनसिकारैः संघमनसिकारैर्बोधिसत्त्वमनसिकारैर्बोधिसत्त्वचर्या-

1 रि MS. 2 या T. 3 थे K'. 4 चतुरद्वी MS. चातुरद्वी T.K. 5 तौ MS. 6 लमू–MS. 7 मी T. 8 न्ते K'. 9 स्रमहा MS. 10 को T. 11 तु T. 12 ना MS. नो T. 13 न्ति MS. 14 मो MS. 15 रेण MS. 16 सा MS. 17 ऽन्वर्थदर्शी K.K'. त्वर्थदर्शी MS. 18 शय–T. श–K. 19 शः T. शेः K.

मनसिकारैः पारमितामनसिकारैर्भूमिमनसिकारैर्बलमनसिकारैर्वैशारद्यमनसिकारैरावेणिकबुद्धधर्ममनसिकारैर्यावत्सर्वाकारवरोपेतसर्वज्ञज्ञानमनसिकारैः । किमिति सर्वसत्त्वानामग्रचो भवेयं ज्येष्ठः श्रेष्ठो वरः प्रवर[1] उत्तमो ऽनुत्तमो नायलो विनायकः परिणायको यावत्सर्वज्ञज्ञानप्रतिशरणो भवेयमिति । आकांक्षंश्च तथारूपं वीर्यमारभते यथारूपेण वीर्यारंभेणै[2]कक्षणलवमुहूर्तेन परिपूर्णान्दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमान्समाधीन्समापद्यते । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमान्बुद्धन्पश्यति । तेषां चाधिष्ठानं संजानीते[3] । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमाँ[4]ल्लोकधातून्कम्पयति । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमानि बुद्धक्षेत्राण्याक्र[5]मति । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमाँ[6]ल्लोकधातूनवभासयति । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमान्सत्त्वान्परिपाचयति । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमान्कल्पान् तिष्ठति । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमान्कल्पान्पूर्वान्तापरान्ततः प्रविशति । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमानि धर्ममुखानि प्रविचिनोति । दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमान्कायानादर्शयति । काये काये च दशबुद्धक्षेत्रासंख्येयशतसहस्रपरमाणुरजःसमान्बोधिसत्त्वान्परिवारानादर्शयति । तत उत्तरे प्रणिधानबलिका बोधिसत्त्वाः प्रणिधानवैशेषिकतया विकुर्वंति । येषां न सुकरा संख्या कर्तुं कायस्य वा प्रभाया वा ऋद्धेर्वा चक्षुषो वा गोचरस्य वा स्वरस्य वा चर्याया वा व्यूहस्य वाधिष्ठानस्य वाधिमुक्तेर्वाभिसंस्काराणां वा यावदेतावद्भिरपि कल्पको[7]टीर्नि[8]युतशतसहस्रैरिति ॥

अथ खलु वज्रगर्भो बोधिसत्त्व एतमेव भूम्यर्थं प्ररूपयमाणस्तस्यां वेलायामिमा गाथा अभाषत ॥

1 ल T. रः K'. 2 ण एक MS. 3 तो K. 4 नूलो MS. 5 क्रा T. 6 नूलो MS. 7 टि MS.
8 नयुत K.K'.

[1]ते [2]अप्रमाण[3]बलबुद्धिविचारयन्तः
सु[4]सूक्ष्मज्ञानपर[5]माणुप्र[6]भेदज्ञानाः
तथ गुह्यस्थान सुगतान समोसरंतो[7]
भूमिं क्रमन्ति नवमीं जगतो र्थकारी ॥ १ ॥

[8]ते धारणीमुख[9]समाधि[10]महत्त्वमग्रं
विपुलाअभि[11]ज्ञ [12]तथ [13]क्षेत्रप्रवेशनन्तं ।
[14]बलज्ञाननिश्चयम[15]पी [16]जिनधैर्यस्थानं
प्रणिधीकृ[17]पाशयविदू नवमोतरंति ॥ २ ॥

ते अत्रभूम्यनुगता जिनकोशधारी
कुशलाश्च धर्म कुशलाश्च अव्याकृताश्च ।
ये सास्रवा अपि च लौकिक ये[18] च आर्या-
श्चित्या अचिंति[19]य वि[20]दू अनुबुध्ययंति ॥ ३ ॥

नियतांश्च धर्म नियतां प्रविचारयंति
त्रययानसंपदक्रियां परितारयंति ।
[21]भूमिधर्म [22]याँथ अधिमुक्तिप्रचारतश्च

1 Metre : **वसंततिलका**, the final gathas of the ninth bhumi and the initial gathas belonging to the tenth bhumi are missing in T.L.C. (Add. 867,2), **तं** B. **त** MS. 2 **अप्रत्यमाण** MS.K. 3 力 Dhr. Kj. Bb. Śn. or **वर** ? 4 **शू** K′. **सु** RS. 5 dam-pa ḥgro-bas śes dkaḥ-ba. Tib. **मा जगता दुर्ज्ञेया** RS. (第一最微妙) 世難知 Śn. Bb. Kj. (微妙慧第一) 衆生難曉了 Dhr. 6 **ना** K.K′.B.C. 7 **ते** MS. 8 **ते** 27 **न्तं**=de dag gzuṅs mchog tiṅ-ṅjin che-ba ñid mchog daṅ | mṅon-śes yaṅs daṅ de bṣin ṣin ḥjug mthaḥ-yas daṅ | Tib. 9 **खि** MS. 10 **समाहिताग्रा** MS.K.K′.B.C. 11 **ज्ञा** All MSS. 12 **अपि** All MSS. 13 **क्षेत्रप्रवेशनादं** All MSS. 周遍國土 Dhr. 入衆刹 Śn. Śdh. 善入世間相 Kj. 善入世界相 Bb. 14 **वेल** MS. 15 **पी** All MSS. 16 **जिनुवैर्यस्थानं** MS. 最勝現處所 Dhr. 能觀諸佛法 Kj. Bb. 力智無畏不共法 Śn. 修力無畏不共法 Śdh. 17 **ता** MS.K.K′. 18 **य** K. 19 **त्य** MS. 20 **दु** MS. 21 **भू** 28 **ति**=ḥdus-byas rnam-par phye daṅ graṅs daṅ rgyu-ba dag | ḥjig-rten ji-ltar mṅon-byed de-la rab-tu ḥjug | Tib. 22 **यथा** MS.K.K′.B.

अभिसंस्करोन्ति यथ[1] लोक[2] [3]तत्रोत्तरंति ॥ ४ ॥

ते [4]एवं[5]ज्ञान[6]नुगता [7]वरसूक्ष्मबुद्धी

सत्त्वान चित्तग[8]हनं[9] परिमार्गयंति ।

[10]चित्तं [11]विचित्रगहणं परिमार्गयन्ति

वैणेयनन्तप्रभवं सद् ओतरंति ॥ ५ ॥

क्लेशान [12]नादीन प्रयोगसहायतश्च

[13]तथ [14]पर्युत्थाननुशया गतिसंधितश्च ।

[15]कर्म[16]प्रवेशनविचित्रविभक्तितश्च

हेतूनिरुद्ध[17]फल[18]नाश[19] समोत्तरंति ॥ ६ ॥

[20]इन्द्रीय [21]तीक्षमृदु[22]मध्यउदारतश्च

[23]संभेद पूर्वमपरान्त समोत्तरंति ।

अधिमुक्तिनैकविविधा शुभअशुभतश्च

चत्वारि[24]आशितिसहस्र समोत्तरंति ॥ ७ ॥

था MS. 2 क्य K.K'.B.C.BN. 3 तथोत्तरंति All MSS. 4 एव 4 ता=de ḥdraḥi śes ldan. Tib. 5 वं MS.K.K'. 6 ना MS. 7 च सूक्ष्मबुद्धी All MSS. 意微妙殊特 Dhr. 則爲第一妙 Kj. Bb. 8 ग्रहनं 攝受 Dhr. 9 णं B. 10 चित्तं……नन्तप्रभवं MS.K.K'. 知心種々速轉性無質無邊等衆相 Śdh. 種々速轉壞非壞無質無邊等衆相 Śn. 莊飾世輕易無邊自在心 Bb. 輕躁易轉心無邊自在心 Kj. 心若干猶畫遠移而廻轉其神識無限晃燿皆遍入 Dhr. चित्त 31 न=rnam-śes sna-tshogs myur-du ḥgyur-ṣin ldog-pa dań | rnam-śes mthaḥ-yas ḥbyuń-la rtag-tu mkhas-pa ḥjug | ñon-mońs mthaḥ-yas. Tib. 11 वि 13 य B. विचित्रलक्षण-वर्तनिवर्ततां च । चित्तं अनन्त° RS. 12 अनन्त Śdh. Śn. 13 तथ=ये All MSS. de bṣin. Tib. 14 अनुश-यपर्युत्थानैकार्थतां Prose. 15 तथ+क RS. 16 विचित्रप्रवेश (or °प्रभेद ?) MS.K'. प्रवेशविचित्र K.RS. 知業種々雜各々差別相 Kj. Bb. 所作若干種入於剖判業 Dhr. 業性種々各差別 Śn. Śdh. 17 अविप्रणाश Prose. 18 ले C. 19 स K.BN. 20 हेतूमया B.…या MS.K.K'. इन्द्रिय या KS. 根 ACHT. इन्द्री 6 ध्य=dbań-po rno dan tha-ma ḥbiń dań. Tib. 21 तीक्षमृदु=या मृदुक MS.K.K'. 22 वुद्धि B. 23 पूर्वान्तापरान्तसंभेदासंभेदतां Prose. 24 रिं शति MS. रिं शीति K.K'.C. रि शति B.C.

[1]धातु[2]प्रभेद [3]संद भावित क्लेशदृष्टी-
गहनं[4]गता अनवराग्रअ[5]छेद[6]तंश्च ।
ये आशया अनुशया सहजप्रचारी
चि[7]त्तासमोसृतनिबद्धअ[8]छेद[9]वन्ती ॥ ८ ॥

[10]ये आशया अनुशया न च द्रव्यभू[11]तोः
न च देशस्था न च वि[12]प्र[13]वसंती[14] [15]अशाया ।
[16]दुर्ज्ञेय ध्यानविषयानव[17]वर्ति[18]याश्च
छेदश्च मार्ग[19]वजिरेण न चान्यमस्ति ॥ ९ ॥

उपपत्तिपङ्क्तिविभक्तिप्रवेश[20]तश्च
[21]स्नेहं च तृष्णमविद्यान्धक कर्मक्षेता ।
विज्ञानवीजसहजांकुर नामरूपं[22]
त्रैधातुके अनवरा[23]ग्रे समो[24]त्तरंति ॥ १० ॥

[25]ते वा[26]सनाग ति कि[27]ले[28]सनकर्मचित्ता
[29]सुविहारता [30]न च पुनर्गति[31]संत कामा ।

1 धातुप्रवेश जगभावित क्लेशदृष्टी MS.K.K'B. khams-kyi rnam-pa ñon-moṅs lta-ba srid-pa-rnams Tib. 2 तू C.RS. 3 सद not in Tib. but acc. to CH., जग MS.K.K'.B. 4 न K.K'.B.C. 5 च्छे B.C. 6 or न? 7 त्त All MSS. 8 च्छे C. 9 तन्ती MS. तन्ति K.K'.B.C. 10 अयं यथा MS.K.K'. चित्तं यथा (आशय) RS. bsam-pa bag-ñal Tib. 11 or ताः? 12 or प्रा? 13 न्ति All MSS. 14 ती अशाया = त्याशयेभ्यः? 15 आशा K.K'.B.C. आशया RS. 16 दुर्ज्ञो B. दुर्हे RS. 17 भि All MSS. phyir myi ldog. Tib. 18 यश्च K'. 19 विनियेन MS.K.K'.B. विनयेन C. rdo-rje lta-buhi lam-gyis Tib. 20 न? 21 स्नेहश्च तृ° B.C. स्ने 12 ता = sred rlan ma-rig mun-pa de bṣin las-kyi ṡin. Tib. स्ने 26 पं = 欲情為愛潤無明罪福田神識為下種造行為名識 Dhr. 22 पां C. 23 ग्रु K.B. 24 त्त All MSS. or स? 25 or देवासनाग ति? 至于天坐處隨塵勞心行 Dhr. 及知天龍煩惱諸業心 Kj. 知諸天龍趣由煩惱業心 Bb. 惑業心習生諸趣 Śn. 集趣行業煩惱習 Śdh. de-dag. Tib. 26 श K. 27 श K.K'.B.C. 28 न All MSS. or ल? 29 सु 13 मा = ḥdod-chags bral-bas lam-gyi rgyud-du ḥbyuṅ ba myin I Tib. 30 न—MS. य B. 31 सन्त B.

राशित्रिभिर्नि[1]यत सत्त्व समोत्त[2]रन्ति
दृष्टीनिमग्नमपि [3]ज्ञान [4]समोत्तरन्ति ॥ ११ ॥
[5]एवं वि[6]चारणगताः स्थित [7]अत्रभूम्यां
सर्वसत्त्वआशय यथेन्द्रिय[8] याधिमुक्तिः ।
[9]तथ धर्मदेशनविभक्ति प्रकाशयंति
प्रतिसंविदर्थकु[10]शलाः [11]प्रतिभानिरुक्ति ॥ १२ ॥
[12]ते धर्मभाणकग[13]ती अनुप्राप्तस्थानं
[14]सिंहारिषाभनिभता गिरिराजकल्पाः ।
[15]अभिप्रावृषंति मधुरं[16] अमृतश्च[17] [18]वर्षं
भुजगेन्द्र सागर [19]यथा अनुपूरयन्ति ॥ १३ ॥
[20]अर्थार्थप्राप्तकुशलास्तथ धर्मतायां[21]
सर्वं [22]निरुक्तनुगताः प्रतिभा[23]नप्राप्ताः ।
ते धारणीदशअसंख्य[24]सहस्रलब्धा[25]
धार[26]न्ति धर्म यथ [27]सागर [28]वर्षधारी ॥ १४ ॥

1 यैानत B.···MS.K.K′. 2 त MS.K.K′. 3 ज्ञा 5 न्ति=śes-paḥi lam dan de-dag ldan. Tib. 4 ···MS.K. K′.C. समोत्तरन्ति B. 5 एवं 41 ति=de ḥdraḥi śes-ldan sa mchog ḥdi-la gnas-pa ste । sems-can bsam-pa mos-pa dban-poḥi tshul bṣin-du । chos-rnams rnam-par phye-śin śin-tu ston-pa byed । Tib. 6 स MS. श B. 7 अग्र but अत्र Acc. to CH. 8 or यमा, य आ? 9 तथ धर्मविभक्ति प्रकाशयंति MS.K.K′. तेषाम-र्थे धर्मवि॰ RS. 爲其 Dhr. 10 लमूल समोतरित्वा B. 11 प्र 4 क्ति=ńes-tshig spobs-pa-yis Tib. 12 ते 12 नं=de-dag chos smraḥi tshul-la gnas-pa rab-tu thob Tib. 13 मत्यनुप्राप्ताः B. मतीनुप्राप्ता सिं॰ MS. 14 सिंहरिपभनिभा MS.K.K′.B. 15 अतिक्रमयंति MS अभिक्रमंति K.K′.B. अभिप्रवर्षन्ति RS. 16 री (रां?) B. 17 स्य MS. 18 रूपं MS. रुतं B. 19 क्रमयंति MS. वलामनुमोदयन्ति B., bṣin Tib. 20 अज्ञान MS.K.K′. don-gyi don. Tib. हितार्थ ज्ञानकुशला RS. 21 यं MS.K. 22 निरोपनु MS. निरोपेनु B. ńes-tshig Tib. 言詞 Śdh. 言辭 Śn. 滅盡 (निरोध) Dhr. 23 स MS. 24 ख्येय MS.K.K′. 25 ब्धाः MS. 26 र MS. 27 ——— MS. मारुहित्वा । B 28 sprin chen char ḥdsin. Tib.

एवं[1] च धारणिविशुद्धिसमाधिप्राप्ता[2]
एकक्षणेन दशबुद्धसहस्र दृष्टा[3] ।
[4]लब्ध्वान धर्मरतनं च [5]निर्देशयन्ति
[6]एकैकमण्डलविशुद्धिस्वराङ्गगताः ॥ १५ ॥

व्योहारते त्रिसहस्रं महलोकधातुं
[7]परिशेपसत्त्वविविधांस्त्वयरतनेभ्यः ।
तोपेन्ति सर्व [8]यथ इंद्रियआशयाश्च
[9]भुजगेन्द्र सागर [10]वरीं अनुपूरयन्ति ॥ १६ ॥

भूयोत्तरिं गुणिनु वीर्य समारभन्ते
चिन्तन्ति वालप्रसर[11]स्मि [12]अचेतयंताः ।
[13]देशेन्ति धर्म[14] सुगताः पुन नान[15]सत्त्वं
[16]श्रुत्वा धरेन्ति[17] [18]यथ बीज धरेति भूमिः ॥ १७ ॥

1 कं C 2 सा: MS. 3 पादां । B.–दां MS.–ता K दृष्टा (nom. pl. reuter, mthoṅ Tib.) 4 क्षणेन MS.K.K′. श्रवणेन (अणेन) RS. or श्रुत्वान? 以聞於法寶數々而班宣 Dhr. thob-nas. Tib. 5 ston byed-de Tib. 6 एकै 11 ताः–All MSS. 7 परि 12 भ्यः=sems-can bsam sems sna-tshogs tshul bṣin smin byed-cin । Tib. 8 पर MS. पर K′. 9 चतुर्द्वीपसागरवर्षा व समोत्तरन्ति भूयोत्तरिं गुणिनु वीर्य समारभन्ति चित्तन्ति 四方域大海•其德復超此•總要致精進•思惟如恒沙•實爲不可限•安住唯說法•化凡夫衆生•聞之尋受持•猶下種于地 Dhr. 如是等無量•三千大千國•轉深勤精進•而作是思惟•或於一毛頭•無量佛說法•佛爲種々人•演說於妙法•是菩薩皆受•如地受諸種 Kj. 如是等無量•三千大千國•轉深勤精進•而作是思惟•於一微塵中•無量佛說法•隨衆生心相•演說於妙義•是菩薩皆受如地受諸種 Bb. 毛端佛衆無有數•衆生心樂亦無極•悉應其心與法門•一切法界皆如是•菩薩勤加精進力•復獲功德轉增勝•聞持爾所諸法門•如地能持一切種 Śn. 十方無量諸有情•咸來親近會中坐•一念隨心各問難•一音普對悉充足•毛端佛衆無有數•有情意樂亦無窮•悉應其心與法門•一切法界皆如是•菩薩勤加精進力•復獲功德轉增勝•聞持字(cf Śn) 所諸法門•如地能持一切種 Śdh. भु 13 न्ति=gliṅ bṣi rgya-mtshoḥi sprin bṣin yaṅ-dag rab-tu ḥjug । Tib. 10 ———। श्विलंति MS. ———। त्तन्ति K.K′. वरा समनोदयन्ति । चित्तन्ति B. 11 रे K. 12 न्सु MS. सुचेतनंताः MS.K.B. bsam-gyis mi-khyab. Tib. 13 देशेय MS. देशेयु RS. or देशयि? 14 मँ B. 15 म MS. ना? 16 श्रुत्वा 11 मिः=thos-nas sa-bon kun-ḥdsin sa bṣin yoṅs-su ḥdsin. Tib. 17 or व? 18 यथ…सर्वदा MS. यथ कर्मसमासु सर्वदा B.

[1]यावन्तकाः दशदिशासु प्रभूतसत्त्वाः
ते[2] सर्वे एकपरिषन्मण्डले निषण्णा ।
एषां च एक[3]क्षणि [4]सर्वि समो[5]चरित्वा
एकारुतेन [6]इमि तर्पयितव्य सर्वे[7] ॥ १८ ॥

[8]अवस्थिता नरमरूत्तम धर्मराजा
भोन्ती धर्मजिनसुताः परिचालयन्ति ।
रात्रिं दिवं [9]सद जिनैः [10]समुधानुप्राप्ता
गंभीरशान्तस्थित ज्ञानवि[11]मोक्षधीरा[12] ॥ १९ ॥

ते नेकबुद्धनियुतान् पर्युपासयन्ते
[13]भोन्तीव [14]तप्त [15]भूषणं चक्रवर्तिनश्च ।
तस्य क्लेशगहनानि प्रभा समाजिय
[16]प्रभ ब्रह्मणो [17]वं द्विसह[18]स्रिकलोकधातुं[19] ॥ २० ॥

[20]अवस्थिता गुणधरा महब्रह्मलोके
भोन्ती त्रियानदेशने[21] [22]तर्पयन्ति सत्त्वां ।

1 या 12 त्त्वाः = – – – – विशंति धर्मा MS. जगतीह प्रविशंति धर्मा B. phyogs-rnams bcu-poḥi sems-can ma-ṅpo ji-sñed-pa । Tib. 2 ते 12 ण्ण (श्च) RS. 3 लक्षणि B. 4 bsam-pa Tib. 5 त B. 6 मयि MS.K.K'.B. de-dag. Tib. 7 र्वे MS.K. 8 अव 25 न्ति RS. 9 (च दक्षिणैः) RS. 10 समव°–समो°–समु° rtag-par ḥgrogs. । Tib. 11 मोद MS. मान K'. 12 र MS. 13 भो 12 श्च = ḥkhor-los sgyur-baḥi rgyan bzan yoṅs-su byaṅ-ba bṣin । Tib. भोन्ती उतप्त° MS.K.K'. 成如道巍々•莊嚴如輪轉 Dhr. 善根轉明淨•猶如轉輪王•眞金嚴寶冠 Kj. 善根轉明淨•猶如轉輪王•眞金莊嚴冠 Bb. 善益明如王頂上明寶冠 Śn. 善益明如王頂上妙金飾 Śdh. 14 त्त All MSS. 15 खण्ड चक्रवर्तः प्रभव MS. पण्ड चक्र° K'.C. वीर्यवलपणु चक्र° B. पणु (खणु, पणु=पाण्डु) चक्रवर्तः प्रभावा RS. 16 प्रभ 12 तुं = tshaṅs-paḥi ḥod-kyis stoṅ gñis ḥjig-rten ji-bṣin-no । Tib. 17 बुद्धिसह MS. 18 स्रिं K. 19 तुः K.K'.B. 20 अनुनेष्यते सर्वि महब्रह्म° B. अव 25 त्त्वां = 功勳住於斯•持無極梵天•佛分別説解•造立於三乘 Dhr. 菩薩住是地•作三千大千 世界大梵王•諸根悉猛利•善以三乘法•示悟諸衆生 Kj. 菩薩住是地•於三千世界•作大梵天王•諸根悉猛利•善以三乘法•示悟諸衆生 Bb. 住此多作大梵王以•三乘法化衆生 Śn. 住此多作大梵王•以三乘法化有情 Śdh. 21 नं RS. 22 तर्प 3 त्त्वां = विदित्वानुभावा RS. mkhas-śin mthu yod-pa. Tib.

यं चैवमा[1]रभति सर्वजगद्धि[2]ताय

[3]सुगतज्ञज्ञानुपगता गुणज्ञानप्राप्ताः[4] ॥ २१ ॥

क्षेत्राप्रमाणपर्यापन्न एकारजाग्राः[5]

क्षणि एकि [6]तत्तकसमाधि उपेन्ति धीराः ।

दृष्ट्वा [7]दशद्दिशि जिनांश्च [8]शृणोन्ति धर्मं

ततो[9] विकुर्वि[10] [11]प्रणिधान[12]हि[13]ताप्रमाणाः[14] ॥ २२ ॥

[15]इत्येषा नवमी भूमिर्म[16]हाज्ञानविचारिणा ।

गंभीरा[17] दुर्दृशा सूक्ष्मा निर्दिष्टा[18] सुगतात्मजाः ॥ २३ ॥

साधुमती नाम नवमी बोधिसत्त्वभूमिः ॥ ७ ॥

---

[19]एव श्रुत्व चरणं अनुत्तमं

शुद्ध[20]वासनियुताः प्रहर्षिताः ।

अन्तरीक्षस्थितं[21] प्रीणितेंद्रियाः

पूजयंति सुगतं[22] तथागतं ॥ १ ॥

बोधिसत्त्वनयुता [23]अनन्तका

1 रेभेति MS. 2 सुगत 5 ता = bde-gśegs ye-śes ldan-par soṅ (?) Tib. सर्वज्ञज्ञानु° MS.K.K'. 3 सा MS. 4 क्षेत्राण...... एकारजा-ग्राः grańs-med siṅ-du gtogs-pa rdul-phran-du yod-pa. Tib. क्षेत्रा 26 राः = 國土不可計•乃至王舍城•威勢一時思•三昧遍十方 Dhr. 能在一念中•而得於無量•世界微塵數•諸深妙三昧 Kj. 能於一念中•而得無有量•世界微塵數•諸深妙三昧 Bb. 一念所入諸三昧•阿僧祇刹微塵數 Sn. 一念能入於百萬阿僧祇刹塵數定 Śdh. 5 ग्रे RS. 6 de sñed Tib. 7 सर्वे RS. 8 वचः शृणोन्ति RS. 9 यो MS. पो K.K'.B. 10 र्वं K.K'. 11 प्रणि 6 णाः = smon-lam-ldan-pa tshad-med. Tib. 12 नान्वित अप्र MS. ना ऽन्वित अप्र B. नन्विताप्र RS. 13 त अप्र MS. 14 णः MS. नाः K.K'. 15 Metre : श्लोक 16 (यान) RS. Dhr. 17 रा+च महाशांता K'. 18 ष्टो K.B. 19 दशमी भूमिः, Metre : रथोद्धता, एवं MS. ḥdi. Tib. 20 द्धे B. 21 ते MS. 22 त K. ते B. 23 अचिन्तिया (अचिन्तकाः) RS. Śdh. Śn. अनन्तकाः Dhr. Kj. Bb.

अन्तरीक्षगतिप्राप्तिहर्षिताः ।
गन्धमेघ[1]अतुलान्मनो[2]रमान्
धूपयंति [3]जगक्लेशघातिनः ॥ २ ॥
देवराजवशवर्तिप्रीणितो[4]
अंतरीक्षि [5]त्रिसहस्रकोटिभिः ।
[6]वस्त्रकैः [7]समुकरी सगौ[8]रवा[9]
भ्रामयन्ति रुचिरां [10]वरां शतं ॥ ३ ॥
[11]अप्सरा[12]बहव [13]प्रीणितेंद्रियाः
[14]पूजयन्ति सुगतं[15] सगौरवाः[16] ।
[17]तूर्यकोटि[18]नियुता[19]ः प्र[20]वादिता
[21][22]एवरूप खु [23]मुक्त [24]रावतः ॥ ४ ॥
एकक्षेत्रि[25] सुगतो[26] निषण्णकः
सर्व[27]क्षेत्रि प्रतिभास दर्शयी ।
कायको[28]टिविविधा मनोरमा
धर्मधातुविपुलां स्फरि[29]त्विन ॥ ५ ॥
एकरोमु सुगतस्य र[30]श्मयो

1 tshad-med. Tib. 2 मयान् MS.K.K′. 3 सत्त्व RS. 4 ते MS. 5 or ति? 6 चैन्तके MS. °क K′.B. 散諸妙衣 Dhr. 各散衆寶衣 Kj. Bb. 普散天衣供養佛 Śn. Śdh. 7 शम K. सम MS.K′.B. 8 गो K. 9 वाः MS. 10 or वस्त्वां? gos. Tib. 11 सहस्र+अ B. 12 हु B. 13 प्रीनि MS. 14 पूज 8 वाः=bde-bar gśegs-la rjes-su mchod-pa byed । Tib. 15 त MS. 16 वा B. 17 तुर्य K. सूर्य B. 18 टी K. 19 ता MS. 20 चो MS. 21 एव 8 तः=ḥdi-ḥdraḥi sgra-dbyaṅs kun-las byuṅ-bar gyur । Tib 22 वं MS. 23 युक्त MS.K′.C. यक्त K. 24 रेवत MS. रवत K.K′.B. 25 त्र MS. 26 ता MS. 27 क्षत्रि MS.K. क्षेत्री K′. 28 टी K.B. 29 री MS. 30 श्म K′.

निश्चरंति जगक्लेश शाम्यति[1] ।
[2]शक्यु क्षेत्ररजधातु पि क्षयी
[3]ता न शक्यु गणनातु जानितुम् ॥ ६ ॥

के चि [4]बुद्ध[5]वर[6]ल[7]क्षणांविता[8]ः
[9]दर्शयन्ति वरचक्रवर्तिनः ।
[10]क चि क्षेत्रि वरचर्य[11]उत्तमां
[12]शुद्धशान्तद्विपदेन्द्र[13] दृश्यते ॥ ७ ॥

[14]तुषितायतनप्राप्त नायको
[15]च्युति तथा [16]अवक्रमाण दृश्यते ।
गर्भप्राप्त [17]तथ क्षेत्रकोटिषु
जायमान क चि क्षेत्रि[18] दृश्यते ॥ ८ ॥

निष्क्रमंत जगहेतु नायको
बुध्यमान पुन [19]बोधिमुत्तमां ।
[20]धर्मचक्र तथ निर्वृतागतो

1 न्ति K.B. 2 शक्यु 19 तुम् RS. सक्यु ——— नो पि ——— । ——— त्वा जानितुं । MS.K.K′. सक्यु उपशाम्यति नो पि उपशाम्यति ना जानितुं । B. 國土微塵可知數・此光明數不可識 Ŝdh. °不可測 Ŝn. 十方微塵數・不可得計量・一毛孔光明・亦復不可盡 Kj. 十方微塵數・尚可得計量・一毛孔光明・不可得窮盡 Bb. 3 ता न 9 तुम्=de dag bgraṅ-bas śes-par myi nus-so Tib. 4 बुन्द्ध 6 ताः=saṅs-rgyas-mtshan rab mṅaḥ-bar mthoṅ. Tib. 5 न्द्वैर्वल B. 6 र B. 7 णं विदूः B. 8 दुः MS.K.K′. 9 पश्ययन्ते K.K′.B. पश्येयन्ते MS. पश्ययन्ति RS. 10 復遊他國所行最上甚好巍々見天人聖諸大神尊 Dhr. 或見佛種々・爲衆而說法 Kj. Bb. 或見遊行諸佛刹・或見寂然安不動 Ŝn. 或現遊行諸佛刹・或現寂然安不動 Ŝdh. क चि क्षेत्रि=अन्यक्षेत्र MS.K.K′.B. ṣin-rnams la-lar. Tib. 11 mdsad-ciṅ. Tib. 12 शुद्धशान्त=शोधयंति All MSS. dag-ciṅ ṣi-bar. Tib. 13 न्ति MS. द K. द्रे B. 14 तु 9 को RS. 處兜術天現下母胎 Dhr. 或見在兜率・教化於諸天・或見從兜率・來下處胞胎 Kj. Bb. 或現住於兜率宮・或現下生入母胎 Ŝn. 或現住於喜足宮・或現下生入母胎 Ŝdh. 15 च्यु 7 ण=ḥpho daṅ gśegs-par de-bṣin Tib. 16 चङ्क्रमाण RS. 17 बहु MS.K.K′.B. de-bṣin. Tib. 18 त्र All MSS. 19 बों K.K′. 20 現見轉法輪・或見入涅槃 Kj. Bb. 或現說法或涅槃 Ŝn. Ŝdh.

दृश्यमान [1]बहुक्षेत्रकोटिषु ॥ ९ ॥
मायकार यथ विद्य[2]शिक्षितो[3]
[4]जीविकार्थ [5]बहुकाय दर्शयी ।
तद्व शास्तु वर[6]ज्ञानशिक्षितः[7]
[8]सर्वकाय [9]जगतां तु दर्शयी ॥ १० ॥

[10]शून्यशांत[11]प्रकृत्याअलक्षणं
अन्तरीक्षसम[12]प्राप्त[13] धर्मताम् ।
बुद्धशास्तु परमार्थतत्वं[14] च
[15]दर्शयी प्रवरबुद्धगोचरां[16] ॥ ११ ॥

यथ[17] स्वभाव[18] सुगतान[19] धर्म[20]
सर्वसत्त्व तथ प्राप्त[21]धर्मतां ।
[22]लक्षलक्षसमलक्ष [23]तादृशाः
सर्वधर्मपरमा[24]अलक्षणाः ॥ १२ ॥

[25]ये [26]न्विष्यन्ति सुगता[27]ज्ञअर्थिका[28]ः

1 बुद्धक्षेत्र MS.K.K'.B. ṣin-man. Tib. 2 वि MS.K. 3 ते MS. 4 衆生 Kj. Bb. 將順壽命 Dhr. 5 बहिकाय ? but बहुकार्य Ch. gzugs-med. Tib. 6 प्रज्ञ MS.K. काय K'. ye-śes mchog. Tib. 7 ते MS. तो B. 8 普化一切身周遍諸世間 Kj. 普化一切身周遍諸世界 Bb. 於世間中普現身 Śn. Śdh. 9 भिनिर्हर्तुं——— MS.B. ḥgro-ba-rnams-la ston. Tib. 10 शून्य 8 णं=ston-pa ṣi-ba ran-bṣin mtshan-ñid med | Tib. 11 मतिश्च धर्ममोक्षणं B. गतधर्म लक्षणा RS. ——— MS.K.K'. 12 मा MS. 13 सो K. 14 त्वं च MS. त्वतञ्च (or श्च) B. त्वतं RS. 15 र्प RS. 16 र K. रं K'B. 17 त MS. 18 वु K.K'.B. 19 तो MS. 20 गोचरा RS. 21 स: B. 22 लक्ष 19 णाः=mtshan dan mtshan gṣi mñam-pa-ñid-kyis ḥdra | mtshan-ñid med-pa chos-rnams kun-gyi mchog | Tib. 23 तेदृशाः ? 24 र्थलक्षणाः K.K'.B. र्थलक्ष तादृशाः MS. 25 ये 14 त्प=bde-gśegs ye-śes dondu su gñer-bas | rtog dan rnam-rtogs. Tib. 26 तु ———MS. भेप्यन्ते B. तु ज्ञान RS. 27 न All MSS. 28 क K.K'. के RS. कः MS.

कल्प[1]विकल्पपरिकल्पवर्जितं ।
भावभावसमभावबुद्धयः
क्षिप्र भेष्यति [2]नरेष्वनुत्तमाः ॥ १३ ॥
[3]ईदृशान् रुतसहस्रान् भणित्व मधुरस्व[4]रां ।
मरुक[5]न्या जिनं लो[6]क्य तू[7]ष्णीभूताः [8]श[9]मरताः ॥ १४ ॥
[10]प्रसन्नं पर्षदं ज्ञात्वा मोक्षचंद्रो विशारदः ।
[11]वज्रगर्भमि[12]धापृच्छ[13]त् जिनपुत्रं विशारदं ॥ १५ ॥
दशमीसंक्रमंतानाम् [14]आकारगुण[15]गोचरम् ।
निमित्त[16]प्रातिहा[17]र्याश्च सर्वमाख्याहि परिक्र[18]माः ॥ १६ ॥

वज्रगर्भो बोधिसत्त्व आह ॥

[19]यो ऽयं भवन्तो जिनपुत्रा बोधिसत्त्व एवमप्रमाणज्ञेयविचारितया बुद्ध्या यावन्नवमी बोधिसत्त्वभूमिरिति । [20]सुविचितविच[21]यः । [22]सुपरिपूर्ण[23]शुक्लधर्मः । अपर्यन्तसंभारोप[24]चयोप-[25]चितः । सुपरिगृहीतमहापुण्य[26]ज्ञानसंभारः । महाक[27]रुणाधिगतवैपुल्यः । लोकधातुवि[28]भक्तिवै-मा[29]त्वकोविदः । सत्त्वधातुप्रविष्टगहनोपचारः । तथागतगोचरप्रवेशानुगतसंज्ञामनसिकारः । बलवैशारद्यबुद्धधर्माध्यालंबना[30]नुगतः । सर्वाकारसर्वज्ञज्ञानाभिषेकभूमिप्राप्त इत्युच्यते । तस्य खलु पुनर्भवन्तो जिनपुत्रा एवं ज्ञानानुगतस्य बोधिसत्त्व[31]स्याभिषेकभूमिसमापन्नस्य वि-

1 वि—All MSS. 2 जिनो त्तमाः B. नरेश उत्तमाः RS. 3 Metre : श्लोक 4 राः MS K.K'. 5 न्यो MS. 6 काः MS. क्यु B. 7 श्नी MS. 8 स MS. 9 मे K. 10 पश्यति MS. 11 वज्र 13 दं = rdo-rjeḥi-sñiṅ-po ḥjigs-myed-pa | rgyal-sras de-la yan smas-pa | Tib. 12 स्विधा MS.K.K'. म्विधा RS. 13 ते MS. 14 कीदृशं All MSS. rnam-pa. Tib. 15 गोरवन्नि MS. 16 प्र MS. 17 र्यश्च MS. 18 मा MS. म RS. 19 साधुमती नाम नवमी बोधिसत्त्वभूमिः । +यो T. 20 सुविनिश्चित्तविचयः T. 21 प MS.K.K'. 22 शु MS. 23 कुशल T. 24 चितोपचयः MS. 25 चः K. 26 ज्ञान—MS.K. 27 रुनावैपुल्याधिगतः R. 28 वैपुल्यः ज्ञानवैमात्वकोविदः T. 29 तृ K'. त्य R. 30 नुपगतः MS. 31 स्यां T.

मलो नाम [1]समाधिरामुखीभवति । धर्मधातुविभक्ति[2]प्रभेदप्रवेशश्च नाम । बोधिमण्डालंका[3]रव्यूहश्च नाम । सर्वाकाररश्मिकुसुमश्च नाम । सागरगर्भश्च नाम । सागरसमृद्धिश्च नाम । आकाशधातुवि[4]पुलश्च नाम । [5]सर्वधर्मस्वभाववि[6]चयश्च नाम । सर्वसत्त्वचित्तचरि[7]तानुगतश्च नाम । प्रत्युत्पन्नसर्वबु[8]द्धसंमुखावस्थितश्च नाम । बोधिसत्त्वसमाधिरामुखीभवति । तस्यैवं[9]प्रमुखानि दशसमाध्यसंख्येयशतसहस्राण्यामुखीभवन्ति[10] । स तान्सर्वान्समा[11]धीन्समापद्यते[12] च व्युत्तिष्ठते च । समाधिकौ[13]शल्यानुगतश्च । यावत्समाधिकार्यं तत्सर्वं प्रत्यनुभवति । तस्य यावद्दशसमाध्यसंख्येयशतसहस्राणां[14] पर्यन्ते[15] सर्वज्ञज्ञा[16]नविशेषाभिषेकवान्नाम बोधिसत्त्वसमाधिरामुखीभवति । यस्मिन्समनन्तराभिमुखीभूते दशत्रिसाहस्र[17]शत[18]साहस्र[19]पर्यन्तेऽप्रमाण[20]महारत्नरा[21]जपद्मं प्रादुर्भवति[22] । सर्वाकाररत्नप्र[23]त्यर्पितं । सर्वलोकविषयसमतिक्रान्तं । लोकोत्तरकुशलमूलसंभूतं । मायास्वभावगोचरपरिनिष्पन्नं[24] । धर्मधातु[25]सुव्यव[26]स्थितावभासं । दिव्यविषयसमतिक्रान्तं । महावैडूर्यमणिरत्नदण्डं[27] । अतुल्यचन्दनरा[28]जकर्णिकं । महाश्म[29]गर्भकेशरं[30] । जांबूनदसुवर्णावभासपत्त्रं । अपरिमितरश्मिसंकुसुमि[31]तशरीरं । सर्वप्रवररत्नप्रत्युप्तगर्भं । अपर्यन्तमहारत्नजालसंच्छन्नं[32] । परिपूर्णदशत्रिसाहस्रशतसहस्रपरमाणुर[33]जःसममहारत्न[34]पद्मपरिवारं । तदनुगतस्तदनुगतरूपश्च तस्य बोधिसत्त्वस्य कायः संतिष्ठते । स तस्य सर्वज्ञज्ञानविशेषाभिषेकवतः समाधेः स[35]हप्रतिलं[36]भात्तस्मिन्महारत्नराजपद्मे निष[37]ण्णः संदृश्यते । समनंतरं निष[38]ण्णश्च स बोधिसत्त्वस्तस्मिन्महामणिरत्नराजपद्मे । अथ यावन्ति तस्य म[39]-

1 बोधिसत्त्व+स T. 2 प्रभेद–R. 3 व्यूह–K.K'. 4 म K.K'. 5 सर्व–K.K'. 6 मल K. पुल K'. 7 री K. 8 द्ध+धर्म MS.K.K'. 9 व K. 10 ति MS. 11 धि T. 12 द्यं MS. 13 ला T. 14 ण्यप T. 15 त T. 16 नाभिषेकवा MS.K.K'. 17 स T. 18 स्रा MS.K.K'. 19 ते MS. 20 णं T.K'. 21 जं T. 22 त् MS. 23 त्युप्तं T. 24 न्न T. 25 सं T. स MS. 26 हि T. 27 ण्डं दिव्यविषयातिक्रान्तातुल्यचन्दन T. 28 जं T. 29 स्म MS.K. ण्य T. 30 र T. लं MS. 31 मी K. 32 न्न MS.K. 33 ज MS.K'. 34 पद्म–MS.K.K'. 35 हस्तप्र K. 36 भेन तस्मि T. 37 ण्णः T.K.K'. 38 ण्ण T.K.K'. 39 रत्नराजपद्मस्य महारत्नपद्मानि T.

हार[1]त्नराजपद्मानि परिवारः प्रादुर्भूतः[2] । तावन्तो बोधिसत्त्वा[3] दशदिग्लोकधातुसन्निपतिता[4]स्तं बोधिसत्त्वमनुपरिवार्य तेषु महारत्न[5]राजपद्मेषु निषीदन्ति । एकैकश्च तेषां दश[6]समाधिशतसहस्राणि समापद्यंते[7] । तमेव बोधिसत्त्वं नि[8]रीक्षमाणाः । समनंतरं[9] समापन्ने च तस्मिन्बोधिसत्त्वे[10] तेषु च बोधिसत्त्वेषु निरवशेषमथ सर्वलोकधातुसंप्रकंपनं भवति । सर्वापाय[11]प्रतिप्रस्र[12]•[13]म्भणं च । सर्वधर्मधात्ववभासस्फ[14]रणं च । सर्वलोकधातुपरिशोधनं च । सर्वबुद्धक्षेत्रनामधे[15]यरुतानुर[16]वणं च । सर्वसभासचरितबोधिसत्त्वसंनि[17]पातनं च । सर्वलोकधातुदेवमनुष्यतूर्यसंगीति[18]संप्रवादनं च । सर्वसत्त्व[19]सुखसंजननं च । सर्वसम्यक्संबुद्धाचिंत्यपूजोपस्थानप्रवर्तनं च । सर्वतथागतपर्षन्मण्डलविज्ञपनं च भवति । तत्कस्य हेतोः । तथा हि [20]भो जिनपुत्रास्तस्य बोधिसत्त्वस्य समनंतरं निषण्णस्य तस्मिन्महारत्नराजपद्मे [21]ऽधस्ताच्चरणतला[22]भ्यां दशर[23]श्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य[24] दशदिशम[25]वीचिपर्यन्तान्महानिरयानवभासयंति । नैरयिकाणा[26] [27]सत्त्वानां सर्वदुःखानि प्रतिप्रस्र[28]ब्धयन्ति । जानुमण्डलाभ्यां दशर[29]श्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशदिशं सर्वतीर्यग्योनिभवनान्यवभास[30]यन्ति । सर्वतिर्यग्योनिदुःखानि प्रशमयन्ति । नाभिमण्डलाद्दशरश्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशदिशं [31]सर्वयमलोकभ[32]वनान्य[33]वभास्य सर्व[34]यामलौकिकानां [35]सत्त्वानां सर्वदुःखानि[36] प्रशमयंति । वामदक्षिणाभ्यां [37]पार्श्वाभ्यां दशरश्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशदिशं मनुष्याश्रयानवभास्य[38] मनुष्यदुःखानि च प्रशमयंति । उभाभ्यां

1 रत्न—MS.K'. 2 तस्ता T. 3 त्व T. 4 रि T. 5 राज—R. 6 श+दिश T. 7 द्यं T. 8 रि T. 9 र T. 10 त्त्व T. 11 यं MS.K.K'. 12 श्रं K'. 13 भेण T. भनं K'. 14 स्फा K' 15 ध्ये T. 16 चरणं T. 17 पतितं T. 18 ति=त MS. 19 त्त्वे T. 20 भवन्तो T. 21 अ T. 22 रा T. 23 स्म्य MS.K. श्म्या T. 24 यँ T. 25 वि T. 26 नां T.K' 27 सत्त्वानां—K. 28 स्त्रम्भन्ति T. 29 स्म्य MS.K. 30 श T. 31 सर्वतीर्यग्योनियमलोकभवना MS. 32 वे MS. 33 नि अवभाशयन्ति । यामलौ T. 34 य R. 35 सत्त्वानां—T. 36 नि+च T. 37 पार्श्वाभ्यां—MS. 38 शयन्ति T.

पाणिभ्यां दशरश्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशदिशं देवासुरभवनान्यवभास्य[1] देवासुरदुः[2]खानि च प्रशमयन्ति । अंशाभ्यां दशरश्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशदिशं श्रावकया[3]नीयाश्रयानवभा[4]सयन्ति । धर्मलोकमुखं [5]चोपसंहरंति । पृष्ठतो ग्रीवायाश्च [6]दशरश्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशदिशं प्रत्येकबुद्धाश्रयानवभा[7]सयन्ति । शा[8]न्तिसमाधिमुखनयं चोपसं[9]हरंति । मुखद्वाराद्दशरश्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशदिशं प्रथमचित्तोत्पादमुपादाय यावन्नव[10]मीभूमिमनुप्राप्तान्बोधिसत्त्वानवभासयन्ति । प्रज्ञोपायकौ[11]शल्यनयं चोपसंहरन्ति[12] । ऊर्णाकोशाद्दशरश्म्यसंख्येयशतसहस्राणि निश्चरंति । निश्चर्य दशसु दिक्षु सर्वमारभवनान्यवभास्य ध्यामीकृत्या[13]भिषेकभूमि[14]प्राप्तान्बोधिसत्त्वानवभास्य तत्कायेष्वेवास्तंगच्छन्ति[15] । [16]उत्तर्युत्तमांगात्परिपूर्ण[17]दशत्रिसाहस्रासंख्येयशतसह[18]स्रपरमाणुरजःसमा रश्मयो निश्चरंति । निश्चर्य दशसु दिक्षु धर्मधातुप्रमाणान्याकाशधातुपर्यवसानानि सर्वतथागतपर्षन्मण्डलान्यवभास्य दशाका[19]रं लोकं प्रदक्षिणीकृत्योपरि खगपथे स्थित्वा महारश्मिजा[20]लमण्डलानि कृत्वा उत्त[21]प्तप्रभासं नाम म[22]हत्तथागतपूजोपस्थानं सर्वतथागतानामनुप्रवर्तयन्ति । तस्य पूजोपस्थानस्य प्रथमचित्तोत्पादमुपादाय यावन्नवमीभूम्यनुप्रवर्तितं[23] तथागतपूजोपस्थानं शततमी[24]मपि कलां[25] नोपैति । सहस्रतमी[26]मपि शतसहस्रतमीमपि कोटीतमीमपि कोटीशततमीमपि कोटीसहस्रतमीमपि कोटीशतसहस्रतमीमपि कोटीनियुतशतसहस्रतमीमपि कलां नोपैति । संख्या[27]मपि कलामपि गणनामप्युपमामप्युपनिषदमपि न क्षमते । [28]ततः खल्वपि महारश्मि-

1 शयन्ति T. 2 भवनानि MS. 3 निया K. or निका? 4 श T. 5 चौ T.K'. 6 दश—K.K. 7 श T. 8 न्ति K. 9 र K.K'. 10 मीं R. 11 ल्येन MS. ल्यानयं T. 12 ति MS. 13 त्ये-याभि T. 14 मी T. 15 ति MS. 16 उपर्युत्तम T. 17 र्ण्ण T. 18 स्रा MS. 19 र MS. 20 जाल—All MSS. 21 तृ MS. 22 हान्त MS. 23 त MS. 24 मपि—MS. 25 लान्नो T. 26 मपि—T. 27 न्नोपैति कला T. 28 ततः—T.

जा[1]लमण्डला[2]द्यावती दशसु दिक्षु निरवशेषसर्वधर्मधात्वन्तर्गता पुष्पप्रज्ञप्तिर्वा । गंधधूपमाल्यविलेपनचूर्णचीवरछत्रध्वजपताका[3]वस्त्राभरणमणिरत्नप्रज्ञप्तिर्वा । ततो ऽतिरि[4]क्ताः सर्वलोकविषयसमतिक्रान्ताः । लोकोत्तरकुशलमूलसंभाराधिपत्यभिनिर्वृत्ताः । सर्वाकारगुणसंपन्नाः । अचिंत्यनिर्वाणाधि[5]ष्ठानाधिष्ठिताः । नानाव्यूहमहारत्नवर्षाणि चैकै[6]कतथागतपर्षन्मण्डले[7] महामेघा इवाभिप्रवर्षन्ति स्म[8] । तां च ये सत्त्वाः पू[9]जां संजानन्ते ते[10] सर्वे निय[11]ता भवंत्यनुत्तरायां सम्यक्संबोधौ । एवंरूपं[12] च पूजोपस्थानं प्रवर्त्यैता रश्मयः पुनरेव सर्वावन्ति [13]तथागतपर्षन्मण्डलान्यवभास्य दशाकारं लोकं प्रदक्षिणीकृत्य तेषां तथागतानामर्हतां सम्यक्संबुद्धानामधस्तात्क्रमतलेष्वस्तंगच्छन्ति । ततस्तेषां तथागतानां तेषां च बोधिसत्त्वानां विदितं भवति । अमुष्मि लोकधातु[14]प्रस[15]रे एवं चर्यानुगतो बोधिसत्त्वो ऽभिषेककालप्रा[16]प्त इति । तत्र [17]भो जिनपुत्रा दशभ्यो दिग्भ्यो[18] ऽपर्यन्तेभ्यो लोकधातुप्रसरेभ्यो ऽप्रमेयासंख्येयापर्यन्ता बोधिसत्त्वा यावन्नवमीबोधिसत्त्वभूमिप्रतिष्ठि[19]ता आगत्य तं[20] बोधिसत्त्वमनुपरिवार्य महतीं[21] पूजां कृत्वा तमेव बोधिसत्त्वं निरी[22]क्षमाणा दशसमाधिशतसहस्राणि समापद्यन्ते । अभिषेकभूमिप्राप्तानां च बोधिसत्त्वानां का[23]येभ्यः श्रीवत्सालंकाराद्वज्रस्वस्ति[24]कात्सर्वमारश[25]त्रुविजयो[26] नामैकै[27]का महारश्मिर्दशर[28]श्म्यसंख्येयशतसहस्रपरिवारा निश्चरति । निश्चर्य दशदि[29]श्यवभास्यापर्यन्तानि [30]प्रातिहार्याणि संदर्श्य तस्य बोधिसत्त्वस्य श्रीवत्सालंका[31]रवज्रस्वस्तिके[32] एवास्तंगच्छति । समनंत[33]रादस्तमितायाश्च तस्या रश्म्याः शतसहस्रगुणोत्तराः । [34]तस्य बोधिसत्त्वस्य बलस्थामाभिवृद्धिः प्रज्ञायते ॥

1 लमण्ड—T. 2 न्या T. 3 रत्ना T. 4 क्ततरः T. क्ततराः R. क्तिता K. 5 धिष्ठाना—MS. 6 क+त्र T. 7 ल MS. 8 स्म—T. 9 जा T. 10 सर्वे ते T. ते—K. 11 प K. 12 पं महापूजो T. 13 तथागत—K'. 14 प्रश T. 15 रे MS. 16 प्ति MS. 17 भवन्तो T. 18 भ्यः अप T. 19 ता K. 20 न्तं T. तां MS. त K. 21 ती T. 22 क्ष्य K'. 23 याभ्यः T. 24 कां सर्व T. 25 शत्रु—T. 26 या T. 27 क K. 28 स्म्य MS. 29 शो T. 30 प्र MS.K. 31 रे K.K'. 32 के T. 33 रास्तमि T. 34 तस्य—K'.

अथ खलु भो[1] जिनपुत्राः सर्वज्ञता[2]भिज्ञा[3]वत्यो नाम रश्मयः । तेषां तथागतानामर्हतां सम्यक्संबुद्धानामूर्णाकोशे[4]भ्यो निश्चरन्ति । असंख्येयपरिवारा[5]स्ताः सर्वासु दशसु दिक्ष्वशेषतः सर्वलोकधातूनवभास्य । दशाकारं लोकं प्रदक्षिणीकृत्य । महान्ति तथागतविकुर्वितानि संदर्श्य । बहूनि बोधिसत्त्वको[6]टीनियुतशतसहस्राणि[7] सं[8]चोद्य । सर्वबुद्धक्षेत्र[9]प्रसरान्ष[10]ड्विकारं[11] संप्रकं[12]प्य । सर्वापायच्युतिगत्युपपत्ती[13]ः प्रशम्य[14] । सर्वमारभवनानि ध्यामी[15]कृत्य । सर्वतथागताभिसंबोधिविबुद्धबुद्धासनान्यु[16]पसंदर्श्य । सर्वबुद्धपर्षन्मण्डल[17]व्यूहप्रभावं नि[18]दर्श्य । धर्मधातु[19]परमानाकाशधातुपर्यवसानान्सर्वलोकधातूनवभास्य पुनरेवागत्य । तं सर्वावंतं[20] बोधिसत्त्वपर्षत्सं[21]निपातमुपर्युपरि [22]प्रदक्षिणीकृत्य महाव्यूहां निदर्श्य । ता रश्मयः तस्य बोधिसत्त्वस्योत्तमांगे [23]ऽस्तंगच्छन्ति । तत्परिवाररश्[24]मयश्च तथा सन्निपतितानां तेषां बोधिसत्त्वानां शिरस्स्वन्तर्धीयन्ते स्म । समनन्तरं [25]सन्निपतिता[26]भिश्च ताभी रश्मिभिस्ते बोधिसत्त्वा अप्रतिलब्धपूर्वाणि दशसमाधिशतसहस्राणि प्रतिलभन्ते । ताश्च रश्मयस्तुल्यकालं तस्य बोधिसत्त्वस्योत्तमांगे निपतिता[27] भवन्ति । स च बोधिसत्त्वो [28]ऽभिषिक्त इत्युच्यते । सम्यक्संबुद्ध[29]विषये[30] दशबलं परिपूर्य तु सम्यक्संबुद्ध [31]इति संख्यां [32]गच्छति । तद्यथापि नाम भो[33] जिनपुत्रा यो राज्ञ[34]श्चक्रवर्तिनः पुत्रो ज्येष्ठकुमारो[35] अग्रमहिषीप्रसूतश्चक्रवर्ति[36]राज[37]लक्षणसमन्वागतो भवति । तं राजा चक्रवर्ती[38] दिव्ये[39] हस्तिसौवर्णे[40] भद्रपीठे[41] निषाद्य[42] चतुर्भ्यो महासमुद्रेभ्यो [43]वार्यानीय उपरि रत्नविमानेन धार्यमाणेन[44] महता[45] पुष्पधूपगं[46]-

1 भवन्तो T 2 तायाभि MS. 3 ज्ञायावन्तो MS.K.K'. 4 शैभ्यो T. 5 राः ताः K'. 6 टिनियूत K'. 7 णि—T. 8 वा MS. चा T. 9 त्ना T. 10 नूप T. 11 लं T. 12 कम्प T. 13 त्तिः MS. 14 मर्य्य T. 15 नी MS. 16 नुप्रसं T. 17 ला MS. 18 नि—K'. 19 परमानाकाशधातु—K'. 20 त K. 21 त्सां K. 22 प्र—T. 23 ऽ—K'. 24 स्म MS. 25 सनिपति T. 26 ताभिश्च—T. 27 तानि MS.K.K'. 28 ऽ—K'. 29 द्धे MS. 30 य MS.K.K'. 31 इति—T. 32 प्रतिलभते T. 33 भवन्तो T. 34 ज MS. 35 र T. रो अग्रय R. 36 वर्ती MS.K.K'. 37 राज—T. 38 वर्ति T. 39 व्य MS. 40 सो K. 41 थे T.K.K'. 42 ष्या K'. 43 वाच्या T. वाद्या K. 44 मानेन K'. 45 तो K. 46 दीपगंध K'.

धदीपमाल्यविलेपनचूर्णचीवरछत्रध्वजपताकातूर्यताडावचर[1]संगीति[2]व्यूहेन [3]सौव[4]र्णभृंगारं गृहीत्वा तेन वारिणा तं कुमारं मूर्धन्यभिषिं[5]चति । समनंतरा[6]भिषिक्तश्च रा[7]जा क्षत्रियो मूर्धाभिषिक्त इति संख्यां[8] गच्छति । दशकुशलकर्मप[9]थं परिपूर्य[10] तु चक्र[11]वर्तीति सं[12]ज्ञां प्रतिलभते । एवमेव भो[13] जिनपुत्राः समनंतराभिषिक्तो बोधिसत्त्वस्तैर्बुद्धैर्भगवद्भिर्महाज्ञानाभिषेकाभिषिक्त इत्युच्यते । सम्यक्संबुद्धाभिषेकेन दशबलं परिपूर्य[14] तु सम्यक्संबुद्ध इति संख्यां गच्छति । अयं [15]भो जिनपुत्रा[16] बोधिसत्त्वस्य महाज्ञानाभिषेको । यस्यार्थे बोधिसत्त्वो[17] ऽनेकानि दुष्करशतसहस्राण्यारभते । स एवमभिषिक्तो ऽप्रमेयगुणज्ञानविवर्धितो धर्ममेघायां बोधिसत्त्वभूमौ प्रतिष्ठित इत्युच्यते । सो ऽस्यां धर्ममेघायां बोधिसत्त्वभूमौ प्रतिष्ठितो बोधिसत्त्वो धर्मधातुसमुदागमं[18] च यथाभूतं प्रजानाति । कामधातुसमुदागमं रूपधातुसमुदागमं चारूप्यधातुसमुदागमं च । लोकधातुसमुदागमं च सर्वसत्त्वधातुसमुदागमं च । विज्ञानधातुसमुदागमं च संस्कृतासंस्कृतधातुसमुदागमं च । आकाशधातुसमुदागमं च भूताभूतदेशनासमुदागमं च यथाभूतं प्रजानाति । निर्वाणधातुसमुदागमं च दृष्टिकृतक्लेशसमुदागमं च यथाभूतं प्रजानाति । लोकधातुप्रवृत्तिनि[19]र्वृत्तिसमुदागमं च श्रावकचर्यासमुदागमं च प्रत्येकबुद्धचर्यासमुदागमं च बोधिसत्त्वचर्यासमुदागमं च । तथागतबलवैशारद्यावेणिकबुद्धध[20]र्मरूपकाय[21]धर्मकायसमुदागमं च । सर्वाकारसर्वज्ञज्ञानसमुदागमं च । अभिसंबोधिधर्मचक्रप्रवर्तिसंदर्शनसमुदागमं च । समासतः सर्वधर्मप्रवेशविभक्तिनिस्तीरणसमुदागमं च यथाभूतं प्रजानाति । स एवं ज्ञानानुगमनतया बुद्ध्या उत्तरे सत्त्वकायनिर्माणं च यथाभूतं प्रजानाति । क्लेशनिर्माणं च दृष्टिकृतनिर्माणं च । लोकधा

1 न MS.K.K'. 2 त MS. 3 सो T.K. 4 र्णं K'. 5 चे । T. 6 रो T. 7 स+रा T. 8 ख्या T. 9 था T. 10 र्या नु सम्य MS. 11 वर्तिसं T. 12 ज्ञा T. 13 भवन्तो T. 14 र्या तु T. 15 भवन्तो T. 16 त्राः K'. 17 त्त्वो अने MS त्त्वाने T. त्त्वो ने K'. 18 मनं MS.K.K'. 19 निवृत्ति–T. 20 र्मा MS. 21 धर्मकाय–MS.K.K'.

तुनिर्माणं च [1]धर्मधातुनिर्माणं च । [2]श्रावकनिर्माणं च प्रत्येकबुद्धनिर्माणं च बोधिसत्त्वनिर्माणं च । तथागतनिर्माणं च सर्वनिर्माणकल्पाकल्पतां च यथाभूतं प्रजानाति । सर्वबुद्धाधिष्ठानं च यथाभूतं प्रजानाति । धर्माधिष्ठानं च संघाधिष्ठानं च कर्माधिष्ठानं च क्लेशाधिष्ठानं च कालाधिष्ठानं च प्रणिधानाधिष्ठानं च पूजाधिष्ठानं च चर्याधिष्ठानं च कल्पाधिष्ठानं च ज्ञानाधिष्ठानं च यथाभूतं प्रजानाति । स यानीमानि[3] तथागतानामर्हतां[4] सम्यक्संबुद्धानां सूक्ष्मप्रवेशज्ञानानि । यदुत । चर्यासूक्ष्मप्रवेशज्ञानं वा । च्युत्युपपत्तिसूक्ष्मप्रवेशज्ञानं वा । जन्मसूक्ष्मप्रवेशज्ञानं वा । अभिनिष्क्रमणसूक्ष्मप्रवेशज्ञानं वा । अभिसंबोधिसूक्ष्मप्रवेशज्ञानं वा । [5]विकुर्वणसूक्ष्मप्रवेशज्ञानं वा धर्मचक्रप्रवर्तनसूक्ष्मप्रवेशज्ञानं वा । धर्मदेशनासूक्ष्मप्रवेशज्ञानं वा । धर्मविस्तरसूक्ष्मप्रवेशज्ञानं वा । आयुःप्रमाणाधिष्ठानसूक्ष्मप्रवेशज्ञानं वा । वर्णरूपकायसंदर्शनसू[6]क्ष्मप्रवेशज्ञानं वा । सर्वस[7]त्त्वविनयानतिक्र[8]मणसूक्ष्मप्रवेशज्ञानं वा । सर्वलोकधातुस्फरणसूक्ष्मप्रवेशज्ञानं वा । सर्वसत्त्वचित्तचरितव्यवलोकनसूक्ष्मप्रवेशज्ञानं वा । एकक्ष[9]णत्र्यध्वव्यवलोकनसूक्ष्मप्रवेशज्ञानं वा । पूर्वान्तापरान्तनिरवशेषसूक्ष्मप्रवेशज्ञानं वा । सर्वसत्त्वचित्तचरि[10]तनानात्वसमन्तसूक्ष्मप्रवेशज्ञानं वा । तथागतबलवैशारद्यबुद्धधर्माचिंत्यसूक्ष्मप्रवेशज्ञानं वा । तथागतपरिनिर्वाणसूक्ष्मप्रवेशज्ञानं वा । शासनाधिष्ठानसद्धर्मस्थितिसूक्ष्मप्रवेशज्ञानं वा । एवं प्रमुखान्यप्रमे[11]यासंख्येयानि तथागतानां सूक्ष्मप्रवेशज्ञानानि [12]तानि सर्वाणि यथाभूतं प्रजानाति । स यानीमानि[13] तथागतानामर्हतां सम्यक्संबुद्धानां गुह्यस्थानानि । यदुत । कायगुह्यं वा वाग्गुह्यं वा चित्तगुह्यं वा कालाकालविचारणा[14]गुह्यं वा बोधिसत्त्वव्याकरणगुह्यं वा सत्त्व[15]संग्रहनिग्रहगुह्यं वा विन[16]योत्[17]सादनावसा-

1 सत्त्व MS.K.K'. 2 सत्त्वधातुनिर्माणं च+श्रा T. 3 नी T. णि K. 4 न्तां T. 5 वि 10 वा=आयुः आर्विणसूक्ष्मप्रवेशज्ञानं वा अभिसंबोधिसूक्ष्मप्रवेशज्ञानं वा K. 6 क्ष्मे MS. 7 सत्त्व—MS.K.K'. 8 मे MS. मसू K'. 9 णे T.K. 10 ते MS. ता T. 11 यानि असं T. 12 यानि MS. 13 नी MS. 14 ना MS. 15 सं—MS. 16 नेयां सादरावसानगुह्यं T. 17 त्स K.

नगुह्यं वा यथाकाला[1]ववादानुशासना[2]ध्युपेक्षण[3]गुह्यं वा [4]याननानात्वव्यवस्थापनगुह्यं वा । सत्त्वचर्येन्द्रियविभक्तिगुह्यं वा सत्त्वकर्मक्रियावतारगुह्यं वा बोधिसत्त्वचर्येन्द्रियविभक्तिगुह्यं वा चर्याभिसंबोधिस्वभावप्रभावानुबोधगुह्यं वा स्वभावाभिसंबोध्यधिष्ठान[6]गुह्यं वा । अवतारो[7]त्तारणगुह्यं वा । आकर्षण[8]सं[9]प्रेषणगुह्यं वा । स्थानचंक्रमण[10]निष[11]द्याशया[12]सनसंदर्शनगुह्यं वा । आहारपरिभोगकायोपकरण[13]प्रतिषे[14]वणगुह्यं वा । भाषिततू[15]ष्णीभावध्यानविमोक्षसमाधिसमापत्तिसंदर्शनगुह्यं वा । एवं प्रमुखान्यप्रमेया[16]संख्येयानि तथागतानां गुह्यस्थानानि तानि सर्वाणि यथाभूतं प्रजानाति । स यानीमानि तथागतानां कल्पप्रवेशसमवसरणज्ञानानि । यदुत । एककल्पासंख्येयकल्पसमवसरणता । असंख्येयकल्पैककल्पसमवसरणता । संख्येयकल्पासंख्येयकल्पसमवसरणता । असंख्येयकल्पसंख्येयकल्पसमवसरणता । चित्तक्षणकल्पसमवसरणता । कल्पचित्तक्षणसमवसरणता । कल्पाकल्पसमवसरणता । अकल्पकल्पसमवसरणता । सबुद्धककल्पाबुद्धककल्पसमवसरणता । अबुद्धककल्पसबुद्धककल्पसमवसरणता । [17]अतीतकल्पानागतप्रत्युत्पन्नकल्पसमवसरणता । प्रत्युत्पन्नकल्पातीतानागतकल्पसमवसरणता । अनागतकल्पातीतप्रत्युत्पन्नकल्पसमवसरणता । दीर्घकल्पह्रस्वकल्पसमवसरणता । ह्रस्वकल्पदीर्घकल्पसमवसरणता । सर्वकल्पेषु संज्ञाकृतसमवसरणता । सर्वसंज्ञाकृतेषु कल्पसमवसरणता । एवं प्रमुखान्यप्रमेयान्य[18]संख्येयानि कल्पप्रवेशसमवसरणा[19]नि तानि सर्वाणि यथाभूतं प्रजानाति । स या[20]नीमानि तथागतानामर्हतां सम्यक्संबुद्धानामवतारज्ञानानि । यदुत । बालपथावतारज्ञानं वा । परमाणु-

1 ले अव T. 2 व्य MS. व्यु K. 3 णं MS. 4 यान 33 ह्यं=सत्त्वेन्द्रियनानात्वचर्याविभक्तिप्रवेशगुह्यं वा सत्त्वकर्मक्रियावतारगुह्यं वा याननानात्वव्यवष्ठापनगुह्यं T. 5 धं MS. 6 नं MS. 7 ता T. 8 णा MS.K.K'. 9 प्रवेश MS. 10 ण–MS. 11 पे T. 12 य्या MS.K.K'. र्य्या R. 13 ण–MS.K.K'. 14 सेवण R. श्रवण T. 15 श्नी MS. 16 यान्यप्रमेयान्यसं T. 17 अतीतानागत–प्रत्युत्पन्न, प्रत्युत्पन्न–अतीतानागत, अतीत–अनागत, अनागत–अतीत Sn. अतीतानागत–प्रत्युत्पन्न, प्रत्युत्पन्न–अतीतानागत, अनागतातीता–प्रत्युत्पन्न, प्रत्युत्पन्न–अनागतातीता Kj. Bb. 18 ण्य K'. 19 णतानि MS.K.K'. 20 नि T.

रजोवतारज्ञानं वा । बुद्धक्षेत्रकायाभिसंबोध्यवतारज्ञानं वा । सत्त्वकायचित्ताभिसंबोध्यवतारज्ञानं वा । सर्वत्रा[1]नुगताभिसंबोध्यवतारज्ञानं वा । व्यत्यस्तचरिसंदर्शनावतारज्ञानं वा । अनुलोमचरिसंदर्शनावतारज्ञानं वा । प्रतिलोमचरिसंदर्शनावतारज्ञानं वा । चिंत्याचिंत्यलोकविज्ञेयाविज्ञेयचरिसंदर्शनावतारज्ञानं वा । श्रावकविज्ञेयप्रत्येकबुद्धविज्ञेयबोधिसत्त्वविज्ञेयतथागतविज्ञेयचरिसंदर्शनावतारज्ञानं वा । तानि सर्वाणि यथाभूतं प्रजानाति । इति हि[2] भो[3] जिनपुत्रा अप्रमेयं[4] बुद्धानां भगवतां ज्ञानवैपुल्यमप्रमाणमेवास्यां भूमौ स्थितस्य बोधिसत्त्वस्यावता[5]रज्ञानं ॥

स[6] खलु पुनर्भो[7] जिनपुत्रा बोधिसत्त्व एवमिमां[8] बोधिसत्त्वभूमिमनुगतो ऽचिंत्यं च नाम बोधिसत्त्वविमोक्षं प्रतिलभते[9] । अनावरणं च नाम । [10]विशुद्धिविचयं च नाम । समन्तमुखा[11]वभासं च नाम । तथागतकोशं च नाम । अप्रतिहतचक्रानुगतं च नाम । त्र्यध्वानुगतं च नाम । धर्मधातुगर्भं च नाम । विमुक्तिमण्डलप्रभासं च नाम । अशेषविपर्यं[12]गमं च नाम बोधिसत्त्वविमोक्षं प्रतिलभते[13] । इति हि भो[14] जिनपुत्रा[15] इमान्दशबोधिसत्त्वविमोक्षान्प्रमुखान् कृत्वा[16]प्रमेया[17]संख्येयानि [18]विमोक्षमुखशतसहस्राणि बोधिसत्त्वो[19] ऽस्यां दशम्यां बोधिसत्त्वभूमौ प्रतिष्ठितः[20] प्रतिलभते[21] । एवं यावत्समाधिशतसहस्राणि । धारणीशतसहस्राणि । अभिज्ञाभिनिर्हारशतसहस्राणि प्रतिलभते । ज्ञानालोकशतसहस्राणि । विकुर्वणशतसहस्राणि । प्रतिसंवि[22]न्निर्हारशतसहस्राणि । उपायप्रज्ञाविक्रीडितसहस्राणि । गंभीरधर्मनयप्रवेशशतसहस्राणि । महाकरुणावेगशतसहस्राणि । बोधिसत्त्ववशिता[23]प्रवेशश-

1 र्वानु MS. 2 हि—MS.K'. 3 भवन्तो T. 4 य T. 5 तरण । T. 6 अथ खलु T. 7 भवन्तो T. 8 मा MS. 9 तो MS. 10 वि 7 म—MS. 11 पा T. 12 यं च नाम T. 13 तो MS 14 भवन्तो T. 15 त्रो MS. 16 त्वा अप्र T. 17 यान्यसं T. 18 बोधिसत्त्व+वि R. 19 त्त्व अस्यां MS. त्त्वो स्यां K'. 20 त T. 21 तो एवं MS. त एवं R. 22 नि MS. 23 प्रवेश—K.K'.

तसहस्राणि प्रतिलभते । स एवं ज्ञानानुगतया बुद्धया[1]प्रमाणानुगतेन स्मृतिकौशल्[2]येन समन्वागतो भवति । स[3] दशभ्यो दिग्भ्यो ऽप्रमेयानां बुद्धानां भगवतां सकाशादेकक्षणलवमुहूर्तेनाप्रमणान्महाधर्मावभासान्महाधर्मालोकान्महाधर्ममेघां सहते संप्र[4]तीच्छति स्वीकरोति सं[5]धारयति । तद्यथापि नाम भो[6] जिनपुत्रा[7]ः सागरना[8]गरा[9]जमेघविसृष्टो[10] म[11]हाप्स्कंधो न सु[12]करो ऽन्येन पृथिवीप्रदेशेन सोढुं वा संप्रत्येषि[13]तुं वा स्वीकर्तुं वा [14]संधारयितुं वान्यत्र महासमुद्रात् । एवमेव भो[15] जिनपुत्रा ये ते तथागतानां भगवतां गुह्यानुप्रवेशा[16]ः । यदुत । महाधर्मावभासा महाधर्मालोका महाधर्ममेघास्तेन सुकरा[17]ः सर्वसत्त्वैः सर्वश्रावकप्रत्येकबुद्धैः सोढुं वा सं[18]प्रत्येषितुं वा संधारयितुं वा । प्रथमां भूमिमुपादाय यावन्नव[19]मीभूमिप्रतिष्ठितैरपि बोधिसत्त्वैस्तां बोधिसत्त्वो[20] ऽस्यां धर्ममेघायां बोधिसत्त्व[21]भूमिस्थितः सर्वां सहते संप्र[22]तीच्छति स्वीकरोति संधारयति । तद्यथापि नाम भो[23] जिनपुत्रा महासमुद्र एकस्यापि महाभुजगेन्द्रस्य महामेघान्सहते संप्र[24]तीच्छति स्वीकरोति संधारयति । द्वयोरपि त्रयाणामपि यावदपरिमाणानामपि भुजगेन्द्राणामेकक्षणल[25]वमुहूर्तेनाप्रमेयान्महामेघान्सहते संप्र[26]तीच्छति स्वीकरोति संधारयति । तत्कस्य हेतोरप्रमाणविपुलविस्तीर्णत्वान्महासमुद्रस्य । एवमेव [27]भो जिनपुत्रा अस्यां धर्ममेघायां बोधिसत्त्वभूमौ प्रतिस्थितो बोधिसत्त्व एकस्यापि तथागतस्य सकाशादेकक्षणलवमुहूर्तेना[28]प्रमेयान्महाधर्मावभासान्महाधर्मालोकान्महाधर्ममेघान्सहते सं[29]प्रतीच्छति स्वीकरोति संधारयति । द्वयोरपि त्रया[30]णामपि यावदपरिमा[31]णानामपि[32] तथाग-

1 ऽप्र MS. अप्र T. 2 ले MS. 3 स—MS. 4 ति MS. 5 चा T. 6 भवन्तो T. 7 त्रा MS. 8 णा R. 9 जो MS. 10 ष्टा MS. 11 हानप्स्क T.K.K'. 12 सू MS. 13 षयितुं MS. 14 सं—MS. 15 भवन्तो T. 16 शो MS. 17 ला MS. 18 प्रेक्षितुं T. 19 मी+बोधिसत्त्व T. 20 त्त्व ऽस्यां MS. 21 भूमौ स्थितः K. भूमौ प्रतिस्थितः K'.T. 22 तिछ MS. तीच K. 23 भवन्तो T. 24 ति MS. 25 ले T. 26 ति MS. 27 भवन्तो T. 28 प्रमाणान्म K. 29 ति MS. 30 ना K. 31 ना T. 32 प्य,+चिंत्यानामप्यतुल्यानामनन्तानामपर्यन्तानामसीमाप्राप्तानाममाप्यानामनभिलाप्यानां संख्यागणनाव्यतिवृत्तानामपि T.

तानां सकाशादेकक्षणलवमुहूर्तेनाप्र[1]मेयान्महाधर्मावभासान्महाधर्मालोकान्महाधर्ममेघान्सहते संप्र[2]तीच्छति स्वीकरोति संधारयति । तत उच्यते इयं भूमिर्धर्ममेघेति ॥

विमुक्तिचन्द्रो बोधिसत्त्व आह ॥

शक्यं पुनर्भो जिनपुत्र संख्यां कर्तुं कियतां तथागतानामन्तिकेभ्यो बोधिसत्त्व एकक्षणलवमुहूर्तेन महाधर्मावभासान्महाधर्मालोकान्महाधर्ममेघान्सहते संप्र[3]तीच्छति स्वीकरोति संधारयति ॥

वज्रगर्भो बोधिसत्त्व आह ॥

न सुकरा भो जिनपुत्र संख्या कर्तुं गणनानिर्देशेन । इयतां तथागतानामन्तिकेभ्यो बोधिसत्त्व एकक्षणलवमुहूर्तेन महाधर्मावभासान्महाधर्मालोकान्महाधर्ममेघान्सहते संप्र[4]तीच्छति स्वीकरोति संधारयति । अपि तु खल्वौपम्यं करिष्यामि । तद्यथापि नाम भो[5] जिनपुत्र[6] दशसु दिक्षु दशबुद्धक्षेत्रानभिलाप्यकोटी[7]नियुतशतसहस्रपरमाणुरजःसमेषु[8] लोकधातुषु यावत्स[9]त्त्वधातु[10]निरवशेषयोगेन संविद्यते । तत[11] एकः सत्त्वः श्रुतग्रहणधारणीप्रतिलब्धो भवेत्तथागतानामुपस्थायको[12] महाश्रावको ऽग्र्यः[13] श्रुतधराणां । तद्यथापि नाम भगवतो वज्रपद्मोत्तरस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य महाविजयो नाम भिक्षुरेवंरूपेण श्रुतको[14]शल[15]बलाधानेन स एकः सत्त्वः समन्वागतो भवेत् । यथा च स एकः सत्त्वस्तथा निरवशेषेषु[16] [17]तेषु सर्वे[18]षु लोकधातुषु ते सर्व[19]सत्त्वाः[20] समन्वागता भवेयुर्य[21]त्वेकेनोद्गृहीतं स्यान्न[22] द्वितीयेन । तत्किम्मन्यसे भो जिनपुत्र[23] बहुतरन्तेषाम[24]प्रमाणं स[25]र्वसत्त्वानां श्रु[26]तकौशलं भवेत् ॥

1 प्रमाणा T. 2 ति MS. 3 ति K. 4 ति MS. 5 भवन्तो T. 6 त्रा T. 7 टि R. 8 समासु T. 9 त्वास T. 10 तुषु नि T. 11 तत 15 ब्धो=तथागतधर्मधारणा (ण K') धारणीप्रतिलब्धो MS.K.K'. 12 म MS.K. 13 or ग्रः? 14 को K. 15 ल्य R. 16 शेषासु T. 17 तेषु–T. 18 सर्वासु T. 19 सर्वे K. 20 त्त्वः MS. 21 यच्चै T. यंचै R. यंत्वे K. यन्त्वे K. 22 त् MS. 23 त्रा T. 24 म+प्रमेयाम R. 25 स 3 नां–T. 26 वा+श्रु T.

विमुक्तिचंद्रो बोधिसत्त्व आह ॥

बहु भो जिनपुत्र[1]प्रमाणं तत्तेषां सर्वसत्त्वानां श्रुतकौशलं[2] भवेत् ॥

वज्रगर्भो बोधिसत्त्व आह ॥

आरोचयामि ते भो जिनपुत्र प्रतिवेदयामि । यं[3]द्धर्ममेघायां बोधिसत्त्वभूमौ प्रतिष्ठितो[4] बोधिसत्त्वं[5] एकक्षणलवमुहूर्तेन एकस्यैव तावत्तथागतस्य सकाशाद्धर्मधातुत्र्यध्वकोशं नाम महाधर्मावभासालोकमेघं सहते संप्रतीच्छति स्वीकरोति संधारयति । यं[6]स्य महाधर्माव-भासालोकमे[7]घसंधारणकौ[8]शलस्य तत्पूर्वकं श्रुतकौशलं[9] शततमीमपि कलां[10] नोपैति । सहस्र-तमीमपि[11] शतसहस्रतमीमपि कोटीतमीमपि कोटीशततमीमपि कोटीसहस्रतमीमपि को-टीशतसहस्रतमीमपि कोटीनि[12]युतशतसहस्रतमीमपि कलां नोपैति । संख्यामपि कलामपि गणनामप्युपमामपि याव[13]दुपनिषदमपि न क्षमते । यथा चैकस्य तथागतस्य सकाशात्तथा दशसु दिक्षु यावन्ति [14]तेषु सर्वेषु पूर्वकेषु लोकधातुषु [15]तानि परमाणुरजांसि संविद्यन्ते[16] ता-वतां सम्यक्संबुद्धानामतो ऽपि भूय उत्तरे[17] ऽप्रमेयाणां तथागतानां सकाशादेकक्षणलव-मुहूर्तेन धर्मधातुत्र्यध्वकोशं नाम महाधर्मावभासालोकमेघं सहते संप्रतीच्छति स्वीकरोति संधारयति । तत उच्यते इयं भूमिर्धर्ममेघेति ॥

पुनरपरं भो जिनपुत्र धर्ममेघायां बोधिसत्त्वभूमौ[18] प्रतिष्ठितो बोधिसत्त्वः स्वप्रणिधा-न[19]बलाधानतो महाकृपाकरुणामेघं[20] समुत्थाप्य । महाधर्मावभास[21]गर्जनमभि[22]ज्ञाविद्या[23]वैशारद्य-विद्युद्विद्योतितं । महारश्मिमारुतसमीरितं । महापुण्यज्ञान[24]घनाभ्रजालसंछन्नं । [25]विविध-

1 त्र अप्र T. 2 ल्यं R. 3 यं ध T. 4 तो+भवति T. 5 त्त्वो K'. 6 त T. 7 मेघ–T. 8 ल्य K'. 9 ल्यं R. 10 लान्नो T. लान्नौ K. 11 पि+कलां नोपैति । K'. 12 नयुत T. 13 दौपम्य-मपि न क्षमते MS.K.K'. 14 तासु पूर्विकासु T. 15 तानि–T. 16 ते MS. 17 रि अप्र T. ऽयप्र R. 18 मि T. 19 बलाधान–MS.K'. 20 घान्स MS.K.K'. 21 सेन ग T. 22 विज्ञा All MSS. 23 द्यो MS. 24 ने K. 25 現種々身色爲雜色雲 Kj. Bb. 現種々色身爲雜色雲 Br.

कायघनावर्तसंदर्शनं । महाधर्मनि[1]र्नादनं । नमुचिपर्षद्विद्रा[2]वनं । एकक्षणलवमुहूर्तेन दशसु दिक्षु यावन्ति [3]तेषु [4]पूर्वकेषु लोकधातुषु तानि परमाणुरजांसि संविद्यन्ते तावंति [5]तानि लोकधातुको[6]टीनि[7]र्नियुतशतसहस्राणि स्फु[8]रित्वा तेभ्यो ऽपि भूयो ऽप्रमेया[9]नि लोकधातुको[10]टी-[11]नियुतशतसहस्राणि [12]स्फुरित्वा [13]महामृत[14]कुशलधाराभिप्रवर्षणेन यथाशयतः सत्त्वानाम[15]ज्ञानसमुत्थिताः सर्वक्ले[16]शरजोज्वलाः प्रशमयति । तत उच्यते इयं भूमिर्धर्ममेघेति ॥

पुनरपरं भो जिनपुत्र धर्ममेघायां बोधिसत्त्वभूमौ स्थितो बोधिसत्त्व एकस्मि[17]न्नपि लोकधातौ तुषितव[18]रभवनवासमुपादाय च्यवना[19]वक्रमणगर्भस्थितिजन्माभिनि[20]ष्क्रमणाभिसंबो-[21]धनाध्ये[22]षण[23]महाधर्मचक्रप्रवर्तनमहापरिनिर्वाणभूमिरिति । सर्व[24]तथागतका[25]र्यमधितिष्ठ[26]ति । यथाशयेषु सत्त्वेषु यथावै[27]नेयिकेषु । एवं [28]द्वयोरपि यावदनभिलाप्यानभिलाप्येष्वपि लोकधातुषु तुषितवरभवनमुपादाय च्यवना[29]वक्र[30]मणगर्भस्थितिजन्माभिनि[31]ष्क्रमणाभिसंबोधनाध्येषणमहाधर्मचक्रप्रवर्तनमहापरिनिर्वाणभूमिरिति । सर्वतथागतका[32]र्यमधितिष्ठति । यथाशयेषु [33]सत्त्वेषु यथावै[34]नेयिकेषु । [35]स एवं ज्ञानव[36]सिताप्राप्तः [37]सुविनिश्चि[38]तमहाज्ञानाभिज्ञ आकांक्षं संक्लि[39]ष्टस्य लोकधातोः[40] परिशुद्धतामधितिष्ठति । परिशु[41]द्धस्य लोकधातोः[42] संक्लिष्टतामधितिष्ठति । आकांक्षं संक्षि[43]प्तस्य लोकधातोर्विस्तीर्णतामधितिष्ठति । विस्ती[44]र्णस्य संक्षिप्ततामधि-

1 °दं शून्यतानिमित्ताप्रणिहितामहाधर्मनिर्घोषं नमुचि° T. 2 पणं T. 3 तासु T. 4 पूर्वकेषु—T. 5 तानि—T. 6 टि R. 7 न K. 8 स्फारित्वा K. स्फरित्वा MS. 9 णि T. 10 टि R. 11 न K.K′. 12 स्फा MS. स्फ R. 13 महता अमृत T. 14 कुशलमूलवारिधा T. 15 म+नादिकाल T. 16 शज्वालाः T. 17 स्यापि T. स्यामपि R. 18 रे MS. 19 व—K′. 20 निःक्र MS.K.K′. 21 ध्यध्ये R. 22 पै K. 23 महा—MS. 24 तथागत—K′. 25 य T. 26 ष्टि MS. 27 न T. 28 द्व 68 न=यावद्यावन्वि ता (नि) सु लोकधातुषु परमाणुरजांसि संविद्यन्ते। ततो (पि R.) भूयो ऽप्रमेयेषु लोकधातुकोटी (टि R) नियुतशतसहस्रेषु तुषितवरभुवनावासमुपादाय यावत् T. 29 व—K′. 30 मे MS. 31 निःक्र All MSS. 32 य T. 33 सत्त्वेषु—K. 34 न T. 35 एवं द्वयोरपि यावदनभिलाप्यानभिलाप्येष्वपि लोकधातुषु तुषितवरभवनमुपादाय च्यवनावक्रमणगर्भष्ठितिजन्माभिनिःक्रमणाभिसांबोधनाध्येषणमहाधर्मचक्रप्रवर्तनमहापरिनिर्वाणभूमिरिति। सर्वतथागतकार्यमधितिष्ठति यथाशयेषु यथावैनेयिकेषु+स K. 36 शि T. 37 सविदित MS. सुवितिचि T. 38 ति K. 39 ष्टाय T. ष्टाया R. 40 तुः T. 41 द्धाय T. द्धाया R. 42 तोस्सं T. 43 साया T. 44 र्णतायाः T.

तिष्ठति । एवं विपुलमहद्गताप्रमाणसूक्ष्[1]मौदारिकव्यत्यस्ता[2]वमूर्ध[3]समतलादीनां सर्वलोकधातूनां वृषभितयानन्तमभिनिर्हारमधितिष्ठति । स[4] आकांक्षन्ने[5]कस्मिं परमाणुरज[6]स्येकमपि लोकधातुं सर्वावन्[7]तं सचक्रवाडपरिख[8]मधितिष्ठति । त[9]च्च परमाणुरजो न वर्धयति । तां च क्रियामादर्शयति । द्वा[10]वपि त्री[11]नपि चतुरो ऽपि पंचापि यावदनभिलाप्या[12]नभिलाप्यलोकधातू[13]न्नेकस्मिन्परमाणुरजसि सर्वा[14]न्सचक्रवाडपरिखा[15]नधितिष्ठति । त[16]च्च परमाणुरजो न वर्धयति । तां च क्रियामादर्शयति । आकांक्षन्नेकस्मिं[17] लोकधातौ[18] द्विलोकधातु[19]व्यूहमादर्शयति । आकांक्षन्यावदनभिलाप्यलोकधातुव्यूहमादर्शयति । आकांक्षन्ने[20]कलोकधातुव्यूहं[21] द्वयोर्लोकधा[22]त्वोरादर्शयति । या[23]वदनभि[24]लाप्येषु लोकधातुष्वादर्शयति । आकांक्षन्यावदनभिलाप्येषु लोकधातुषु यः सत्त्वधातुस्तमेकस्मि[25]ल्लोकधातौ सं[26]दर्शयति । न च सत्त्वान्विहे[27]टयति । आकांक्षन्नेकस्मि[28]ल्लोकधातौ यावत्सत्त्वधातुस्तमनभिला[29]प्यलोकधातुषु[30] सं[31]दर्शयति । न च सत्त्वान्विहे[32]टयति । आ[33]कांक्षन्नेकवालपथ[34] ए[35]कसर्वाकारबुद्धविषयव्यूहमादर्शयति । आकांक्षन्यावदनभिलाप्या[36]न्सर्वाकारबुद्धविषयव्यू[37]हामादर्शयति । आकांक्षं या[38]वंत्यनभिला[39]प्येषु लोकधातुषु परमाणुरजांसि तावन्त आत्मभावानेकक्ष[40]णलवमुहूर्तेन [41]निर्मिमीते । ए[42]कैकस्मिंश्चात्मभावे[43] तावन्त एव पा[44]णीन्संदर्शयति । तैश्च पा[45]णिभिर्दशसु दिक्षु बुद्धपूजायां प्रयुज्यते । एकैकेन च पाणिना गंगानदीवालिकासमान्पुष्पपुटांस्तेषां बुद्धानां भगवतां क्षिपति ।

1 क्ष्मो MS. क्षौ T. 2 स्था MS. 3 र्ध्वं T. 4 स— MS.K.K′. 5 न्नै T.K′. 6 जांसि एक T. 7 तीं T. 8 खा T. 9 तं च T. 10 द्वे अपि T. द्वे पि R. 11 त्री 9 पि = तिस्रो पि चतस्रो पि पंचापि T. 12 प्यानभिलाप्यलो = प्या अपि लो T. 13 तूने MS. तुरे R. 14 र्वाः स T. 15 पा अधि T. 16 तं च T. 17 स्मा T. 18 तु T. 19 तौ T. 20 कधालोक K. 21 ह K. 22 तो MS. 23 आकांक्षन्याव T. 24 लाप्यानभिलाप्येषु MS. लाप्यासु T. 25 स्मि लो K.K′. स्यां लो T. 26 संदधाति T. 27 थ T.K.K′. 28 स्यां लो T. 29 प्यासु T. 30 षु— T. 31 संदधाति T. 32 थ T.K.K′. 33 आकांक्षन् अनभिलाप्यलोकधातुगतां सत्त्वानेकबालपथे संदधाति + आ T. 34 थे MS. 35 एकं सर्वबुद्धविषय T. 36 प्यसर्वबुद्धविषय T. 37 हमा T. 38 यावद T. 39 प्यासु T. 40 नैक K′. 41 निर्मे K. 42 एकस्मिं MS.K.K′. 43 वै K′. 44 प्राणि MS. धारणि T. 45 प्राणि MS. धारणि T.

